तत्राश्रितमित्येवं प्रतिपादयति ॥ उक्तार्थवेदनं प्रशंसति ॥ कल्पयति देवविशो य एवं वेदेति ॥ वेदितादेवविशो देवसंबंधिनीः प्रजाः
स्वेन्यरूपाः संपादयति ॥ ॥ इति द्वादशाध्याये प्रथमः खंडः ॥ ॥ अथ त्रिष्टुभो मुख्यत्वेन प्रशंसां कर्तुं आख्यायिकामाह ॥ प्रजा
पतिर्वै यज्ञं छंदांसि देवेभ्यो भागधेयानि व्यभजत्स गायत्रीमेवाग्नये वसुभ्यः प्रातःसवने भजत्त्रिष्टुभमिंद्राय रुद्रेभ्यो
मध्यंदिने जगतीं विश्वेभ्यो देवेभ्य आदित्येभ्यस्तृतीयसवने इति ॥ पुरा प्रजापतिः सर्वं जगत्स्रष्टा सवनत्रयात्मकं यज्ञं
गायत्र्यादिछंदांसि देवतार्थं भागधेयानि भागविशेषरूपाणि कृत्वा व्यभजत् विभक्तवान् केन प्रकारेणेति ॥ सूत्र अर्त ।
यज्ञे प्रातःसवनमस्ति तस्मिन् गायत्रीमेवाग्न्यर्थं अष्टवसुदेवतार्थं च विभक्तवान् ॥ माध्यंदिने सवने त्रिष्टुभमिंद्रार्थं च एका
दशरुद्रार्थं च विभक्तवान् ॥ तृतीयसवने जगतीं विश्वेभ्यो देवेभ्य आदित्येभ्यश्च विभक्तवान् ॥ एवं सानुष्टुबेकापरिशिष्टा
ऽस्याच्छंतीतमाह ॥ अथास्य स्वयं छंद आसीदनुष्टुब्नामुदंतमभ्युदौहदच्छावाकीयामभिसेनमब्रवीदनुष्टुब्
त्वं देवानां पापिष्ठासि यस्यास्त्वं छंदो भियामोदं तमभ्युदौहदीदच्छावाकीयामभीति तदजानात्स स्वं सोममाहर
र स्वे सोमे ग्रं मुखमभिपर्याहरदनुष्टुभं तस्मादनुष्टुव अग्र्या युज्यते सर्वेषां सवनानामिति ॥ अथास्मादीनां वस्वा मुख्या
दीनां स्वछंदो विभागानंतरं अस्य प्रजापतेः स्वभूत मनुष्टुबाख्यं यच्छंद आसीत्तन्नामनुष्टुभं दं तमभि यज्ञस्यांते
विहीनं देशमभिलक्ष्य न दैवे हृदपसारितवान् कुत्र देशे इतीत्थं तदुच्यते अच्छावाकीयामभि अच्छावाकवद्दस्वे सैव म

धर्युणोक्ते च्छावाकोर्यब्रूते सेयम् गच्छावाकीयानामभिष्टुद्धयोदृष्टवान् अनुष्टुभम् च्छावाकीयां दृष्टवानसि स्यर्थः तेन
साकुपितासानुष्टुप् एवेनं प्रजापतिमब्रवीत् त्वं चेदेवं मे वरवत्त्वे कोदेवानामध्ये पापिष्ठोसि यस्य पापिष्ठस्य प्रजापते सा
वाहं छंदोस्मि अग्निय स्यादयः पूर्वं छंदोरहिताः नाहं त्वो प्योपि छंदांसि दृष्टवानसि अहं नु पूर्वेमे वत्सदीयां नाहं दृश्य
मीयतोपसाया च्छावाकीयामभिष्टुद्धयोरुद्धवानसि अतो मदुपक्षया त्वं पापिष्ठत्वमिति अनुष्टुभोक्तिप्रायः तत्स
वमनुष्टुभ उपाप्रोक्तमनुपाठेन रूपं प्रजापतिर्ह्ली तवानुद्वात्याभ्वनुपाठेन परिहारार्थं स्वकीयं सोमं आगमादहरत्॥
सानुतस्मिन् सोमयोगे श्रेष्ठप्रादेशरूपं यत् सुखमस्ति तदभिष्टुद्धयानुष्टुभ उपर्यो हरन् तत्र नीतवानि त्यर्थः तस्मादुस्तस्मादे
वकारणादयमनुष्टुप् सर्विया श्रेष्ठा सती सर्वेषां सवनानां मुखान्मुख्येन वा प्रारंभकालीनः प्रयुज्यते॥ एतद्वेदनं प्रशंसति
अग्रेमुख्यो भवति श्रेष्ठतामश्नुते य एवं वेदेति वेदिता स्वकीय ज्ञातीनां मध्ये सर्वेषां समानानां मध्ये अग्रे भवोचमोज्येष्ठो भ
वहारनिर्वाहकः श्रेष्ठतां विद्यादानादिगुणैः श्रेष्ठत्वं प्राप्नोति प्रजापतिन्यायेन यजमानस्यापि अवश्यमादावनुष्टुभ्प्रयोग
प्रश्नीसति स्वयेस तत्सोमे कल्प्य यत्र स्मायज्ञ यजमानवशो भवति कल्प्यत एव यज्ञोपीति॥ यस्मात् स प्रजापतिः स्वकी
नैकृ एव सोमयागात्त सवनेषु अनुष्टुभो मुख्यात्सकृत्वमकल्पयत्तस्मादिदानीमपि यत्र क्वापि यागे यज्ञो यजमानवशो
भवतीस यज्ञोपि कल्प्यत एव अवैकल्येनानुष्ठास्यामीति अभिप्रायो नानुष्टुभः सवनानामादौ प्रयोगे सति यद्यस्य य
जमानवशार्थं तत्र यज्ञो वै कल्पयरहितो भवती त्यर्थः उक्तं वाक्यार्थमेव वाक्यान्तरेणस्पष्टी करोति॥ तस्येजनतायेकल्पतय
ते वै विद्वान्यजमानो वशीयत न इति॥ यत्रयस्यो जनतायामेवमनुष्टुभो महिमानं विद्वान्यजमानः वशी स्ववशो भ

यानस्मिन्ननुष्टुप्प्रयोगेसावधानोभूत्वा यजेत तस्यैजननायैतत्स्याजननायाः कल्पते यस्तः प्रयोजनसमर्थोभवति॥ ॥इति
द्वादशाध्याये द्वितीयः खंडः॥ ॥पुनरपि प्रकारान्तरेणानुष्टुभोमहिमानंदर्शयितुमाख्यायिकामाह॥ अग्निर्वैदेवानां
होतासीत्तंमृत्युर्बहिष्पवमानेसीदत्सोनुष्टुभाज्यं प्रत्यपद्यत मृत्युमेवतत्पर्यक्रामत्तमाज्येसीदत्स प्रउगेण प्रत्यपद्य
त मृत्युमेवतत्पर्यक्रामदिति॥ पुराकदाचिद्देवयानीयागेऽग्निरेवहोताभूत्तमग्निं होतारंमृत्युरसीदत् तुप्राप्तवानु
कस्मिन्काळइतितदुच्यते बहिष्पवमानाख्ये स्तोत्रेप्रातःसवनसंबंधिन्युपास्मैगायतानरइत्यस्यां गायत्र्याश्रयेणनसाम
गीयमानेसतिसोयमग्नेर्मृत्युप्राप्तिकाळस्तदानीमग्निर्मृत्युपरिहर्तुमनुष्टुप्छन्दस्कयाऽग्नेवोदेवायायस्यप्रसन्नय
मां आज्यशस्त्रेप्रारब्धवान्। ततोनानुष्टुप्प्रयोगेणसोग्निस्तदानीमेवमृत्युंपर्यक्रामत् दर्पितंकृतवान् ततोग्निनाहोत्रा
ज्यशस्त्रेप्रस्याग्नआयाहिवीतयइत्याज्याश्रयेणनाज्यस्तोत्रेसामगैर्गीयमानेसतितमग्निंमृत्युरासीन्। प्राप्तवान् तदासो
ग्निर्मृत्युपरिहर्तुंवायवायाहीत्यादिकेनसमस्तमाध्यात्मकेन प्रउगशस्त्रेणानुष्टुभानु प्रत्यपद्यत प्रारब्धवान् ततोनप्र
उगप्रयोगेणतदानीमेवमृत्युमतिक्रान्तवान् उक्तं प्रातःसवनेनुष्टुभामृत्युपरिहारस्तुते नप्रशस्यमाध्यंदिने स
वनेपितथाप्रशंसति तंमाध्यंदिनेपवमानेसीदत्सोनुष्टुभामरुत्वतीयंप्रत्यपद्यत मृत्युमेवतत्पर्यक्रामत्तंमाध्यंदिने बृ
हतीपृष्ठनाशक्नोत्सन्निधनेशाणावेविष्टरूपः प्राणानेवतेनाशक्नोद्यथैतेनु तस्मान्माध्यंदिनेहोताबृहतीपृष्ठस्तोत्रियेणेवप्रति स्य
पद्यतेप्राणाविवृष्टरूपः प्राणानेवतदभिप्रतिपद्यतइति॥ प्रातःसवनान्निरस्तोमृत्युः सामगैरुक्थानि तेजानमधुस
इति आदिकेमाध्यंदिनपवमानस्तोत्रेगीयमानेसतितस्मिन्काळेतमग्निंहोतारंमृत्युरसीदत्प्राप्तवान् तदानींसोग्निर्मृ
त्युपरिहारायानुष्टुप्छन्दस्कयात्वारथमितिमरुत्वतीयंशस्त्रं प्रत्यपद्यत प्राप्तवान् ततोनानुष्टुप्प्रयो

१६ गेण तदानीमेवमरुत्स्कमतिक्रांतवान् माध्यंदिनपवमानं निराकृतो मरुत्स्कः माध्यंदिनसवनस्य बधिनिमरुत्वतीयशा
स्त्रे शस्यमाने सति आसीत् तरमग्निं होतारमग्निं होतारा शाप्स्याम इति विचार्य तत्र बृहतीछंदस्का ऋचः विधायमाना
सु तमग्निं सन्तु शप्तुं नाशक्नोत् तत्र हेतुरुच्यते। बृहतीछंदस्का ऋचः प्राणस्वरूपाः एवं तत्रेन कारणेन प्राणानेव व्यवे
तुं वियोजयितुं मरुत्स्को नाशक्नोत् प्राणाभिमानीभिर्बृहतीभिः प्राणानां रक्षितत्वात् तां बृहतीम् अस्य मरुत्वतीयशस्त्राण
तरभाविनि निष्केवल्यशस्त्रे बहवो विधृतेनाथ्य सर्वस्मिन्नपि माध्यंदिने सवने मरुत्स्कत्र वेदीं निवारयंति। तस्मात्
वैष्टहृत्यामृत्स्कप्रवेशं निवारयितुं समर्थो न। तस्मान्माध्यंदिनप्रयोगे होता बृहतीछंदस्काः स्तोत्रिया एव त
वेन शस्त्रे प्रारभेत। यस्मिन्नस्तवे सामगे स्तोत्रे गीतं सा यद्व स्तोत्रियः तेनत्वेन प्रारंभे सति तत्र स्थाना बृहतीनां प्रा १६
णरूपत्वात्। प्राणानेवाभिलक्ष्य शस्त्रप्रारंभे भवत्येवाभ्युवति। अथ तृतीयसवने मरुत्स्कपति हारेणानुष्टुभं प्रशंसति।
तृतीयपवमाने सीदस्त्वानुष्टुभा वैश्वदेवस्य पद्यतमरुत्स्कमेवत्तस्य यकामदिति॥ त्रिष्टुप् पवमाने शुद्धे दिष्यवमानः
प्रथमः माध्यंदिनपवमानो द्वितीयः आर्भवपवमानस्तृतीयः माध्यंदिनसवने प्रवेष्टुं मरुत्स्कोऽशक्नोत् मरुत्स्कः स्वादिष्ठयामदि
ष्ठयेत्येतस्मिन्नार्भवाख्ये तृतीयपवमानस्तोत्रे तृतीयसवनगते सामगैर्गीयमाने सति। तमग्निं होतारं मरुत्स्क आसीद
साप्यग्निं स्तोत्रं मरुत्स्कं वारयितुं मनुष्टुभ्छंदस्कपातस विदुर्हणीमहद्भ्येन यथा वैश्वदेवारभ्य प्रारब्धं तत्र जयानुष्टुप्प्रयो
गेण तदानीमेवमरुत्स्कमतिक्रांतवान् ऋच मनुष्टुभं सवने त्रैये शस्त्रं। अथ यज्ञायज्ञीयाख्यं साम वैश्वानरीयं शंसति।
स्तिनं यज्ञायज्ञीये सीदत्स वैश्वानरीयेणाग्निमारुतं प्रत्यपद्यत मरुत्स्कमेवतस्यो क्रामन् वयो वै वैश्वानर इति

ष्ठायज्ञायज्ञीयं वज्रं वै पाप्मनस्त्रिष्ठायान्तं सन्नुदन्ते स सर्वान् पाप्मनः सर्वान् स्थाणून् अस्योरजिनुव्यस्व स्ये वोद्दहुयन्तस्य
स्स वहोतोन्मुच्यते सर्वायुः सर्वायुपूचायेति॥ यज्ञायज्ञावो अग्नय इत्यस्यामृच्युत्पन्नं साम यज्ञायज्ञीयं तत्साम साध्ये
न स्तोमके स्तोत्रे सामगैर्गीयमाने सति निर्वर्तीय सवनमग्निरात्क्रान्तो मृत्युस्तमग्निं हामार्गं शान्तवान् सोप्यग्निर्मृत्युपरिहाराय
वैश्वानराय पृथुपाजस इत्यादिना वैश्वानरीयेण सूक्तेनाग्निमारुतशस्त्रस्यांशं प्रारब्धवान् तेन सूक्तरूपेण योगेन मृत्युमतिक्रा
न्तवान् तच्च वैश्वानरीयं सूक्तं वज्ररूपं यज्ञायज्ञीयस्तोत्रं त्रिष्ठायाः समाप्ते होतुस्तस्मात् सूक्तरूपेण वज्रेणैव त्रिष्ठा
प्रायच्छत् समाप्तिर्मृत्युमग्निर्निराकृत सनादद्योऽग्निः सर्वान् पाप्मनो मृत्युसंबंधिर्बंधिनः रूपान् तथा मृत्योः संबंधिनः स
र्वान् स्थाणून् उत्क्षिप्तगदाद्यायुधानि मृत्योः सकाशात्तान् अनिर्मुच्य निवार्य स्वस्यैव क्षेमेणैव स्वयं मृत्युसकाशान्मु
क्तोभवत् अग्निवन्मानुषोपि होताजेनैव प्रकारेणानुतिष्ठन् सर्वेणायुषायुक्तः क्षेमेणैव मृत्योर्मुच्यते। अत्र सर्वत्र योयो प्रका
र्यस्तस्य सर्वस्यार्थवादादेव विधिरुन्नेयः। सोयं होतृप्रयोगो यजमानस्य सर्वायुत्वाय संपद्यते॥ वदनं प्रशंसति॥ सर्वमा
युरेति य एवं वेद॥ ॥इति द्वादशाध्याये तृतीयः खण्डः॥ ॥अथ मरुत्वतीयशस्त्रमारभ्यते। तत्रायं संग्रहश्लोकः॥ प्रतिपद
नुचरावनुजगाथोहरि निहवो ध्रुवस्पतेर्ध्रुववध्या॥ ध्रुवविधि विहितौ योस्तथाथ धाय्या विततः च मरुत्वतीयस्तोत्रे प्रति
तत्रावारथमितिमरुत्वतीयस्य प्रतिदत्तुष्टुप्प्रशंसितुमाह॥ इन्द्रो वै वृत्रं हत्वा नास्तृषीति मन्यमानः परां परावता
इस परमामेव परावतमगच्छदनुष्टुब्वै परमा परावद्वा वागवा अनुष्टुप्स वाचं प्रविश्याशयत् सर्वाणि भूतानि विभज्य
च्छे स्तं पूर्वे घ्नः पितरो विदन्नुत्तरमहर्दैवास्तस्मात्पूर्वेघ्नः पितृभ्यः क्रियन्तउत्तरमहर्देवान्यजन्ते इति॥ ३॥ पुनरे

त्रनामानमसुरेन्द्रत्यनास्त्रिषिनहिंसितवानस्मि इति मन्यमानस्तद्दीयजीवनमाशंक्यतस्माड्डीनः पराः परावतो सधिकाद्दूराद्भू
मिमगच्छत् सोयं तावताप्यसंतुष्टः परामेवाप्यधिकामेव परावतं दूरां भूमिं पुनरप्यगच्छत् अपि काभ्यो दूराद्भूमिभ्योप्यस्य
तमधिकाद्दूरभूमिकेति चेत् स यत्तु उच्यते। अनुष्टुप्छंद परमापरावत्यधिकाद्दूराद्भूमिस्तस्यामनुप्रविष्टस्य च छंदःपादबद्धमंत्रवाक्य
त्वात्। अनुष्टुप्छंदस्त्वरूपाततः सर्वे देवावेदाविद्रूपतत्वरूपा यतनं हृष्टेनैवानृतं सर्वाणि भूतानि सर्वेषु देशेषु प्रविभज्यान्वेच्छत्
तमन्वेच्छमेव एकस्मिन्देशे गतोऽगः अन्यो देशो देशान्तरे इत्येवं देतो विज्ञागः तमन्विष्यमाणेद्र उपितरो यागादिना
करविदत्। अखंडिनि देवास्तु तरमनुत्तरस्मिन्नहनि आविदन् यस्माद्देवैस्तस्माल्लोकेपि पूर्वेद्युरमावास्यायां पितृभ्यः श्रा
द्धं क्रियते उत्तरमहरुत्तरस्मिन्नहनि प्रतिपद्दिने दर्शपूर्णमासादिनादेवान्यजंते इंद्रस्य रक्षकतान्स्त्रशास्त्वानुष्टुबि ११
ति। अथ मरुत्वतीये यस्य पत्रास्तत्स्य मंत्रं दर्शयति तेभ्युयन्त्रप्ति षृणवामेव तथावाचन आविष्टमागमिष्यतीतित
जितेभ्यः पूर्वेस्तआत्वारथं यथोत युइत्येवेनमावर्त्त यन्निदं वसोस्सुतमंध इत्येवेभ्यः सुतकीर्त्याविरभुवदि
नेदीय एदिहीत्येनैनं मध्यंत्रापदयंतीति इंद्र श्वावे ता स्ते देवा परस्परमिदमब्रुवन् अभिषुणवामैवव यं
५ सर्वथा सोमस्याभिपूर्वकं रवामः तथावाव तेनैवकारणेनाविष्टमाप्नुतमसं अतिशीघ्रं यथा भव जितथेंद्र आगमिष्यती
ति तद्वचनमंगीकृत्य तत्सर्वे अभिषु प्रवन् अभिषवं कृतवंतः। गायत्र्या शास्तोते देवा आत्वारथं यथोतय इत्यनेनैव मंत्रेण
ग मिन्द्र मनुष्टुभः सकाशात् अभिषवदेशं प्रसावर्त्तयन् आच्च वृविदाव त्रिपाव के मावर्त्तयामसीति यद्वद्यं
यमनतस्माद्यादिंद्रस्याविरभूत इदं वसोस्सुतमंध इत्यस्मिन्मंत्रे पादे सुतकीर्त्या अभिषववापिना सूक्ताः
ते वेभ्योदेवेभ्य इंद्र आविरभूत् न शक्रो भूत् इंद्र नेदीय एदिहीति मंत्रगतेन समीपगमनवाचिना नेदिष्ठेति

पदद्वयेनेनमिंद्रं यागदेशमध्ये प्रापितवंतः अनेनार्थवादेन तत्र मंत्रविधिः कर्त्तव्यः एतदेवाभिप्रेत्य आश्वलायन आह ॥
मरुत्वतीयग्रहस्यानुग्रसेदब्रह्मण्योंसा वा मिति माध्यंदिने शस्त्रादि प्रगाथा वा आ त्वा रथं यथोतय इदं वसो सुतमंध इति मरु
मरुत्वतीयस्य प्रतिपदनुचरा विंद्रनेदीय एदिहीति निवदः प्रगाथ इति येन तु येन शास्त्रीं प्रारभन्ते सोयं तृचः प्रतिपदुच्य
ते न तु तेन सखावीत्येतो नुचरः अत्र आ त्वा रथं यथा इदं वसो इति एतौ तृचौ प्रतिपदनुचरौ द्रष्टव्यौ । ननु ऊर्ध्वं इंद्रनेहीत्ययमिंद्रनेदी
गर य इति प्रगाथः शंस्य ऐंद्रपालम कोरूत्वमृच्यम इत्यर्थः वेदने प्रश्नो संति । आगतेंद्रेण यज्ञेन यजते सेंद्रेण यज्ञेन राध्नोति य एवं वेदेति ।
आगतेंद्रोपस्मिन्यज्ञे सोयमागतेंद्रः वेदिता नाहं त्र्योन पूर्णेन सोयमागतेंद्रः । वेदितानाहं त्र्योन यज्ञेन यजतेन तथैंद्र
सहितेन यज्ञेन समृद्धो भवति ॥ ॥इति द्वादशाध्याये चतुर्थः खंडः ॥ ॥पूर्वोक्ते इंद्रनेदीय इत्यादिके प्रगाथे शस्त्रेस्मिन्नु मा
रुत्वतीयकामाह । इंद्रं वै वृत्रं जघ्निवांसं नास्तृतेति मन्यमानाः सर्वा देवता अजहुः तं मरुत एव स्वापयो नाजहुः प्राणा वै मरु
तः स्वापयः प्राणा हैवैनं तं नाजहुस्तस्मादेषोऽच्युतः स्वापिमान्प्रगाथः शस्यत आ स्वापे स्वापिभिरिरिती । इंद्रो यदा हत्वं वृत्रं वा
कृतदानमिंद्रं सर्वा देवता अजहुः परित्यक्तवंतः का हेतुः देवतानामस्त्रेणैतेन हिंसितं वा नु इंद्र इति मन्यमानाः वृत्रस्याति
क्रोधवतो नीयत्वात्प्रहारमात्रेण स्पष्टोनस्मृत इति देवतानां भ्रांतिः इतरदेवताभिः परित्यक्ते तमिंद्रं मरुत एव नाजहुः न प
रित्यक्तवंतः । न हि स्नेहेन स्वापयः इति सुषुप्तिकाले पि वर्त्तमाना इत्यर्थः । स्वापिशब्दार्थमेव स्वयं दर्शयति । प्राणा वै
देह मध्ये वर्त्तमानाः प्राणा एव स्वापयो मरुतः स्वापकालानुवर्त्तिनो वायवः प्राणानां तत्कालानुवृत्तिमाथर्वणिकाः
प्रश्नोत्तराभ्यामामनंति । भो एतस्मिन्पुरुषे कानि स्वपंति कान्यस्मिन् जाग्रति इति प्रश्नः ॥ प्राणाग्नय एव तस्मिन्पुरके

१८ रेजाग्रनीसृत्नरं। एवंविधाः प्राणरूपाः मरुत एवेनमिन्द्रं तदानीं न परित्यक्तवन्तः। तस्मात्कारणादेष इन्द्र नेदीयइत्यादिकैः
स्वापिमान्प्रगाथोऽनूच्यते। मरुत्वतीयशस्त्रे सर्वथाप्यपरित्यक्तः शस्यते। स्वपिशब्दो यस्मिन्प्रगाथेऽस्ति सोऽयं स्वापिमान्।
आ स्वापे स्वापिभिरिति अयं पादः तस्मिन्प्रगाथे आम्नायते। तस्मादयं स्वापिमान्। नेदीयइन्निहवास्य प्रगाथे शस्य पु
नरपि प्रकारान्तरेण नमयन्त्सति। अपि च यद्धीदमेवानुष्टुभं छन्दः शस्यते तत्सर्वं मरुत्वतीयं श्वसेषेवेदमनु
स्वापिमान्प्रगाथः शस्यते आ स्वापे स्वापिभिरिति। अपि च अपि च अन एव तत्प्रगाथाद्... अस्मिन्मरुत्वतीयशस्त्रे
यदेवेदमवच्छन्दः शस्तो पदं क्षितो मन्त्रः शस्यते तत्सर्वं तदपि सर्वमन्त्रजातं मरुत्वतीयशस्त्रे भवति। एषवोऽदित्यादि
नानुष्टुप्युक्तिरुच्यते। आ स्वापे स्वापिभिरिति पादोपेतत्वेन स्वापिमानेष प्रगाथोऽयमतेभ्यश्च येदपरित्यक्तश्च तदामरुत्व
तीयं भवति स्वापिशब्दवाच्यानां मरुतां प्रतिपादकत्वादित्यर्थः। सोऽयं प्रगाथः शास्त्रोक्तो रुद्रस्वयं॥ ॥इति द्वादशा १८
ध्याये पंचमः खंडः॥ ॥अथास्मिन्मरुत्वतीयशस्त्रे प्रनूनं ब्रह्मणस्पतिरित्यादिकैः प्रगाथं विधत्ते। ब्राह्मणस्पत्यं
प्रगाथं शंसतीति द्वयोर्ऋचोः समूहः प्रगाथः तथा चाश्वलायन आह। प्रतिपदनुचराविन्द्रवाः प्रगाथाविति ऋगन्द्वय
मेवानुष्ठानकाले स्वरूपेण ग्रथ्यते तस्मादयं प्रगाथ इत्युच्यते विहितं ब्राह्मणस्पत्यं शंसति। बृहस्पतिपुरो
हिता वै देवा अजयन्स्वर्गं लोकं यस्मिंल्लोके जयन्ते तथैवैतद्यजमानो बृहस्पतिपुरोहित एव जयति स्वर्गे लोकेऽस्मि
न्स्मिंल्लोके जयते इति। योऽयं प्रगाथो ब्राह्मणस्पतिराम्नातः सोऽयं बृहस्पतिस्तस्य ब्राह्मणजातिस्वामिकत्वात्। स
च बृहस्पतिपुरोहितो येषां देवानां ते बृहस्पतिपुरोहिताः। तथा च श्रुत्यन्तरे समाम्नातः। बृहस्पतिर्देवानां पुरो

हितआसीदिति॥पोरोहि सस्मिद्ध्यर्थमेव चतुर्विंशातिरात्रनामकं सत्रमन्वतिष्ठन्॥तदपि श्रूयते तर एवाम्नातं॥ बृहस्पतिरका
मयत यन्मे देवा दधीरन् श्राद्धेय पुरोधामिति स एतं चतुर्विंशातिरात्रमपश्यदिति॥तादृशाद्बृहस्पतिपुरोहितादेवा
ननघ्नगाथेन स्वर्गलोकं जिग्यांसन्तो अपि जय्यं प्राप्ताः तथैव तत्पाठेन यजमानोऽपि बृहस्पतिपुरोहित एव बृहस्पतेः सायु
ज्यं गत एव लोकद्वयं जयति॥ अत्र केचिद्बाधमुद्भावयन्ति॥ ते वा एते प्रगाथा वस्तुतो संतो पुनरादायशास्येते नह्य
कुर्यान किंचनास्तुतं सस्पुनरादायं शास्यते तथ कस्मादेतौ प्रगाथावस्तुतो संतौ पुनरादायं शास्येते इति॥ तस्मिन्नाम्नाते दे
व्यो अप्यथ्येनेनोच्यते [illegible] यास्यं पद्यते॥ अयमर्थन प्रकार उच्यते। अन्येनं ब्रह्मणस्पतिरिति येषा बृहस्पती छन्दस्का द्वादशा
क्षरेण तृतीय पादेनाष्टाक्षरेण्यान्ये पूर्वेण या पंक्तिर्द्वादशाक्षर संपन्ने सेयमृक् पठनीया पुनरपि पुनरपि तत्र समष्टाक्ष
रश्चतुर्थः पादः द्विराम्नाय षोडशाक्षरोर्ध्वयोः संपादनीयाः। उत्तरस्यामृचि प्रथमपादो द्वादशाक्षरः। द्वितीयपादो
ऽष्टाक्षर एते सर्वमिति किंवा द्वितीया बृहती संपद्यते। तत्रस्य मंतिम अष्टाक्षरं पादं द्विरभ्यस्य समाम्नाते उत्तरार्धे द्वादशा
क्षरं प्रथमं पादं अष्टाक्षरं उत्तरं पादं च पठित्वा तृतीया बृहती संपादनीया अयमेव ग्रथन प्रकारः इंद्रनेदीय इत्यस्मि
न्नपि प्रगाथे योजनीयः। तावेतौ प्रगाथौ पुनरादाय पुनः पुनः पठितमेव पादमादायादाय शास्येते सामगैस्तु माध्यंदिने
पवमाने प्रगाथावेतौ नस्तुतौ नेरस्मानयोर्होत्रा शंसनम् युक्तं न ह्यन्यत्र क्वचिदपि सामगैरस्तुतमेव जातु पुनः पुनरा
दाय शास्यमानं न दृष्टं एवं सति कस्मात् कारणात् अस्तुतयोरनयोः शंसनमिति चोद्यवादिन आहुः एतयोर्ध्वमेवस्तायप
परिहारस्तु हैव वाधीनरस्तु भावयति॥ पवमानोक्थं वा एतद्यन्मरुत्वतीय षड्ढ्युवा अत्र गाय

३।० भा० २

१६

त्रीषु रूक्चनेषट्सु बृहतीषु त्रिष्टुप्सु सवा एष त्रिच्छंदाः पंचदशो माध्यंदिनः पवमान इत्याम्नातादुः कथं
त एष त्रिच्छंदाः पंचदशो माध्यंदिनः पवमानोनुरूपः स्तोत्रं भवतीति ॥ मरुत्वतीयशास्त्रं यदस्ति तदेतत् पवमानोस्ति मा
ध्यंदिनपवमानस्य विधिशास्त्रं अत्र माध्यंदिने पवमानस्तोत्रे उच्चाते जाते मित्यादिषु षट्सु गायत्रीषु प्रथमं रूक्चने
नः पुनानः सोमेतिषु षट्सु बृहतीषु स्तवनेय चाथ यमेकं प्रगाथं तथापि त्रिष्टुब्विनया येन प्रथमं तिस्रो बृहत्यः स
पादनीयाः तासु यदौरवं साम सूक्तं प्रगातव्यं ततउपरि या याज्ञयसाम गातव्यं एवं सतिति स्तोत्रं बृहत्यः सामद्व
यार्थाद्विरावर्त्यमानाः षट्संपद्यंते । तथा इन्द्र स्यादिषु तिसृषु त्रिष्टुप्सु स्तवनेनैवं सति स एव माध्यंदिन एव मा
ध्यंदिने पवमानस्त्रिच्छंदास्तुवति ता यत्री बृहती त्रिष्टुब्रूपाणी त्रयाणां छंदसां संघावान् तथा स पवमानः पंचदशा
स्तोमोपेतः तस्य च स्तोमस्य प्रकारः छंदोगब्राह्मणे वाम्नायते पंचभ्यो हिंकरोति स तिसृभिः स एकया स एकया १९
पंचभ्यो हिंकरोति स एकया स तिसृभिः स एकया पंचभ्यो हिंकरोति स एकया स एकया स तिसृभिरिति । अस्याय म
र्थः । तत्र चात्मकमेकं सूक्तं त्रिरावर्तनीयं । तत्र प्रथमावृत्तौ प्रथमाया वस्तव्यत्रिरभ्यासः द्वितीयावृत्तौ मध्यमायाः
तृतीयावृत्तौ उत्तमायाः सोयमावृत्तिभिः पंचदशभिः ऋग्भिः रूपेतत्वात् पंचदशस्तोम इति एवं सप्तत्वं चो घवा
दिनआदुः हेतोनस्तवयेषपवमानः सयथोक्तलक्षणः कथं मरुत्वतीयशास्त्रेणानुरूपः स्तोत्रं भवति । अनुरूपं स
वन्याख्या यथा वायं स्तोत्रमेव शास्त्रं इति न्यायात् ॥ अतो त्र स्तोत्रशास्त्रयोर्वैलक्षण्यमसुक्तमिति चोद्यं । तत्रास्य द्वितीयं
स्यतावदुत्तरं दर्शयति ॥ येएवगायत्र्या उत्तरे प्रतिपदो यो गायत्र्यनुचरस्ताभिरेवास्य गोप त्र्यो नुरूपाः स्तोत्रं भवन्ति

यो यस्य०

पवमान मा
ध्यंदिन

भ्यामेवास्य प्रगाथाभ्यां बृहत्सोऽनुष्टुप्स्तासु वर्तनीति। आचारः प्रथमस्येन तस्मिन्मरुत्वतीयस्य शस्त्रस्य प्रतिपत्तृचे प्रथमानुष्टु
प्सु पूर्ययोर्वाऽत्रे प्रतिपदः प्रतिपद्यते पदे ऋचो गायत्र्यो विद्यन्ते। यच्चान्य इदं वसो सुतमन्ध इत्यनुचरो रूप्य स्तृचो गायत्रः। ना
ऽनिरेव पंचविंशो यत्तत्र स्यात् होतुः पवमानस्तोत्रगतगायत्र्योऽनुष्टुप्स्तासु वर्तते। इन्द्र नेदीय एदिहीत्ययमितनिहु
नं वः प्रगाथः स्वप्नत्रे ब्राह्मणस्याप्ति इति ब्राह्मणस्य सप्रगाथः एताभ्यामनुष्टुभ्यां पवमानस्तोत्रगताः बृहत्सोऽनुष्टुप्स्ता
सु वर्तते। प्रग्रथनेन बृहती संपादनस्योभय व समानत्वानुष्टुभ्यामनुष्टुप्सनं नतु परिष्टाद् विधास्यते। अथ प्रस
गस्य प्रथमवो घस्य परिहारं दर्शयति पुनः पुनराहानस्याप्यनुष्टुप्सनं दर्शयति। ताः सुवाय एतासु बृहतीषु सामगाः स्वकी
यैरवयोधाजयायां पुनरादायं स्तुवन्ति तस्मादेनो प्रगाथावक्तनो सन्तो पुनरादायं शस्येनेतच्छस्त्रेण स्तोत्रमन्वेनी
ति। पुनः पुनः सोमे तस्मिन् प्रगाथे या बृहत्यः प्रग्रथनेन संपादिताः ताः स्वेनाप्यनुष्टुबन्तीषु शैरवा स्वे नयौधाजया
स्वेन च पुनः पुनः पठितमेव पादमादाय स्तुवन्ति तस्मादेना विद्वान् हवब्राह्मणस्य स प्रगाथो सामगैरस्तुतनावपि
सं तो होत्रा पुनः पुनः पठितमेव पादमादायादाय शस्यतेनेतथा वसस्य यं होता स्वकीयेन शस्त्रेण स्तोत्रमनुगच्छति
इदानीं त्रिष्टुभामनुष्टुप्सनं दर्शयति। ये एव त्रिष्टुभो धाय्याश्चत्वारः स्तुभो निविद्धानं तासामेवास्य त्रिष्टुभामनुष्टुप्स्तासु वर्तनी
ति। यथाः समिधेनीषु प्रक्षेपणीया धानीर्ऋचो धाय्या इति संज्ञा एवमत्रापि तथा सत्यग्निर्नेता भुगइवक्षितीनामेकाधाय्या
र्वं सोम ऋतुभिरि सुपरा ये एव त्रिष्टुभ्पृष्ठे इत्यके धाय्या विधेते यच्च विद्युत्पृष्ठे दृश्ये जनि दावय इत्यादिकं निविद्धानत्र
के निविद्यदानिधीयते निक्षिप्यते यस्मिन्सूक्ते तन्निविद्धानं तासु रेवस्त्र को गजाभिर्धाय्यासहिता शिस्त्रिष्टुभुरस्य होतु

२०

भा० २
आ० ३

स्तोत्रगतास्त्रिष्टुभोनुष्टुभस्स्तोत्रं भवंति॥ उक्थवेदनं प्रशंसति॥ एवमुक्तस्य षत्रिंछंदाः पंचदशो माध्यंदिनः पवमानोनु
ष्टुभो भवंतियएवं वेदेति॥ ॥इति द्वादशाध्यायस्य षष्ठः खंडः॥ ॥मरुत्वतीयेशस्त्रे प्रक्षेपणीया ऋचो विधत्ते॥ धाय्याः शं
सतीति॥ अग्निर्नेता त्वं सोम क्रतुभिरिति द्वितीया पिन्वंत्यपइति तृतीया तासां सेवनता सांप्रशंसा माह॥ धाय्या
भिर्वैप्रजापतिरिमांल्लोकानधयद्यं यं काममकामयतेति॥ पुराप्रजापतिर्यल्लोकं कामितवानुतानिमांल्लोकानुक्ता
भिर्धाय्याभिरधयत् अपिबत् लोकस्वाद्धनजल पादवेदनायासति धमस्तोत्र॥ यजमानस्यतद्वेदनं प्रशंसति॥ तथैवैत
द्यजमानो धाय्याभिरेवमांल्लोकान्धयति यं यं काम कामयते यएवं वेद यद्वेव धाय्याः इति॥ याएवोक्ता धाय्याः संति ता
भिर्वेदितायजमानः कामितं लोकं धयति॥ अत्रधयत्याभिरिति धायाशब्दनिर्वचनमर्थोद्दृत्रीर्ति॥ प्रकारांतरेण
प्रशंसामाह॥ यद्वयत्रवै देवा यज्ञस्यछिद्रं निरजानंस्तद्धायाभिरपिदधुः तद्धाय्यानां धाय्यात्वमिति॥ यज्ञसंबंधिनि २०
यस्मिन्प्रदेशे छिद्रं वै कल्पं देवा निर्ज्ञातवंतः॥ तच्छिद्रं धाय्याभिरेताभिरपिदधुराच्छादितवंतस्तस्मादाद धत्याभि
न रितिव्युत्पत्त्या धाय्यात्वं संपन्नं॥ वेदनं प्रशंसति॥ अच्छिद्रेणहास्य यज्ञेनेष्टं भवति यएवं वेद यद्वेव धाय्या इति॥ यद्वेवे
त्यत्र योयमुकारस्तुसोयमपूर्वेण फलेसमुच्चयार्थः॥ नकेवलं पूर्वफलं किंचिदमपीत्यर्थः॥ अत्र पूर्वश्रुतिः प्रशंसाद्योत
नार्था॥ पुनरप्रकारांतरेण प्रशंसति॥ स्थूमहैतद्यज्ञस्य यद्धाय्यास्तत्र्यथांद्ये सूच्यावासः संदधीतीयादेवमेवै
ताभिर्यज्ञस्यछिद्रंसंदधजेतियएवं वेदयद्वेव धाय्याः॥ २॥ तान्युवाए तान्युपसदामेवोक्थानि यद्धाय्या अग्निर्नेतेति
याग्नेयीप्रथमोपसत्तस्या एतदुक्थंत्वं सोमक्रतुभिरिति सौम्या द्वितीयोपसत्तस्या एतदुक्थं पिन्वंत्यपइति

वैष्णवीन्तीयोपसत्रस्याः एतदुक्थमिति। उपसदामर्थवादश्चाग्निमनीकं सोमस्रार्य्यं विष्णुं तेजनमिति त्रस्तुःस्यागिदेवताका
स्तिस्त्र उपसदः समाम्नाताः अत्राप्यग्निनेनिस्यादयस्तद्देवताका एवधाय्याः श्रुताः एकैकाधाय्या एकैकस्या उपसदः शास्त्र
उक्ताय वेदनेन स्तूर्वकृशसनं नशंसति। यावैनं देवे सोम्यनाध्वरेण स्तुको एकैज यतिन मनः एकैक योपसदा जयति य
एवं वेद यश्चैवं विद्वान्धाय्याः शंसतीति। वेदिना शंसितात्वेकैकधाय्या रूपोपसदामस्त्र सोमयागफलं प्राप्नोति। उ
पसत्सं बोधिशस्त्रे तेनाभिहितेचोपचारः। अत्र के चिच्छूर्वपक्षमुपन्यस्यति। तेह्येक आहुः त्वान्वो महइतिशंसेदेतो वाव
वयं भुरेतेषु शस्यमाना मभियज्यमानीमहइति। तद्धत्वैवं तृतीयधाय्याविषये केचिदेवमाहुः। तान्वो महो मरुत इह सेता
वैष्णवीनत्तीयाधाय्यां शंसेत्। न तु पिन्वं सपइ सेतां तत्रोपपत्तिं चैवमाहुः विष्णुर्ति फलमिति रोयज्ञातं भरतितच्चैनीति
व्यीनं भरता अस्ति जः तेषु पूर्वकाले श्रुता नो महइ सेतामेव शस्यमाना वयमभिव्यज्जानीमहइति स्वा उभवति इतरेषामग्ने व
दनात्तत्पूर्वपक्षं आह मनिराचष्टे। नैतन्नादृत्यमिति। तद्विषयं तन्मतं नादरणीयं विपक्षे बाधकं दर्शयति। यदेतौ
सदाभ्वरः पर्जन्यो वर्ष्टेति। यदिहोतानान्वो मह इ सेताम्त्वं शंसेत्तूनं हानीमर्यं पर्जन्यो स्वकाले स्वकाले वर्षरीश्वरः स्व
वर्षराहिं सकर्तुं समर्थो भवति वृष्टिर्न भवेत्। वृष्ट्यनुरूपाणी पदानां तस्याम ऋच्यभावादित्यर्थः। सिद्धान्तं दर्शयति। पि
दि न्वस्यपइत्येव शंसेत्। इयमेवधाय्या न तु तान्वो मह इत्यादिका अत्रविहिता या मरुत्वत्यनुकूलपदसद्भावं द
र्शयति। वृष्टिवनिपदं मरुतइनिमाकन्नेम स त्नमिहेति विनयं नीति विनीतवघ द्धिनीतवत्रादिकानवमेदृष्ठवं वाजि
नमितीन्द्रो येवा अग्नीतस्यावा एतस्यांवत्वा नियदानि वृष्टिवनि माकृतं वैष्ठवमेतेऽमिति। अत्रापि चैनीनिपदं श्रयते

ऋ०२

२१ तःसेवनार्थे। पि वि स्ववने इत्यस्माद्धातोः सम्भावात्। अत इदं पदं ऋष्टिं वनि ऋष्टि संभजनकारी सूर्यः। पिन्वं स्वपाम तनद इत्य
चमकृत इति पदं मारुतं मरुतां वा सर्वं पदं तदपि ऋष्टिं तु कुर्वं कुतो वातस्य ऋष्टिं अंगवान्। जयं नमिदं विन यति वाजिनमिति। तृ
तीयपादे विनीतव स्वदमस्ति विन यंती समस्यनयति धातुर्जन्यवान्। नेन च विनयेन ऋष्टिं पतनं लक्ष्यते। किंच यद्विनी
पदं तद्विक्रांतव दिस्व नु मर्थमाचष्टे। तान्नामने कार्थत्वात्। तथा सति यद्विक्रांतवत्सदं तद्विछ्वं विष्णुसंबंधाइदं वि
ष्णुर्विचक्रम इति श्रूयते तत्र। तथा सति वेलव्याप्तृतीयस्याप्युपसदः संबंध न स्पृश्यवतीत्यर्थः। तस्मिन्नेव तृतीयपादे
वाजिनमिति पदं विधत्ते तत्र इंद्रो वाजि शब्दस्यार्थः। वृष्टिद्वारेणान्न प्रदत्वेन वाजोन्नमस्यास्तीति निर्वचनं। वाक्यस्यानु
उक्तेन प्रकारेण तस्यामेव तस्यां पिन्वं स पद सुविचत्यादि पदानि ऋष्टिं तु कृत्यानि ऋष्टिवनि मारुतं वेस्त्र वं इंद्रं चेति २१
तस्मादत्र पूर्वोक्त दोषो नास्तीत्यर्थः। पुनरप्येतामर्थं प्रकारांतरेण द्रढयति। सावाएषा ति तृतीयसवनभाजान्नाम ध्यं दि
नेत्रास्य तत्तस्माद्धेदं भुरतां नोपयावः सायं गोष्ठाः संतो मध्यंदिने संगविनीमायंति सा जगती जागताद्धि पशवः ओ
ष्मायजमानस्य मध्यंदिनस्त घजमाने पशून्दधातीति। ये यं पिन्वस्यपद इति ऋक्त्रिष्टुप् सैव तृतीयभाजनाजगती छं
दस्कत्वात् जागतस्य तृतीयसवनस्य याज्यात्वाद्धीयमानेत्री होत्रा मध्यंदिने त्रास्य तेन तस्मादेव कारणात् इदं लोके दृश्यते।
सायंकाले गोष्ठं प्रत्युपयावस्थिष्ठंतिने सायं गोष्ठाः भुरतां नांकविजांपयावृत्ता द्वाः संतो मध्यंदिने संगविनीयास्मुकाव
कांड को भ्यां शाखायामायंति। तानुवर्तियं अयमर्थः। ये पशवः क्षीरं दुहंति ते सायं गृहं समागच्छंति। ये न दुहंति ते सा

सायंसवन एव निवसंति ॥ उष्णं यविष्ठोपि तेन मध्याह्नकाले घर्मकालीनसंतापनिवारणाय निर्मितौ संगवकाले योग्यौ
रात्रामाणं तिष्ठति तेन मध्याह्ने पाठनिमित्तमिति ॥ किं च सो सा इत्यौ कौ परां जगती छंदस्कापद्यावस्थ जगतीछंदस्कासा
सह पद्यापते मध्यंदिने नु स्म तावृतु जागताः मध्यंदिनकालश्च यजमानस्यास्मात् तथा सति तस्मिन्काले जगतीपाठेन य
जमानेप शून्यवपादयति ॥ ॥ इति द्वादशाध्याये सप्तमः खंडः ॥ ॥ अथ यज्ञगाथांतरं विधत्ते ॥ मरुत्वतीयं प्रगाथं शंसति प
शवो वै मरुतः पशवः प्रगाथः पशूनामवरुध्या इति ॥ यस्मिन्प्रगाथे मरुतः श्रूयंते सोयं मरुत्वतीयः प्रवइंद्राय बृहते मरु
तो ब्रह्मार्चतेत्यत्र मरुतः श्रूयंते तेन मिमेंद्रांसेनू पश्नवी प्रावरणशहि स्यपिजरेण्य संचारकाले वायवो नुप्रयन बाधंते ॥
तत्सर्वं धाम्मस्वतो पशुत्वं प्रगाथस्य पशुप्राप्तिसाधनत्वात् पशुलंभतः स प्रगाथः पशुप्राप्त्यै भवति ॥ अथ निविद्धानीयं
सूक्तं विधत्ते ॥ जनिष्ठा उग्रः सहसे तुरायेति सूक्तं शंसति न वा एते यजमानं जनयंति ये यजमानं देवा एतेन यज्ञा
देवयोन्यै प्रजनयंतीति ॥ न वा एते रेजनिष्ठा उग्र इत्यादिकं सूक्तं यजमानं जननमेवक्वथमिति तदुच्यते ॥ जेन सूक्तेन देव ॥ यज्ञा
ना दनुष्ठीयमा देवयोन्ये देवलोकस्थानाय प्रजनयंति ॥ तस्माद्यजमानजननत्वादनेन रूपेण प्रशस्य पुनः प्रकारांतरेण सूक्तं प्र
शंसति ॥ तत्संजयं भवति संवृजयति विवृजयत इति ॥ यस्मादेतेन सूक्तेन महस्सापि प्रत्रेनु यजमानो जयति विवृज्यापि
जयते तस्मात्सूक्तं संजयं सम्यक्ज्ञीनो जयो येन सूक्तेनेति समासः ॥ पुनरपि प्रकारांतरेण प्रशंसति ॥ एतद्वै गौरिवी
तिर्वै ज्ञात्सोनेदिष्ठं स्वर्गस्य लोकस्याशङ्कत सएतत्सूक्तमपश्यत्तेन स्वर्गलोकमजयत्तथैवैतद्यजमान एतेन सूक्ते
न स्वर्गं लोकं जयतीति ॥ शक्तिनामकस्य महर्षेः कुले जातः शाक्त्यः गौरिवीतिनामा महर्षिः स तु स्वर्गस्य समीपं गमी

प

२२

प्रवेष्टुमशक्तः तत्साधनत्वेनैतत्सूक्ते दृष्टानेन स्वर्गं प्राप्नोति तस्मादेतत्सूक्तं महर्षिनाम्ना गोशब्देन निरुच्यते। यथा महर्षि
स्तथा यजमानोप्येतत्सूक्तेन स्वर्गं प्राप्नोति। तस्मिन्सूक्ते निविद्धं पस्य स्थानं विधत्ते। तस्याहः शस्त्रप्रस्तुतिः परिशिष्य मध्ये
निविदं दध्यात्स्वर्गस्य हैतल्लोकस्य रोहो यन्निविदिति। तस्य सूक्तस्य संबंधिनी ऋक्षु त्रागद्द्वयं शस्तावद्द्वयोर्भागयोर्मध्ये इत्ये
तत्। ता निस्येनाविराजिपदे स्वदेवतानिविदं प्रक्षिपेत्। न त्वस्मिन्नेकादशार्चे सूक्ते समो भागो न संभवतीति चेन्नूनं हि त्र
यम भागका विद्धधिको भाग स्यानन्तर्धं प्रक्षिपेत्। एकादश्यस्या शस्त्रे सूक्तवान्। निविदं प्रशंसति॥ स्वर्गस्य हैषलोकस्य
रोहो यन्निविदिति। आरोहणहेतुरित्यर्थः। तत्र स्वरस्त्रोपविधत्ते। स्वर्गस्य हैतल्लोकस्याक्रमणं यन्निविन्नामाक्रममाण
इव शंसेदुपैव यजमानं निगृह्णाति यो स्य प्रियः स्यादिति तु स्वर्गकामस्येति। यानि विदस्ति नदेतत्स्वर्गस्याक्रमणं सो
पानस्थानीयं। तस्माद्यथा लोके सोपानारोहणक्रमेण पुनः पुनः अभ्यासं करोति तद्वदनुक्रमकारेण स्वरं शनैस्तत एव पठे
त्। एवं पाठे सत्यस्य यजमानस्य यः पुमान्प्रियः स्यात् स पुमानेनं यजमानमुपेक्ष समीप एव निगृह्णाति स्वीकुर्यादिति तु एष
पक्षप्रयोगः स्वर्गकामस्यावगंतव्यः। वक्ष्यमाणप्रयोगेण सांकर्यपरिहाराय स्वर्गकामस्येत्युक्तिः। प्रयोगांतरं विधत्ते।
अथाभिचरतो यः कामयेत क्षत्रेण विशं हन्यामिति त्रिशस्तामिति निविदा सूक्तं विशं सेत्। क्षत्रं वै निविद् विट्सूक्तं क्षत्रेणैव
तद्विशं हंतीति। क्षत्रियजात्या वैश्यजातिवधं कामयमानो निविदा सूक्तं विविशं शंसेत् एतदुक्तं भवति। सूक्तस्यादौ मध्ये
चांते च निविदं दध्यात् तदिदं सूक्तं विच्छेदपूर्वकं शंसनमिति निविदः क्षत्रियजातित्वं सूक्तस्य वैश्यजातित्वं च पूर्ववदेवा
म्नातं अनेन शंसनेन क्षत्रियजात्या वैश्यजातिर्हतिः सोपमेकोभिचारप्रकारः। अथैतद्विपर्ययेणाभिचारं विधत्ते। २२

यः कामयेत विशा क्षत्रं हन्यामिति त्रिस्तर्हि सूक्ते निविदं विग्रासेत् क्षत्रं वै निविद् विट् सूक्तं विशैव क्षत्रं हन्तीति । निविसा
द्यानामादौ मध्ये चैव निवत्सूक्ते पठेनूत दैतत्त्रि विट्सूक्ते ककुप्तूं सर्वं प्रकारान्तरेणापि चारं विधत्ते । यउ कामयेतोभयत एनं वि
शः पर्यवच्छिनदानी सूक्तमुख्यतस्तर्हि निविदं ध्यायेदुभयत एवैनं तद्विशः पर्यवच्छिनत्तीति । यउभयस्तद्धोता एनमुभयत
पूर्वापरभागयोः विशः सेवधिनीः प्रजाः पर्यवच्छिनदानि परितो विच्छिन्नाः करवाणीति कामयेत स्वस्मात् सर्वे आ विन्नापित्रा पि
तृव्यमनुकादयो याः प्रजास्तासां सर्वासामवच्छेदं करवाणी स्यर्थः । पदवाउभयतो मातृपक्षे च पितृपक्षे च विधमानानां प्रजा
नामवच्छेदकं विरोधं करवाणीत्येवं यो होता यजमानो द्वेष्टि स होता निविदं मुखतः निविदमादावन्ते च व्याहृयीत विवि
धमाहादावन्ते चेति । आदावपि द्वे सावोमित्याहाव मध्ये पठेत् । अन्तेपि तथा पठेदित्यर्थः । तथा सति यजमाने पूर्वापरभा
गयोः मातृपक्षपितृपक्षयोश्च प्रजाभिः संस्थावच्छिनत्ति । उक्तविधीनामासौ कर्याय व्यवस्थया नियमयति । इतिच्चिकि
रतदितरथा त्वेवः स्वर्गस्य कामस्येति । इत्यतिनुयः कामयेत श्रेयसा ... प्रकाराभिश्चरतो दृष्टमः । इतरथा त्वेव प्रकारान्तुष्टु
बाहितः सूक्तमध्ये निविदं प्रक्षेपरूपं सोपानाना रूपं सदृशं स्वरोपेतं स्वर्गकामस्येदृष्टव्यं । अतिमयास्सूक्तोगतं यथो समाप्ति
विधत्ते । वयः सुपर्णा उपसेदुरिन्द्रमिति सूक्तमपि पदध्यानीति । वयते र्गनो गस्य रथी ... वय इति रूपं गमनकुशलाकीदृश्य थि
अपत एव सुपर्णाः पक्षिसदृशाः के चिन्नृइन्द्रं स्वर्गवासिनमुपसेदुः प्राप्तवन्तः । इतिनस्य पादस्यार्थः । द्वितीयपादं सुवाया भि
प्रायेण पठति । प्रियमेधा ऋषयो नाधमाना इति । अथ पदार्थ धारणा शक्तिर्मेधा प्रिया येषामृषीणां ते प्रियमेधाः ते ऋष
यो नीदृ यद्गुप्तारः नाथमाना किंसिंवत्कायं याचमाना । इन्द्रमुपसेदुरिति पूर्वेणान्वयः । तृतीयपादस्य पूर्व भाग म

पादमनुव्याचष्टे॥ अपश्चान्तमृणेनेति येन तमसा प्राप्तो नामन्येन तन्मनसा गच्छेद पदे वास्मान्न लुप्यते इति॥ दे
ईडघोत नमः अपाणु दिअ प सारय पुनरिमे द ग्रागो पठितस्तनितमो लुप्यते दातायेन तमसा प्राप्तेन आच्छादि
तोहमिति मन्यते तेन तमो मनसा गतो ध्यायेत् तमो दिवकु विर्ध दृष्टि विरोधकमर्कमोहरूपं द्वितीयं पापरूपं तृतीयं
तेषां मध्ये येन स्वस्य बाधा तत्तमस्तत्र पाठकाले विनष्टमिति ध्यायेत् तथा सति तत्तमोऽस्मान्मुरूपादिनश्य
त्येवा तस्य पादस्योत्तरभागे किंचिदनुष्ठानं विधत्ते। इदमिव श्रद्धमिति चक्षुषी मरीमृज्यते हस्ते इव धक्षः इदमिव द
ष्टिप्रत्यय एतं भागं पठन् स्वकीयेन हस्तेन चक्षुषी तं मरीमृज्येत पुनःपुनर्मार्जनं शोधनं कुर्यात्। वेदनं प्रशंसति
आजरसं ह चक्षुष्मान्भवति य एवं वेदेति। आजरसं जरासमाप्तिपर्यन्तो। चतुर्थं पादमनुव्याचष्टे॥ मुमुग्ध्या २३
स्मानि धयेव बद्धानिति पाशा वै निधा मुमुग्ध्यस्मान्पाशादिव बद्धानिस्य वत्तदाहेति॥ हे इन्द्र निधयेव पाशेने
व तमसा बद्धानस्मान्मुमुग्धि मोचय अस्मिन्पादे निधाशब्देन पाशाभिधानं हेतवो रज्जवो विवक्षिताः। अतो
निधयेव बद्धानित्यस्य पाशादिव बद्धानीत्यर्थो भवति॥ ॥इति द्वादशाध्याये प्रथमः खण्डः॥ ॥अथ मरुत्वतीय प्र
स्तावे तृतीये पठनीयो याज्यां च प्रशंसितुमुपाख्यानमाह। इन्द्रो वै वृत्रं हनिष्यन्सर्वा देवता अब्रवीदनु मोप ति
ष्ठध्वमुपमाह्वयध्वमिति तथेति तं हनिष्यन्त आद्रवन्सोऽवेन्मां वै हनिष्यन्त आद्रवन्ति हन्त मा भीषया इति तान
भिप्राश्वसीत्तस्य श्वसथादीषमाणा विश्वेदेवा अद्रवन्मरुतो हैनं नाजहुः प्रहर भगवो जहि वीरयस्वेत्येवैनं

नमेत्तां वाचं वदंत उपातिष्ठंतेति ॥ पुराकदाचिदिंद्रो वृत्रं हंतुमुद्यतः सर्वा अन्या देवताः इत्येवमब्रवीत् ॥ अनुमोपतिष्ठ
ध्वं आनुकूल्येन मां सेवध्वं उपमाह्वयध्वं वृत्रवधे प्रवृत्तं मां उपह्वयध्वं अनुजानीध्वमिति । ततोंगीकृत्य सर्वे देवास्तं
वृत्रं हंतुमुद्यताः आगच्छन् तदा स वृत्रो मां हंतुमुद्यता आद्रवंतीत्यवैत् सम्यगज्ञासीत् तत इदं विचारयामास । हं
त सम्यक्कृतं इतः देवविचारणोपायस्य प्रतिज्ञानं वान् इमान् देवान्भीषये अहं भीतान्करवाणीति विचार्य तान्देवानभि
लक्ष्य प्राश्वसीत् । उच्छ्वासमकरोत् तस्य वृत्रस्य श्वसथात् श्वासादीषमाणा बिभ्यतः सर्वे देवाः पलायनमकुर्वन् ।
वृत्रोदितस्य उज्झ्मानं तनं प्रतिदिनं सर्वासु दिक्षु स्वरपातमात्रं देशं प्राप्य हद्धिगतवान् तथा चान्यत्र श्रूयते । स इषुमा
त्रमिषुमात्रं विष्वङ् वर्धते स इमांल्लोकानवृणोत् यदिमांल्लोकानवृणोत्तद्वृत्रस्य वृत्रत्वमि
ति तादृशस्य क्रोधशरीरस्य उच्छ्वासप्रलयकालीनवायुसमानः अनेनादीयाकारेण देवाः परमाणवत् दूरे सम
स्ताः तदानीं मरुत एवैनं इंद्रं नाजहुः न परित्यक्तवंतः । हे इंद्र भगवन् वृत्रं वज्रेण प्रहरनेन प्रहारेण जहि मारय स
न्तृ वीर्यस्य स्वकीयं वीर्यं प्रकट यद्वसनेनैव प्रकारेण एनं इंद्रं प्रति एतां वाचं वदंतो मरुतस्तमिंद्रमसेवंत ॥ उक्त
मर्थं मंत्रसंवादेन ऋष्यपि दर्शयति ऋषिः पश्यन्नभ्यनूवाच वृत्रस्य श्वासथादीषमाणा विश्वे देवा अजहुर्ये सखा
यः ॥ मरुद्भिरिंद्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासीति । कश्चिदृषिर्दिव्यज्ञानेन तदिदं देवपलायनं पश्य
न् वृत्रस्य श्वासादीमं त्रेण प्रकटीचकार हे इंद्र तव सखायो विश्वेदेवा ये संति ते सर्वे वृत्रस्य श्वासात्सूज्ञायमाना
त्वां परित्यक्तवंतः तस्मादिदानीं तव मरुद्भिः सह सख्यमस्तु अथानंतरमिमां वृत्रसंबंधिनीः सर्वाः सेनाजय

स्मीति। अथ मरुतामिन्द्रकृतमुपकारं दर्शयति॥ सो ऽब्रवीदिमे वै किल मे सचिवा इमे मा कामयन्त इति तेमानस्मिंस्तु
क्थ आभजा इति नानेन तस्मिन्नुक्थ आभजा इति नानेन तस्मिन्नुक्थ आभजद् अथ हैतेनर्ह्यपि केवलनिष्केवल्ये उक्थ आ
भजन्निति। स इन्द्रः स्वमनस्येवं विचार्य वितर्कयामिति तद्यत इमे वै किल पुरतो वर्त्तमाना मरुतः। एवं मेमम सचि
वाः सहायाः यस्मादिदं मे मरुतो मा कामयन्त मामपेक्षितवन्तो न तु मां परित्यज्य गताः तस्मादेते सचिवा मे
इतः सम्यगेभिः सह इत्येवानस्मिन्नेतत्त्वनामतामरुतो ऽस्मिन्नुक्थे माध्यंदिने सवने गतशस्त्रे आभजैव भागिनः क
रवाणीति मनस्येवं विचार्य तदेव वाक्करोतु। अथानन्तरं तर्हि तदा ऽपश्यन्ति एते मरुतो ऽवश्यं शस्त्रभागिनो ऽप्युक्थवाचि
ति शेषः ततः पूर्वं तु माध्यंदिने निष्केवल्यनामके शस्त्रे केवलं इन्द्रदेवताकं ते स्तोत्रं आसन्। तुः ननु तत्र मरुतामेवे
ति आसीत् तस्मादिदानीं प्रवेशाः इन्द्रकृतोपकारः इन्द्रेण दत्तान् मरुतां भागान् दर्शयति॥ मरुत्वतीयं ग्रह
गृह्णाति मरुत्वतीयप्रगाथं शंसति मरुत्वतीयं सूक्तं शंसति मरुत्वतीयां निविदं दधाति मरुतामेवैतद्भागधेयमिति
मरुतो ऽस्य सखिनीतिनेः सहितो मरुत्वानिन्द्रो दीयंगृह्णमध्यपुं गृह्णाति होतारो प्रवर्ध इत्यर्थस्य इत्यादिकं मरुत्वती
यं प्रगाथं पञ्चं सर्वजनिष्ठा इत्यादिकं मरुत्वतीयं सूक्तं शंसति इन्द्रो मरुत्वानित्यादिकां मरुत्वतीयां निवि
दं सूक्ते प्रक्षिपति। सा सर्वा मरुतां भागाः। अथ शस्त्रयाज्याविधत्ते मरुत्वतीयमुक्थं शस्त्वा मरुत्वतीयया या
जतीयया भागेन देवताः प्रीणानीति॥ शस्त्रं शंसनादूर्ध्वं मरुत्वतीयदेवताकां शस्त्रयाज्यां पठेत् तेनैव स्वस्वभागे

मनति। कम्यदेवता स्तापयति। तां मरुत्वतीयां याज्यां दर्शयति। ये त्वाहिहत्ये मघवन्नवर्धन्ये शाम्बरे हरिवो ये गविष्टौ।
ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमं सगणो मरुद्भिरिति। हे मघवन्निन्द्र अहिहत्ये वृत्रवधे ये मरुतस्त्वामवर्धय
न्वर्धितवन्तः अहिशब्दो वृत्रवाची अहिमावधीत् वृत्रमिति विवरण विवचनात्। शाम्बरे कश्चिदसुरः तस्य वधो
शाम्बरं तस्मिन्ये मरुतस्त्वां वर्धितवन्त इत्यन्वयः गवामिष्टिरन्वेषणे वा गविष्टिः बलो नाम कश्चिदसुरो गुहा वा
सो इन्द्रो बलस्य बिलमपावृणोदिति श्रुतेः तदा तेन बलेन गावो पहृताः तासां गवामन्वेषणे इन्द्र सहितस्य मरुतः
न्तं वर्धितवन्तः देवा वै बलेगाः परिपश्यन्तीति श्रुतेः तदा तासां गवामन्वेषणे ये मरुतस्त्वामवर्धयन् तथा ये मरुतो नूनम
द्यापि विप्राः ऋत्विग्भूत्वा त्वामनुमदन्ति स्तोत्रैरनुदिनं हर्षयन्ति हे इन्द्र तैर्मरुद्भिः सहितस्त्वं सगणो भूत्वा सोमं पि
बेति याज्यामेतस्यार्थः। एतां याज्यां ब्राह्मसन्नि यत्र यत्र वै देवा व्यजयन्त यत्र यत्र वीर्यमकुर्वत तेन देवेन त्वा समनु वेदेन्द्रे
णान्तः सोमपीथान्करोति। नीति। यत्र यस्मिन्वृत्रवधादिके स इन्द्रः एभिर्मरुद्भिर्जयं प्राप्तः प्राप्य च यत्र यत्र
न्यस्मिन्नपि युद्धादौ वीर्यमिन्द्रो यमकरोत् तं देवैर्दत्तमिन्द्राय समनु वेद सम्यगनुक्रमेण विज्ञायैवेन्द्रेण सहै
व तान्मरुतः सोमपानसहितान्करोति॥ ॥इति द्वादशाध्यायेऽष्टमः खण्डः॥ ॥अथ निष्केवल्याख्यं शस्त्रं
वक्तव्यं। तस्य चार्थसंग्रहश्लोकः। स्तोत्रियश्चानुरूपश्च धाय्या प्रगाथिकं तथा। निविद्धानीय सूक्तं च निष्केव
ल्ये प्रकीर्तितमिति॥ ॥नेदर्थमादावुपाख्यानमाह। इन्द्रो वै वृत्रं हत्वा सर्वा विजितीर्विजित्याब्रवीत्प्रजापतिमह

मेतद्रसानियत्वमहं महानसानीति स प्रजापतिरब्रवीदथ कोऽहमिति यदेवैतदवोचथा इत्यब्रवीत्ततो वै को नाम प्रजा
पतिरभवत् को वै नाम प्रजापतिर्यन्महानिन्द्रोऽभवत्तन्महेन्द्रस्य महेन्द्रत्वमिति ॥ इन्द्रः पुरा वृत्रं हत्वा स वा विजनीयेत
मा भूमिर्विजित्य प्रजापतिमिदमब्रवीत् हे प्रजापते त्वमिदानीं यद्ददासि एतदहमितः परमासानि भवानि इति
इति विवक्षायां विशेषाकारेणोच्यते । अहं महानसानि सर्वेभ्योऽधिकः श्रेष्ठो भवानीति ततः प्रजापतिरिदमब्र
वीत् । महीयमहत्त्वे त्वया स्वीकृते स त्वं तर्हि को नाम भविष्यामीति तत इन्द्र इदमब्रवीत् । हे प्रजापते स्वात्मानमु
द्दिश्य यन्निवेदनेन क इति यदेवैतदवोचः तदेव त्वं भवेति । ततआरभ्य क इत्येतं नामवान् प्रजापतिरभवत् एतत्क श
ब्दवाच्यत्वं सर्वत्र प्रसिद्धं । अत एव श्रूयते नमः प्रजापतिः यज्ञे ब्राह्मणे एव मान्नायते ॥ कइदं कस्मा अदात् [illegible] २८
हु ॥ प्रजापतिर्वै कः प्रजापतये ददानीति । कशब्दस्य सुखवाचित्वात्तेन प्रजापतेर्व्यवहारस्सतिसुखी प्रजापति
रि स्वकेन भवतीति प्रजापतिगतमहत्त्वं [illegible] स्वीकृत्यैन्द्रोऽयस्मान्महानभवत्तस्मान्महेन्द्र नाम संपन्नः श्रूयते च तरेष्वेतदा
म्नातं ॥ इन्द्रो वृत्रमहन् तं देवा अब्रुवन् महान्वा अयमभूद्यो वृत्रमवधीदिति तन्महेन्द्रस्य महेन्द्रत्वमि ३
ति । अथैन्द्रस्य महत्त्वप्रयुक्तं संस्कारविशेषं दर्शयति । स महान्भूत्वा देवता अब्रवीदुद्धारं म उद्धरतेति
यथाप्येतर्हि श्रेष्ठः यो वै भवति यः श्रेष्ठतामश्नुते स महान्भवति तं देवा अब्रुवन् स्वयमेव ब्रूष्व यत्ते भविष्य
तीति स एतं माहेन्द्रं ग्रहमब्रूत माध्यन्दिने सवनानां निष्केवल्यमुक्थानां त्रिष्टुभं छन्दसां पृष्ठं सामानम्

स्मादुद्धारमुद्धरन्त्युद्धरस्मादुद्धारं हरतीति ॥ स ई॑ ॥ अकारेणमह यज्ञाप्यदेवता: १ येदमब्रवीत् ॥ दे॒वे
भ्यः उद्धारं उक्तेषु नितिन्त्रीकृत्स्यपः प्रजाविशेषस्तत्त्रियते सपद्यते सोयं सत्कारस्तु कोद्धारः तं स कोरस्तु भागीनेमद
श्रेष्ठ उद्धरनुपश्यकुर्वतेति ॥ यथेत्यादिनो लौकिकदृष्टांत उच्यते ॥ यो वै भवति यः पुमान्भवति ऐश्वर्यं प्राप्नोति ॥ यश्च
श्रेष्ठानां विद्याचारादिभिः पुरुषो विशिष्टः अयमस्मातेस्वप्राप्तैश्वर्यो विशिष्टश्च सर्वेषां मध्ये महान्भवति ॥ स तादृशः पुनरर्थाः
एतर्ह्यपि इदानीमपि यथा विशिष्टप्रजारूपं भागमिच्छति तथापूर्वमिन्द्रो पीत्यध्याहार: । नमुद्धारेणमिन्द्रं देवा इद
मब्रुवन् ॥ हे इन्द्र यत्त्रिविधं भविष्यतीति त्वयमेव ब्रूयादिति ततः स इन्द्रो यज्ञानां मध्ये एतमेद इन्द्र यह अब्रूत तथा स
वनानां मध्ये माध्यंदिनं सवनं शास्त्राणां मध्ये निष्केवल्यं शास्त्रं छन्दसां मध्ये त्रिष्टुभं साम्नां मध्ये पृष्ठस्तोत्रं निष्पा
दकं स्तृहृत्स्थंतरवैरूपादिकं ततो वै देवा अस्मा इन्द्रायेतमुद्धारं मा हृत्य यदादिकं यज्ञादुद्धरन् तदेतच्छान्दवीन्तरे
प्याम्नाते ॥ स एतं महोहृतमुद्धारमुदहरन्नेव यस्त्वाय्यासु देवतास्वधियन्मा इन्द्रो गच्छते उद्धारमेव मेयजमान
प्रजास्त्वधात्ति विदन् ब्रह्मौ सजि ॥ उद्धारं हरति य एवं वेदेति ॥ उद्धारभागं तदेवताद्देवानां तस्मिन्नुद्धारे स्वापेक्षि
तभागप्रार्थनां दर्शयति ॥ ते देवा अब्रुवन् सर्वे वा अवोचथा अपि नो त्रास्त्विति स नेत्यब्रवीत् कथं वो पिस्यादिति
तमब्रुवन्नप्येव नोस्त्वमघवन्निति तान्नीक्षतेवेति ॥ उद्धारस्युतं तमिन्द्रं अमितरे देवा इदमब्रुवन् हे इन्द्र सर्वमेव
यज्ञसार तत्संबाधित्वे नो त्वं वानसि अस्माकमप्यत्र सारभागो स्त्विति ततः स इन्द्र एवमब्रवीत् अयं सारः सं

वीविममेवापेक्षितः। युष्माकमप्यत्र भागं कथं स्यात्तस्मात्स्यैवयुष्माकं भाग इति निराकृतवन्तस्तमिंद्रं देवाः प्रार्थयमानाः
इदमब्रुवन् हे मघवन्नः अस्माकमपि अस्मिन्सोमे वसवैथा भागोऽपेक्षित एवेति ततइंद्रस्तान्देवानीक्षते नेच अनुयद्दृ
ष्यावज्ञा कृतानेय॥ ॥द्वादशाध्याये दशमः खंडः॥ ॥अथ निष्केवल्यशस्त्रे प्रोक्तामध्यां विधातुं पूर्वोक्तां पारव्यानमाह
प्रजानीति। देवावै अब्रुवन्निति यद्वा इंद्रस्य प्रियाजायावावाता प्रासहानामास्यामेव कामहा इतिनित्येतिनस्यामे
छंतस्वेनानब्रवीत्प्राजविः इति वक्तास्मीति तस्मात्स्त्रियः पत्या विछंनेन स्माद्यस्यन्तु रात्रे पुत्रा विछत्ते नीं ज्ञारूका
पायन्स्तेतदेव प्रस्यप्रद्य घतेति। ते देवा इंद्रस्याभिप्रायमजानंतः परस्परमिदमब्रुवन् इंद्र इयं वै पुरस्तो देवहूयमाने
वैंद्रप्रियाजायासावावातामध्यमजातीयाराज्ञां हि त्रिविधाः स्त्रियःसाउत्तमजाते महिषी तिनामध्यमजातेवा
वातेति अधमजातेः परिवृक्तिरिति अत एवाश्वमेधेऽप्युक्तं॥ इति राजस्त्रीणां कर्तव्यविशेष एतेनोमभिराम्नातः॥ २६
महिषीमभिषिंचतीति वावातामुपवरितिपरिवृक्तिरिति त्रुस्याश्चवावातायाः प्रासहेति नाम राजप्रियत्वात्प्र
सुषवशाकारेणा सर्वकार्यकर्तृत्वात्सैस्यर्थः तस्मादेतस्यामेव निमित्तभूतायां सत्यां राजाभिप्रायं ज्ञातुमिच्छा
महे इति विचार्य तमाभिप्रायं सर्वे गीकृत्य तस्यां वावातायां स्वाभिप्रेतमैच्छत् सापि वावाता एतान्देवानिदमब्र
वीत्। रात्रौ राजाभिप्रायं विचारयित्वा प्रत्यक्षं प्रातःकाले वोयुष्माकं प्रवक्तास्मीति वक्ष्यामीति यस्मादेवं तस्मा
ल्लोके पितृया स्त्रियः सर्वा अवगंतव्यस्नेन पत्या व वगंतुमिछंते यस्माद्धि विशेषः सरस सर्वमवगंतुं शक्यं तस्माद्रुतस्मा
देव कारणात् स्त्री प्रियासती अनुरात्रे रात्रिसमये विविक्तवेळायां दस्योः सर्वमवगंतुमिच्छतिदं वा स्कंदाः का

के वावाताम्रुपागच्छन्। सावावाना एतद्देव वक्ष्यमाणमंत्ररूपं वाक्यं प्रमुपधत्त प्रस्तुतेरेचेनआस्तवतीन स्मिन्मंत्रे पादत्रयीम
ति। यद्वावान पुरुतमं पुराषाळा वृत्रहेन्द्रो नामान्यप्राः। अचेति प्रासहस्पतिस्तुविष्मानिति॥ पुरातन नाम्नीं पुरुषाणां मध्ये सहिष्णुः
पुराषाट् इ.उ: सच पुरुतमम् अतिशयेन प्रभूतं यदुक्तात्ररूपं वाक्यं वावान आदौ दीर्घ...श्छांदसो ववाने सम्यग्गजे उक्थवानि
त्यर्थः। सच वृत्रहेन्द्र: तस्मिन्नुच्चारे नामान्यप्राः माध्यंदिनयुक्तो माध्यंदिनमित्यादीनि स्वाभीष्टनामानि आसमंतात् पूरि
तवान्। प्रस्तुहं सहो बळं येषां तेषां पतिः प्रासहस्पतिः इ.उ: अचेति अज्ञानात् देवानामग्रे ज्ञातवान् कटाक्षेणानुग्रही
तवानित्यर्थः। स चेंद्रस्तुविष्मान् बहुधनवान् अस्मिंस्तृतीयपादे पदद्वयोरप्रसिद्धत्वात् अर्थं व्याचष्टे। इंद्रो वै प्रासहस्प
तिस्तुविष्मानिति। चतुर्थपादमंत्रं व्याचष्टे॥ यदीमुश्मसि कर्तवे करत्तदिति पदं वेतद्वोचामा करत्तदित्येवेनोक्ते द बा
वीदिति। पादत्रयोक्तैर्वावातायाः वचनैः श्रुत्वा देवाः परस्परं ब्रुवते॥ यदीं यदिदं मस्माकमप्यत्रभागो भवेत्येनादृष्टं कार्य
कृतवित्युश्मसि वयं सर्वे कामयामहे तत्सर्वं करत्। इ.उ: संपूर्णमकरोत्। अथ चतुर्थपादोपि वावाताया एव वचनं हे दे
वाः वयं सर्वे यदिदं कार्यं कर्तुं कामयामहे तत्कर्मभागप्रदानरूपं कार्यमिंद्रो करोदिति। इदमेव वृत्ती यव्याख्या
नौ। यद्देवेत्र दित्यादिना ब्राह्मणेन स्पष्टीकृतं॥ हे देवा मयास्य पुष्पाभिराशोचितं कार्यं इंद्र कृतवानित्यनेनैवग्र
कारणं तस्मिन्मंत्रे सावावाता ब्रवान् उपाख्याने ऋषिं द्रष्टा प्रति। ते देवा अब्रुवन्नप्यस्या इह स्तु या नोस्मिन्नैव क
मविददिति। पदं वै तद्वोचामा न घेतित स्यामप्यत्राकुर्वन्निति। ते देवा वावातायाउत्तरं श्रुत्वा परस्परमिदमेकु

श्ववावातानोस्माकमुपकारिणी।अस्मिन्निषेकवन्ध्येशास्त्रे कमपि संबंधं न वेद अविदन् नैके ध्यवत्ती।अस्या अपि वावाताया
इहनिषेकवन्ध्येशास्त्रे संबंधोस्माद्दृश्येन दंगीकृतस्तस्या अपत्यसंबंधमकुर्वन् इदानीं धाय्यां विधत्ते॥तस्मादेषात्रापि शास्य
ते॥यद्दानावपुरुतनमुष्पापाष्ठितीति॥यस्माद्वावातायाः संबंधः कृतस्तस्मात्कारणात् शुद्धावानेषाप्यत्र निषेकवन्ध्येशास्त्रे
धाय्यत्वेन शंसनीया।अस्या ऋचो वक्ष्यमाणैरिंद्रस्य जायोक्तात्र संगत्बुद्धिस्थं किंचिदाह। किं कः प्रयोगो विधीयते॥सेनावा इंद्रस्य प्रि
याजाया वावाता प्रासहा नामकोनाम प्रजापतिः श्वशुरस्तस्या यस्य कामे सेनाजयेत्तस्या अर्द्धात्तिष्ठंस्तृणमुभयतः परि
छिद्येतरां सेनामभ्यस्येत्प्रासहे कस्त्वा पश्यतीति तद्यथैवादः स्नुषा श्वशुराल्लज्जमाना निलयमानैत्येवमेव सा सेना भ
ज्यमाना निलीयमानेति य एवं विद्वांस्तृणमुभयतः परिछिद्येतरां सेनामभ्यस्यति प्रासहे कस्त्वा पश्यतीतीति॥पूर्व
त्रास्यैंद्रस्य प्रियजाया वावाता प्रासहानामेति येयमुक्ता सेयं लोकव्यवहारे सेनावै युद्धाय घतसेनारूपेण वर्त्तते।इंद्रजा २७
यायाः सेनाभिमानित्वात्तत्र शाखान्तरे समाम्नातं इंद्राणी वै सेनायै देवतेति को नाम इंद्रस्य नेन नाम्ना युक्तः प्रजापतिस्तस्याः प्र
इंद्रजायायाः श्वशुरः प्रजापतेरिंद्रस्योत्पादकत्वात्॥तथा चान्यत्र श्रूयते॥प्रजापतिरिंद्रमसृजतानुजावरं देवानामितित
थासतियस्य लोके किंकस्य पुरुषस्य युद्धार्थिनो यास्वकीयासेनासेवजयत्विति कामोभवति।एतस्मिन्कामे सति।स कामः
पुमान् तस्याः स्वकीयायाः सेनायाः अर्द्धात्तिष्ठन् अर्द्धभागपर्यंते समावस्थितः किंचित्तृणं मध्ये आदाय तृणं तोयन
उभयतः परिछिद्येतरां परकीयां सेनामभिलक्ष्य अस्येत् बाणवत् क्षिपेत् तत्रायं मंत्रः प्रासहे कस्त्वा पश्यतीति। हे प्रास
हाः स्मे इंद्रजाये कः प्रजापतिस्त्वदीयः श्वशुरः त्वां च क्षणा पश्यति अनेन मंत्रेण तृणे क्षिप्ते सति परसेनायाः भंगो द्दष्टांत

व्यते। तत्तस्मिन्विवर्जिते अर्थे यथैवादो निर्दिष्टं भवति तथा कथयामः। अनूज्ञानानां रात्रीं वा गृहेषु युवतीः स्नुषा स्वकीयश्वशुरं दृष्ट्वा
तस्माल्लज्जमाना उन्नाम्य अवनतीनिलीयमाना वस्त्रावगुंठनेन स्वाङ्गसंकोचेनेति रोहिते वसती गृहाभ्यंतरमागच्छति एव
मेवं सा परकीयासेनाऽभिमंत्रितेन तृणरूपास्त्रप्रक्षेपेण उद्वेज्यमाना सती तत्रतत्रारण्यपर्वतादिषु निलीयमानानि रोहितानि स
ती स्वकीयं देशमेति कुत्रायमित्तरसेनाऽभिगच्छत्यात्रीक्ष्यपत्रेवसि स्यादिना पूर्वोक्ता याएव स्पष्टीकृतः। यास्त्रिंश्च प विसमाप
श्नकेनमनुसरन्तिनामिदं उत्तवाचापियात्रास्त्रिंशत्त्रिंजने देवा अन्नुवन्ति नाज्योऽन्यास्त्क निषेवन्यस्य याज्ञयस्त्रिंशद्वादशक्षरेति। वाच
नायाः वचनेनेंद्रसमीपं ज्ञनिद्देवेष्वागतेषु नोदेवानिंद्र एवमुवाच बोधु भाक मध्यन्त्रनिषेवन्य शास्त्रेपेष्टितो भागो स्विति
ननोदेवा स्त्रयस्त्रिंशदक्षरा विराट् छंदस्का पिबा सोममिस्यैतां याज्यास्वार्थयाचितवंतः। तो याज्यापि त्रयस्त्रिंशतीति। त्रयस्त्रिं
शद्देवा अष्टौ वसव एकादशरुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च देवता अक्षरभाजः करोत्यक्षरमक्षरं
मेवतद्देवतानुप्रविश्यं निर्देवपात्रेणैवतद्देवतानास्तृप्यंतीति। एतद्वाक्यं पूर्वं चैव व्याख्यातं। यद्यप्यस्या याज्याया स्त्रयस्त्रिंशता
दक्षराणि साक्षान्न दृश्यंते तथापि संयोगाक्षरादि विभागेन संख्यापूरणीया। ननोदेवसाम्यात् प्रत्यक्षरमेकैकदेवता न
तिं सिध्यति॥ अथ याज्याविधानप्रयोगं विधत्ते॥ यं कामयेतानायतनवान्स्यादिति स्यविराजा स्यप यजेज्ञाय त्र्यावात्रिष्टुभावान्य
नेवाथ छंदसा वषट्कुर्यादनायतनवंतमेवैनं तत्करोतीति आयतनमाश्रयो गृहादिरस्यास्तीति आयतनवान् तद्विपरी
तोऽनायतमानो स्विति कामयमानो होता विराडिति सिंहगायत्र्यादिच्छंदोयुक्तायांयाज्यां पठित्वान दत्ते वषट्कुर्यात् तथास
त्यायतनस्य दिनोयं यजमानो भवति। उक्तार्थव्यतिरेकं विधत्ते॥ यं कामयेतायतनवान्स्यादिति विराजा स्य पयजेत् स्त्रिंशंसोममिति

इमं दत्तं त्वेस्येतयाय तनवृं तमेवैनं नकुरोतीति॥ ॥इति द्वादशाध्याये एकादशः खण्डः॥ ॥ऋक् तमनुद्ग्रासती तिविधिव बळे ननि
के वल्य शस्क्रोस्य स्तोत्र पूर्वकत्या देवुस्तंधि स्यस्तोत्रियस्यैकस्य साम्न आश्रयत्वेनत्वं विधातुं आख्यायिकामाह॥ ऋक् वा इद
मग्रे साम वास्तां सैव नामर्क् गासीद् मो नाम साम सा वा ऋक् सामोपावदन् मिथुनं संभवाव प्रजात्या इतिने त्यब्रवीत् साम
ज्यायान्वा अतो मम महिमेति ते द्वारं तोपावदतां ते न प्रतिवचनं समवदन्त ता स्तिस्रो भूत्वा पावदं स्तानि स्तुतिः सम भवत्र् यत्ति
स्तुतिः सम भवन् नाहमाति स्तुतिर्नवनिनि स्तुति रुज्ञायतिनि स्तुतिर्दि साम सम्मितं तस्मादेकस्य बह्यो जाया भवन्ति नैक
स्यैव बहवः सह पतयो यद्व तत्सा वा ऋग्अमश्च सम भवतां तत्साम्नः सामत्वमिति॥ यदिदमिदानीं ऋग्गाथितं साम तदुभयमेळन
रूपं अभिधीयते तदिदमग्रे मेळनात् सुरा ऋक् अक्षर पादरूपा पृथक्कृता साम च गीतिरूपं पृथक् भूतं इत्येवं द्वय
पि पृथगेवास्तां तयोः परस्परमेळने योग्यतां दर्शयितुं एकस्मिन्नेव साम्न्येत न्द्विवः भेदद्वयेन सामेति। साम्नो यदेतत्सेति २८
पूर्वमक्षरं तदेवैकं नाम तं नाम वाच्यासासीत्। अम इत्येकं नाम तद्वाच्यं सामासीत्। अतो मेळनयोग्यतायां सत्यां सा वा ऋ
क् साम प्रत्युपावदत् समीपमागत्योक्तवती। आवां तु मिथुनं यथा भवति तथा संभवाव तत्र च संभवने प्रजोत्पत्त्यर्थ
मिति। तत्तु साम न अङ्गीकरोत् न अभिप्रायं वावदत्। अतो स्माद्धेतोः महिम्नो ज्यायान् अभ्यधिको मम साम्नो महिमा तस्मा
द्विवादस्य विवादस्य तुल्ययोरिति न्यायविरोध इति न च साम्नो तुल्यत्वसिद्धये ऋचो भूत्वोपेत्य पूर्ववद्वक्तव्यौ न
चेत्सप्तक्षरद्वयात्मको निपातोपि शब्दार्थः। नेदमृचो भूत्यापि साम न समवदत् वादमङ्गीकारं नाकरोत्। पुनस्तावृचौ
वः तिस्रो भूत्वोपेत्य पूर्ववद्ब्रूतवंतः। तदानीं तास्तिस्रः स्तुतिः सम भवत् संभवने संयोगमकरोत्। यस्मात्संयोगः संवह

तः न स्मात् साम सयुक्ताभिर् ऋग्भिः सामगाः कुर्वन्ति यद्धि स्तोत्रं कुर्वन्तीति तस्यैव व्याख्यानं तिसृभिर् ऋग्भिर् गायन्तीति। औद्गात्रं कुर्वन्ति कु
र्वन्ती यथो। अत एव तृचात् वा तरे श्रूयते। एकं साम तृचे क्रियते स्तोत्रियमिति यद्यपि छंदः साम नामके ग्रंथे एकैकस्यां ऋचि सामो
त्पन्नं तथाप्युत्तराख्ये ग्रंथे आम्नातेषु तृचेषु प्रयोगकाले साम गानं व्यंजनम्। प्रथमायाम् ऋचि योनिरूपायां सामोत्पन्नं छंदसि
ग्रंथे समाम्नानं तद् वक्ष्यत तत्साहचर्येण द्वितीयतृतीययोरस्य ऋचोर् गानं समूहनीयम्। अत एव तदपि उत्तराख्ये विहितो
य योन्यां तदुत्तरयोर् गायन्तीति तस्मात् दाशयैव कर्म तिसृभिर् ऋग्भिर् निष्पद्यते यस्मात् दाशव्यानो एव प्रकारेण तिसृभिर् ऋग्भिः सा
म सम्मितम् एकस्य साम्नो महिमा तु त्र्यः संवृत्तः। तस्माल्लोकेऽप्येकस्य पुरुषस्य सामूल्लभानीयस्य बह्व्यो जाया भवन्ति कुस्मा
नीयाठवर्ति। नतु विपर्ययेणैकस्याः स्त्रियो बहवः पतयः परस्परेकपत्नीन सह भवन्ते मानात् दृश्यते। यस्मात् अक्षरपदादि
रूपा सैत्यनेन शब्देनाभिधेया आम शब्देन साम अभिधेयं सा च अमश्च तदुभयं युक्तं सत् सामाभवतु तस्मात् कोऽ
यात्मक वेदस्य न सामनाम संपन्नं य एवं वेद तं प्रशंसति। साम भवति य एवं वेद। ऋक्साम योरेकत्वे वेदितासाम
वैरस्य हितैः सह शोभवति। लोकिकवचनोदाहरणेनापि सामस्वरूपं प्रशंसति। यो वै भवति यः श्रेष्ठतां गच्छति स
सामं भवस सामान्यमिति निर्दिशति। यः प्रमान् स भवतीति। ऐश्वर्यं प्राप्नोति। यश्च विद्या वृत्ताभ्यां श्रेष्ठ तं प्रशंसति स
सर्वोऽपि साम भवति। सर्वेषु स्वकीयत्वव्याप्तसमदृष्टिर्भवति। अन्यथा सर्वजनाः न मसामन्यः पालयतीति नि
ति। अतः सामान्यरूपस्य लोके प्रशंसालोकनात् अत्राप्यक्षरपाठस्य गानस्यैकत्वे साम तं प्रशंसति सर्वः। ननु त्ववे
सामर्थ्य प्रकृते निषेधव्यन्तरास्त्रे किमायातं [illegible] यार्थस्य साम साहचर्येण [illegible] प्रशंसा सा दृश्यते। नैवेषंशा न्य[illegible]पंचा न्य

तमिसा

२९

दु चाकल्पे नामाहावश्च हिंकारश्च प्रस्तावश्च प्रथमा च ऋगुद्गीथश्च मध्यमा च प्रतिहारश्चोत्तमा च निधनं च वषट्कारश्चेति निवा
एते वक्ष्यमाणा आहावादयः शास्त्रावयवाः पंचसंख्याकाः अन्यस्तु पृथगेव शास्त्रस्वरूपेण वावर्तते तथा हिंकारादयः पृथक् सा
मीत्राः ये च देवाः शावयवाः अन्यन्तु पृथक् सामस्वरूपं भूयो वर्तते तेनेवनु । स्वसामनि । स्वावयवोपेते उक्ते कल्प्येते । स्वस्वव्यापार
समर्थे भवतः । आहावः शोंसावोमित्येष मंत्रः स्तोत्रियेन च प्रथममध्यमोत्तमास्ति स्वरूपयाज्यान्ते पठितो वषट्कारः तदेनं सं
वर्द्धशास्त्रस्य रूपं उद्गातृभिः साम्न आदौ पठ्यमानो हिमित्येव शब्दो हिंकारः प्रस्तोत्रा गातव्यः सामावयवः प्रस्तावः उद्गात्रा
गातव्यः उद्गीथः । प्रतिहर्त्रा गातव्यः प्रतिहारः । अन्ते सर्वैर्गातव्यो भागो निधनं तदेनं संवर्कं सामस्वरूपं अतः साम साहचर्येण
निधेवत्यत्र शास्त्रं प्रशस्तं प्रकारान्तरेण शास्त्रं प्रशंसति । न यस्स्वान्यद्वा पं वा न्यद्वाकल्पेत तस्मादाहुः पांक्तो यज्ञः
पांक्ताः पशव इति यस्मात्सामशास्त्रयोर्भक्तप्रकारेण प्रत्येकं पंचावयवं वेति तस्मात्पंचानां पंक्त्यायोगानुसरेण यज्ञः पांक्त इ
ति ब्रह्मवादिन आहुः तथा गवादिपशवोपि चतुर्भिः पादैर्मुखेन च योगात्पांक्ताः । अतो यज्ञे पांक्तं च प्रसिद्धं संपादनार्थं सा
साम्यं शास्त्रं च शास्त्रे । पुनरपि प्रकारान्तरेण प्रशंसति । यद्वै विराजं दशिनीमभिसमपद्येत तस्मादाहुर्विराजि यज्ञो दशि
न्यां प्रतिष्ठित इतीति । दशाक्षरा विराडिति निरुक्तं तत्र नादशानां अक्षराणां समूहो दशिनी या विराडस्ति नामद्विल छन्दः स च
कदयात्मकशास्त्रसामनी समपद्येतां संभवतः विराट् स दशत्वे भवत इत्यर्थः । यद्वै यस्मादेवकारणात् संख्यया विराट् सा
दृश्यं तस्माद्दशिन्या एवमाहुः दशसंख्योपेतायां शास्त्रसामरूपायां विराजि यज्ञः प्रतिष्ठितोऽवस्थित इति । पुनरपि गृहस्थ
पुरुषसाहचर्येण शास्त्रं प्रशंसति । आत्मा वै स्तोत्रियः प्रजानुरूपः पत्नी धाय्या पशवः प्रगाथो गृहाः सूक्तमिति । येन तं २९

चैन सामगाः कुर्वंति स्तोत्रियस्तृचः निष्केवल्यस्य आरंभे शंसनीयः स वा आत्मा वै गृहस्थः शरीरस्थानीय एव स्तोत्रियस्तृचमनुद्रवति
यो यस्तृचः शस्यते सोयमनुरूपः स च प्रजापुत्रपौत्रादिस्थानीयः। ये पंधाय्याः शस्त्रे प्रक्षेपणीयाः सा पत्नीस्थानीया। यः प्रगाथः स पशु
स्थानीयः यन्निविद्धानीयं सूक्तं तद्गृहस्थानीयं। एतद्वेदनं प्रशंसति स वा अस्मिंश्च लोकेमुष्मिंश्च प्रजया च पशुभिश्च गृहे वसति य ए
वं वेदेति॥ पशुभिश्च सहित इति शेषः॥ ॥इति द्वादशाध्याये द्वादशः खंडः॥ ॥अथ निष्केवल्यशस्त्रगताः स्वरविशेषाश्च वक्तव्याः।
तत्र प्रथमं स्तोत्रियं विधत्ते॥ स्तोत्रियं शंसत्यात्मा वै स्तोत्रिय इति। अपि त्वा शूर नोनुम इत्यस्मिन् प्रगाथे तृचं संपाद्य सामगाः कुर्वंति। सो
यं स्तोत्रियस्तृचस्तमादौ शंसेत्। तस्य गृहस्थदेहस्वरूपत्वं पूर्वमेवोक्तं। अस्मिं स्तोत्रिये स्वरविशेषं विधत्ते। तं मध्यमया वाचा शंसेदा
त्मानमेव तत्संस्कुरुत इति। अत्युच्चमतिनीचत्वं च यस्यां वाचि नास्ति सा मध्यमा तया वाचा ध्वनिना देवयजनदेशस्थाः शृण्वंति
ननु बहिर्देशस्थास्तावत्तं ध्वनिं कुर्यात्। तेनात्मानमेव देहमेव संस्कुरुते। तृचांतरं विधत्ते॥ अनुरूपं शंसति प्रजा वा अनुरूप
इति। स्तोत्रियेण तृचेन सदृशस्तृचो वानुरूपः स चाभि त्वा पूर्वपीतय इंद्र स्तोमेभिरायव इति एष प्रगाथः। उभयोः प्रगाथयोः स
मानछंदस्कत्वात् समानदेवताकत्वात् अनुरूपत्वेन निर्मितत्वं चैत्रांसेत्। तस्य च पुत्रादिप्रजास्थानीयस्यानुरूपत्वमपेक्षितं
पितृपुत्रयोः कुलशीलादिना समानरूपत्वात्। तस्य ध्वनिविशेषं विधत्ते॥ स उच्चैस्तरामिवानुरूपः शंस्तव्यः प्रजामेव
तच्छ्रेयसीमात्मनः कुरुत इति। स्तोत्रियध्वनेरप्यधिकं ध्वनिं कुर्यात्। तथा सति स्वस्मादाधिक्यं पुत्रादौ संपादितं भवति। ततो
य दृवावानेस्येतस्या धाय्यायाः शंसनं विधत्ते॥ धाय्यां शंसति पत्नी वै धाय्येति। पत्नीत्वं पूर्वमेवोक्तं। स्वरविशेषं विधत्ते। सा
नीचैस्तरामिव धाय्या शंस्तव्येति। अत्यंतनीचो ध्वनिः कर्तव्यः। होतुरंतर्हृदनप्रत्रासति॥

अप्रतिवादिनी। हास्य गृहे ध्रुवपत्नी भवति य एवं विद्वानीये स्तराधाय्यां शंसतीति। प्रत्यृचः प्रतिकूलं वदतीति प्रतिकूलवादि
नी। तिन्न हि पर्ययेणानुकूलवादिनी भवति। पिबा सुतस्य रसिन इत्येनं प्रगाथं विधत्ते। प्रगाथं शंसतीति तत्र चाघ्नी विधत्ते
य विधत्ते। सस्वरवत्सा वावापार्थां स्तव्यः पञ्चावो वै स्वरः पञ्चावः प्रगाथः पञ्चनाम वरूध्या इति। स्वरवत्सा स्वरयुक्तया वाच्य
स्यर्थः। प्रगाथस्य पञ्चत्वे पृच्छं मन्त्रे। स्वरस्य पञ्चत्वे संख्यासाम्यानुवत्वारः स्वराः पञ्चावो पिचत्वुष्पाद इति विद्वानीयं पञ्चद
स्त्रीयं सूक्तं विधत्ते। इन्द्रस्य नु वीर्याणि प्रवोचमिति सूक्तं शंसतीति। तदेतत् प्रशंसति। एतद्वा एतत्प्रियं धाम यदिन्द्रस्य सूक्तं निष्केवल्ये हि
रण्यस्तूपमेतेन नवै सूक्तेनाहि हिरण्यस्तूप आङ्गिरस इन्द्रस्य प्रियं धामोपागच्छत्स परमं लोकमजयदिति। यदेतदिन्द्रस्य नु वी
र्याणीति निष्केवल्ये शस्यमानस्य गतं सूक्तं तदेतदिन्द्रस्य प्रियं हिरण्यस्तूपनाम्ना महर्षिणा दृष्टत्वाद्धिरण्यस्तूपं तद्देवेनैतेनैता
दिनास्पष्टीक्रियते। अङ्गिरसः पुत्रो हिरण्यस्तूपाख्यो मुनिरेतेनैव सूक्तेनेन्द्रस्यात्यन्तदीयं स्थानं प्राप्य ततोप्युत्तमं लोकम ३०
जयत्। य एवं वेद। स्तव्यं प्रियं धाम गच्छति जयति परमं लोकं य एवं वेदेति। सूक्ते ध्वनि विशेषं विधत्ते। गृहा वै प्र
निष्ठा सूक्तेन प्रतिष्ठितं तमया वावाच्यं सन्तवं तस्माद्यद्यपि दूर इव पशूं ल्लभते गृहानेवैनानाजिगमिषति गृहा हि पशू
नां प्रतिष्ठा प्रतिष्ठेति। इन्द्रस्य नु वीर्याणि इत्यस्मिन् सूक्ते नात्रास्य समासत्वेनावस्थानान्नूनस्य प्रतिष्ठारूपत्वं। गृहा अपि
च्छिनि हेतुत्वात् प्रतिष्ठारूपाः तथा सस्येन सूक्तं प्रतिष्ठितं तमया ऽनुतविलम्बितं वा दिदोषरहितया वाचा व्यध्वनिनोपेतया
वाचा शंसेत्। यस्माद् गृहस्थानीयस्य सूक्तस्य ध्वनिः प्रतिष्ठितं तमातं स्यष्ट आयं कालेन गृहानेवाजिगमिषति आनेतुमिच्छ
तस्माल्लोके यद्यपि तु न च वनाधमरण्यगतान्दूरदेश एवावास्थितान् पशून् दिवसे पुरुषो लभते पश्यति तथापि यथा

ियस्मान्मुख्यनाग्रहाः प्रतिष्ठासुखेनवाच्छानुरूपानुस्थाने द्विरभ्यासो ध्यायस्समाप्त्यर्थः॥ ॥इतिमाधवीये वेदार्थप्रकाशे ऐत
रेयब्राह्मणभाष्ये द्वितीयाध्यायेचतुर्थः खंडः॥ ॥समाप्तश्चाध्यायः॥ ॥ब्रह्मवादवउत्ते दे प्रतिगणमथानुष्टुभ्छंदस्यमानानाम्रस्योः
सेनद्वातिक्रमणमधमरूतवद्विधानप्रशंसानंछेषायेविशेषाः प्रतिपदत्तुचरजक्रमात्सप्तभागानिष्केवल्यवत्रास्त्रनदवस
हानास्तोत्रियाद्याप्यर्पच॥ ॥ अथतन्नीयसवनेवृक्रमादवास्याप्यकामाह॥ सोमोवैराजागंधर्वेष्वासीत्तंदेवाश्चऋषयश्च
श्चाभ्यध्यायन्कथमयमस्मान्सोमोराजागच्छेदिति तेब्रुवन्छंदांसियूयनइमंसोमंराजानमाहरतेतिथेति तेसुपर्णाभूत्वो
दपतंस्तेयत्सुपर्णाभूत्वोदपतंस्तदेतत्सौपर्णमित्याख्यानविद आचक्षतेइति पुरासोमवल्ली द्युलोक एव आसीत् नत्वस्मिन्
ल्लोके तदानींसोमममाप्तिदुःखयुक्तेन प्रकारेणसोमोनागच्छेदितिदेवाऋषयश्चविचारितवंतः विचार्यगायत्र्यादीनि छंदांसि
प्रत्येवमब्रुवन्हेछंदांसियूयमस्मदर्थंसोमममाहरतेतितानिचतदंगीकृत्यतेजोकरासिद्धाः पक्षिणोभूत्वाद्युलोकंप्रत्युद
स्या पतन्यस्मात्कारणात्सोमाहरणप्रतिपादकंग्रंथजातंसौपर्णनामेतिपौराणिकाआख्यानविदःकथयंति॥ अथोत्सतत्तु
छंदस्सुमध्येजगतीप्रथमतमादुच्छंदांसि तत्सोमंराजानमच्छावरच्छंत्तानिरूपतप्तित्वात्तुरक्षराणि चतुरक्षराण्येवछंदांस्या
सन्साजगतीचतुरक्षरात्प्रथमोदपतत्सापतित्वोर्द्धमध्यनोऽमत्याश्राम्यत्साप्रास्यत्रीण्यक्षराण्येकाक्षराभूत्वादीक्षाचतपश्च
हरंतीपुनरभ्यवापतत्तस्माद्वित्ताद्दीक्षावित्तंजेपोयस्यभवत्रीतिजागतिहिपशवोजगतीहिनानाहदिति॥ गायत्र्यादीनि
छंदांस्युत्पतनेप्रवृत्तानितदानींसोममगच्छत्प्राग्नुंप्रथमोत्पतत्तावनरत्नोनानिछंदांसिनस्मिन्काले चतुरक्षराणिदेवता
निअतः पुनःसर्वदाचतुरक्षराण्येवासन्नत्वनुकस्यापिछंदसोधिकाक्षराणीति॥ ततः साजगतीचतुरक्षरासतीछंदोन्तर

३२ यः सर्वस्य प्रथमं। गायत्री सोमं हृत्य तत्तन्मार्गस्थार्थं गत्वा यच्छानासनां प्रमकृत्वागत्वा वाणि अक्षराणि परित्य
ज्य स्वयमेकाक्षरा भूत्वा सोममानेतुं मया कुर्वती सोमयागसंबंधिनी दीक्षा दक्षिणा येस्यादि तपो क्षीरपानादि रूपं
ह तपश्चरंतीनतस्मात्तु कादाचिद्यती पुनरेतद्द्वौ कर्मछिद्रक्षयवापनत्।। अथो मुनी समागता तस्मादेवं तस्माल्लोके यस्य
पुरुषप्रवोवः स्वमितेन दीक्षा विद्धि भवति। न पश्चात्तु भवति। न च दीक्षा तपसे जगत्यास्तमानीनयोः प्रश्न
नीतां तु पुनः कारणं वं कथितमिति त्रिष्टुकनीयं प्रश्नं नीजागत्येन जगती द्वात्संबंधसंभवान् जागतत्वं कथमिति चेत्तत्र
स्याप्रश्नमामानितत्वान् इति द्रष्टव्यम्। अत एव चातुरवांतरे जगती त्रस्यते न भागश्चानि सापश्चाद्विरथ्या दीक्षायावा गच्छत्
तस्मात्तु जगती छन्दसा प्रसंव्यतयातनत्वान् पशुमत्तं दीक्षोपुनमतीति।। त्रिष्टुभो हरणं माह।। अथ यत्रिष्टुबुदपतत्सा ३२
पति वायत्या धारदधीनो गत्वा स्त्राम्यत्सापरास्येकमक्षरं व्यक्षरा भूत्वा दक्षिणा हरंती पुनरप्यवापनं दृ तस्मान्म
ध्यंदिने दक्षिणा नीयंते त्रिष्टुभोल्लोके त्रिष्टुभि ता आहरनेति। सा त्रिष्टुप्लोके भूयो पत्र यः पति त्या मार्गस्यार्द्धादे
प वानुदिसन्वेयः। यस्माद्देव दक्षिणाः सर्वा आनीतवती तस्मात्त्रिष्टुप् स्थाने माध्यंदिने सवने यजमानैः सर्वे दत्ताः धाद
सर्वा दक्षिणा कृ[illegible]मिनीयते।। ।।इति त्रयोदशाध्यायस्य प्रथमः खंडः।। ।।अथ गायत्र्या हृतो तदृत्वा यति। तदेवा
अब्रुवन्गायत्री र्वैनहमं सोमं राजानमाहरतेति सा तदधेऽमब्रवीत् वैमा सर्वेण स्वस्त्ययनेनानुमंत्रयध्वमिति नित्यनि
सो दपतन्तीं देवाः सर्वे स्वस्त्ययनेनान्वमंत्रयंत प्रेति चेति चेति च सर्वदे सर्वे स्वस्त्ययनेय प्रेति चेति चेति तित घोस्य प्रियस्या
त्मनेनेनानुमंत्रयंत प्रेति चेति चेति स्वस्त्येव गच्छति स्वस्ति पुनरागच्छतीति।। जगती त्रिष्टुभोः सोमानयनसामर्थ्या आवं

दृष्ट्वा ते देवा गायत्रीं प्रार्थितवन्तः। हे गायत्रि त्वं नोऽस्मदर्थमिमं सोममाहरेति सा च गायत्री तथेत्यंगी। तस्यै देवा अत्येतमब्रुवीत्
हे देवा यदाहं सोममानेतुं गच्छामि तदानीं नोऽमेव गच्छतीमां सूर्यसर्वे पि यथा प्राप्नोति सर्वेण स्वस्त्ययनेनानुमंत्रयध्वमिति क्षेम
प्रापणीः स्वस्त्ययनं तदर्थे नान्योवादः रूपं परमंत्रेण मामनुमंत्रणं कुरुतेति। एवमुक्ता न येतिदेवैरंगीकृते सति सा गायत्री च
लोकं प्रस्थापयत्नमकरोत्तदानीं देवाः स्वागतप्रकारेण सर्वेणापि क्षेमप्रापणमंत्रेण तां गायत्रीमनुमंत्रितवन्तः। प्रासोमं च
इति प्रश्नास्य एको मंत्रः। आत्वाहार्षीमित्यादिनीयो मंत्रः। तद्दृप्रदर्शनार्थमिति ब्राह्मणोद्देश्यं तद्भयसनुव्याख्यार्थं चकार हृत्यं क्षेमेण
सोमं प्राप्नुहि पुनरपि क्षेमेणागच्छेति जयमान्त्रीवादो मंत्रद्वयस्यार्थः। एतदेव मंत्रद्वयं सर्वं स्वस्त्ययनं प्रसेकमिति द्वि
तीयं पदमस्ति इतोऽधिकं नान्यत्स्वस्त्ययनमस्ति। तस्मादिदमेव सर्वक्षेमप्रापकं तत्तस्माल्लोके पियः पुमान्प्रयासांतरे त्रि
गमिषुरस्यगृहस्वानि नः प्रियः स्यात्तं जिगमिषुं प्रत्येतन्मंत्रद्वयेनानुमंत्रयेत तेनानुवादप्रसादेनोऽयं क्षेमेणैव गच्छति
पुनरागच्छति च। इत्थं प्रासंगिकं लौकिकं विधिमुक्त्वा प्रकृतमेव गायत्र्या वृत्तांतमनुसरति। सा पतित्वा सोमपालान्भी
षयित्वा पद्भ्यां च मुखेन च सोमं राजानं समगृह्णात्। याश्चापि न्यच्छंदसी अक्षराण्यजादिनी तानि च उपसमगृह्णा
१त्रा दिति। सा गायत्री पतित्वा उत्पतनेन सोमप्राप्यर्थं धावन्ती स्वानभ्राजादीन् सोमरक्षकान् स्फारनायुध प्रदर्शनादि
ना भीषयित्वा कृशानोः स्थाने पक्षस्थाने स्वयं पक्षिरूपा सती स्वकीयाभ्यां पादाभ्यां मुखेन च सोमं सम्यगगृह्णात्। मनवती स्वान
भ्राजादीन् सोमपालकत्वं नाध्यवसे सोमप्रकरणे मंत्रतद्ब्राह्मणाभ्यामवगम्यते। स्वान भ्राजांघारे बंभारे हस्त सु
हस्त कृशानवेते वः सोमक्रयणास्तत्र रक्षध्वमिति मंत्रः। स्वान भ्राजेत्याहैते वा अमुष्मिंल्लोके सोममरक्षन्निति ब्राह्मणं

३२ न केवलं गायत्री सोममेव गृहीतवती किं तु अन्ये जगतीत्रिष्टुबाख्ये छंदसी यानि स्वार्यक्षराण्यजीहरितां परित्यक्तवत्यौ तानि
चापि तस्य सम्यग्गृहीतवती ॥ अथ तस्या गायत्र्या गंधर्वेण सह युद्धे यो वृत्तांतः तं दर्शयति तस्या अनुविसृज्य कृशानुः सोम
पालः सव्यस्य पदो नखमच्छिनत्तु त्स्यकोभवत्तस्मात्सनखमिव यद्भ्रामस्त्रवत्सा वशाभवत्तस्मात्सा हविरिवाथ यः शा
ल्यो यदनीकमासीत्स सर्पो निर्दंश्यभवत्सह स्वजो यानि पर्णानि ते मंथावला यानि स्नावानि ते गंडूपदा यत्तेजनं सो
धाहिः सोसातपेषुरभवदिति । स्वानभ्राजादिषु सोमरक्षकेषु यः सप्तमो गंधर्वः कृशानुनामकः सोपि तस्या गायत्र्या अ
नुपद्मिनो बाणान्विसृज्य तदीयस्य वामपादस्यैकं नखं छिन्नवान् तच्छिन्ननखं शल्यकः मर्कटशरीरपरिमाणः शल्लः शल्यको
यस्मादयं नखादुत्पन्नस्तस्मात्सनखमिव तीक्ष्णाग्ररोमोपेतः । तत्र छिन्ने नखपादप्रदेशाद्यद्द्रामेदोस्त्रवत्सा वशामे ३२
ध्या काचिदजा अजादिपशुर्वाभासीत् तस्माद्गायत्र्या उत्पन्नत्वात्सा वशा हविरिव देवतायोग्यं हविरेवासीत् । तत्र हविर्द्ध
शारवांजरेश्वयते ॥ एतामविवशामादित्येभ्यः कामपालानैतेति । अथ नखच्छेदनात्परं गंधर्वेण विसृष्टो बाणः सोपि न
खस्य घट्टनेन कुंठितायो बहुधा उयोप्पमोपाजिनः तस्य बाणस्य यः शल्यः लोहायसनिर्मितो बाणाग्रस्थापितः तस्य
शल्यस्य यदनीकं मुखं नखसंघट्टनेन कुंठितमासीत् यो यं शल्यजदनीको भयात्मको बाणभागो निर्दंशी दंशनासम
र्थः सर्पोभवत् जलमध्ये संचरतो डुंडुभाख्यस्य सर्पस्य विषरहितत्वात् दंशनसामर्थ्यं नास्ति तस्मात्कुंठिता यस्य पृष्ठोहस्य
र्द्ध दंशोयसहावेगः तस्मात्सहस्रो बाणवेगात् स्वजाख्यो यतः शिराः सर्पोभवत् तस्य बाणस्य पक्षे यानि पर्णानि पत्राणि
ते मंथावलाभ्यगंडूपदाभ्भवन् अवस्कादिविदिष्वनिषु ये सर्पा जायंते ते गंडूपदाः । तस्मिंश्च बाणे यत्तेजनं लोहपत्र व्यतिरि

अति ज्ञायेन समृद्धयिमिति याहि कामन्यं तेन तत्र प्रयोगे वा तुल्य सद्भावात् य एव मुक्तार्थं वेद स स्वकीयानी मध्य×

कांडे सोऽयमादिरभवत् हेति इति हितं सर्पो भवन् तथानेनो क्रमकारेणेषु गायत्र्येण मुक्तो बाणः सोऽसावभवत् तत्राहुः समुद्यया
र्थः स्राव सा च स्वरूपे भवति तथा त्रैसानि तज्जातिनिर्दिष्टाः सर्पादिरूपस्य क्तो योऽथो पसेहा दः॥ ॥इति त्रयोदशाध्याये
द्वितीयः खंडः॥ ॥अथ तृतीयसवनाद्यं सवनो यत्रिं द्वयोर्यति॥ सा यद्दक्षिणेन पदा समगृह्णात् तत्प्रातःसवनमभवत् तद्गायत्री
स्वमायतनमकुरुत तस्मात् समृद्धतमं मन्यते सर्वेषां सवनानां मध्ये प्रियामुख्यो भवति श्रेष्ठतामश्नुते य एवं वेद या यत्सव्येन
पदा समगृह्णात् तन्माध्यंदिनं सवनमभवद्ग्रहीतं तत्त [illegible] स्तेनान्वानो पूर्वं सवनं तद्देवा अग्निर्भासंततस्मिन् त्रिष्टु
उं छंदसां मध्ये रुद्रं देवानां तेनैत समावद्वीर्यं मध्ये पूर्वेण सवनेनोऽगा प्राप्तौ सवनाभ्यां समावद्वीर्यो भ्यां समावज्जामि
भ्यां राध्नोति य एवं वेद [illegible] यद्यन्मुखेन समगृह्णात् तत्तृतीयसवनमभवदिति। सा गायत्री सोममानयन्ती दक्षिणेन पदा
पादेन यत्सोमस्य स्वरूपं यावद्गृहीतवती तत्प्रातःसवनमभवत् तत्र प्रातःसवने सा गायत्री स्वकीयं स्थानमकरोत्
तस्मात् सर्वेषां सवनानां मध्ये श्रेष्ठो मुख्यः सन् विद्यावित्त्रादिरूपां श्रेष्ठतां प्राप्नोति अथ सा गायत्री सव्येन पदेन य
त्सोमस्य स्वरूपं गृहीतवती तन्माध्यंदिनं सवनमभवत् तत्सवनं विस्रंसमानं प्रातःसवनस्य गायत्री छंदोरूपत्वेन दृढत्वात् दृ
ढमनायतनं नाभवत् तद्देवा विचार्य तस्मिन् माध्यंदिने सवने स्थापितवन्तः छंदसां मध्ये त्रिष्टुभं देवानां मध्ये इंद्रं च स्थापित
वंतः तेन माध्यंदिनेन सवनेन प्रातःसवनेन सह समावद्वीर्यं तुल्यसामर्थ्यमभवत् उक्तार्थस्य वेदितात् तुल्यसामर्थ्याभ्यां
जनएव तुल्यसामर्थ्याभ्यां जनएव तुल्यजामीभ्यां समृद्धो भवति जामिशब्दो जातिवाची तुल्यजातिभ्यामित्यर्थः। अथ यत्

यत्रीमुखेनयःसोमस्यरूपंगृहीतवतीनतृतीयसवनमात्रंनविभिन्नंसवनेतुऋजीषरूपेनिःसारेसोमेआग्निरादिकंविधत्तेतत
स्यपतनीरसमधगत्वाजनरसेनान्वाप्नोमूर्वैसवनेनदेवाःआजिह्रासंनतस्यशुद्धपत्रयंस्तदधदाग्निरमवनयस्मात्स्येनपशुना
वरंजितेनतत्समावद्वीर्यमभवसूर्वाभ्यांसवनाभ्यामिति॥सागायत्रीमुखेनतृतीयसवनरूपंसोमंगृहीत्वाधकोऽदोदधः
पतंतीतस्यसोमस्यरसंमधयनुसारंपीतवतीनत्वतृतीयसवनंधीतरसंपीतसारंभूत्वाऽपूर्वैनि।प्रातःसवनमाध्यंदिनस
वनेद्वअनुगृहेनाप्राक्रांतनदेवास्तत्प्रतिकारंविचार्यतत्साधनंपशुद्वयंरूपपशुभूक्षीरंयदस्तियच्चान्यमस्तियदपिहद
याधंगमरसेनसर्वंसारंतस्मादघंसीनरसस्सोमस्यर्बधिनीऋजीषआग्निरक्षारमवनयतिपाक्षिकास्तत्राज्यपशुभ्यांय
रस्येनुनिष्ठंतितदानंतिनानुष्ठानेनतृतीयसवनंपूर्वसवनाभ्यांतुल्यासामर्थ्यमभूत्॥अयमर्थःसर्वोपिशाखांतरेसंगृह्य ३२
मानःब्रह्मवादिनोवदंतितस्मात्सत्यंगायत्रीकनिष्ठाछंदसांसतीयज्ञमुखंपर्यवीयायेतियदेवादःसोममाहरत्तस्माद्यज्ञ
मुखंपर्येत्तस्मात्तेजस्विनीतमापश्चाद्विसवनेसमगृह्यत्नानुखेनैकंयन्मुखेनसमगृह्णात्तदधयत्तस्माद्द्वेसवनेशु
क्रेवतीप्रातःसवनंचमाध्यंदिनंचयतस्मात्तृतीयसवनेऋजीषमभिषुण्वंतिधीतमिवहिमध्यतआग्निरमवनय
तिशुक्रत्वायेति॥वेदनंप्रशंसति॥सर्वैःसवनैःसमावद्वीर्यैःसमावच्छामीभिराप्नोतियएववेदेति॥ ॥इतित्रयोदशा
ध्यायेतृतीयःखंडः॥ ॥ननुपूर्वत्रसर्वाणिछंदांसिचतुरक्षराणीत्युक्तंतेष्वपित्रिष्टुभोएकमक्षरंगतंजगत्याश्चत्री
ण्यक्षराणिगतानितथापसतिसर्वेषुच्छंदःसुतरविरोधःतित्रिष्टुप्च्छंदस्तरष्टुभअष्टाक्षरागायत्रीएकादशाक्षरात्रिष्टुप्द्वा
दशाक्षराजगतीतिसर्वत्रश्रूयते।अनुष्ठानेचतथैवक्रियतेतत्कथंविरोधपरिहारइत्याशंक्याधिकापरिहारंदर्श

यितुमारभ्यते। ते वा इमे इतरे छंदसी गायत्रीमभ्यवदतां वित्तं नावक्षराण्युपयोगुरिति। ते स्पब्रवीद्गायत्री यथावित्तं नौ
वन इति ते देवेषु प्रश्नमैतां ते देवा अब्रुवन्यथावित्तमेव व इति तस्माद्धाप्येतर्हि विद्या व्याहुर्यथावित्तमेवन इति ततो
वा अष्टाक्षरा गायत्र्यभवत्र्यक्षरा त्रिष्टुबेकाक्षरा जगती साष्टाक्षरा गायत्री। तेये त्रिष्टुप्जगत्यौ स्वकीयान्यक्षरा
णि परित्यक्तवत्यौ ते एते इतरे गायत्रीव्यतिरिक्ते छंदसी गायत्रीमपि लक्ष्य समागत्य एवमूचतुः वत्सोदृ गायत्रि यत्वयावि
त्तं उद्धृतं अधिकमक्षरचतुष्टयं न ददाति तेनो त्रिष्टुप्जगत्योः शब्दयोः न तस्मात्तानि वर्त्तय अस्माभिरुक्तं मयीपुः आवां त्रिष्टुप्
जगत्यावनुउद्दश्यपर्यावृत्यगच्छतिति। गायत्र्या तयोर्वचनेन निनिराकृत्य ते चेतानुपपत्तिमब्रवीत् नो स्माकं यथावित्तं नमे
वल्लब्धमनतिक्रम्यावस्थामिदं युक्तं यद्दत्तं येन लब्धं न तत्स्यैव वस्तिति लोके को न्यायः। तं न्यायं निर्णेतुं ते त्रिष्टुप्
जगत्यौ देवेषु प्रश्नमैतां प्राप्तुनौ हे देवाः कः पंथान्याय्यमिति तयोः प्रश्नः ते च देवा ऊचुः रसमे वंभुवद्वांवायुष्माकं निस्तृणो
यथावित्तमेवाक्षरस्वीकारो युक्त इति यस्मादेवं देवैर्युक्तं तस्मात्तत एव कारणादिदानीमपि विद्याकसिद्धिपुरुषस्य स्य
उव्यलब्धौ सत्यां चाहुः। विप्रतिपन्ने इति न्यायाभिज्ञा एवमाहुः। नो स्माकं सर्वेषामपि लब्धमनतिक्रम्य वर्त्तमानस्य स्वी
कारो युक्त इति। युद्धादौ जये सति परस्मेनायां विद्रुपयेन यल्लब्धं तत्तेनैव न त्वन्येन चतुरणामभिप्रायः। देवेन्यो
ये निर्णीते सति इद्धं गायत्री स्वकीयैः स्वाष्टाभिरक्षरैः सह त्रिष्टुभश्चतुरक्षरैः सहैकाक्षरेण अन्यैश्चतुरक्षरैरपि स्वयमष्टाक्षरा पू
र्णा। त्रिष्टुप्चैव विद्यमाने पूर्वत्रिष्टुभः काक्षरस्य गत तानत्र्यक्षरैरेव सा। तथा जगत्याश्चतुर्भिरक्षरैः षडक्षरत्व यस्य गत तानु
एकाक्षरैरेव साभवत्। इदानीं त्रिष्टुब्जगत्योरक्षरत्वयादधिकानामक्षराणां प्राप्तिप्रकारं दर्शयति। साष्टाक्षरा गायत्री प्रातः

सवनमुद्यछन्नाशक्नोत्त्रिष्टुप् त्र्यक्षरा माध्यंदिनं सवनमुद्यन्तुं नाशक्नोत् तां गायत्र्यब्रवीदायान्यपि मेऽत्रास्त्विति सा तथेत्यब्रवी
त्त्रिष्टुप् तां वै मैतैरष्टाभिरक्षरैरुपसंधेहीति तथेति तामुपसमदधादेतद्वै तद्गायत्र्यै मध्यंदिने यन्मरुत्वतीयस्योत्तरे
प्रतिपदो यच्चानुचरः स एकादशाक्षरा भूत्वा माध्यंदिनं सवनमुदयच्छदिति। यदुपसष्टाक्षरा गायत्री प्रातःसवनमुदय
छन्नातुं घमनं निर्वोढुं तस्य प्रातःसवनस्याकरोत्। यां तु त्रिष्टुप् सैव मध्यक्षरैस्त्रयमाञ्चेणयुक्ता संती माध्यंदिनं सवनं तु धत्तुं
निर्वोढुं नाशक्नोत् तानत्राक्षात्रिष्टुप् दच्छा गायत्र्यैवमब्रवीत्। आयानि सहायाथमहमोगच्छानि मे मनाप्यत्रास्मिन्माध्यं
दिने भागोऽस्त्विति। तद्वचनमंगीकृत्य सा त्रिष्टुबेवमब्रवीत्। गायत्रीं तां वै मां तादशी त्र्यक्षरां मेदं मीं स्वकीयैरेतैरष्टाभि
रक्षरैरुपसंधेहि समीपेन संधानं कुरु पूर्ववित्तो त्यर्थः। तद्वचनमंगीकृत्य सा त्रिष्टुबेवमब्रवीत्। गायत्रीं तां त्रिष्टुभं उप
यसमदधात्। स्वकीयैरष्टभिरक्षरैः अविशत्कोऽसौ गायत्र्यास्तु धीभाग इति सेउ अतमरुत्वतीयस्य शस्त्रस्योत्तरे २४
प्रतिपदः आत्वा रथं यथोतय इत्यस्मिन्प्रारम्भरूपेन्वेव प्रथमायायेते ततो ऋचो प्रतिपदो प्रारम्भरूपे विधीयते यच्चेन्द्र वसो सुत
मित्यनुचररूपे ... तदेवेतस्य दक्ष्यपर्व च माध्यंदिने सवने गायत्र्ये त्रिष्टुभोऽदत्तं तास्य पर्वयोगा गायत्री छंदस्काः ततो गा
दशा यत्रीप्रवेशात् सा त्रिष्टुबेकादशाक्षरा भूत्वा माध्यंदिनं सवनं प्रयोगमुदयच्छत् निरवहत्। अथ जगती स्वकीयादेकादशा
स्मादक्षराद्धिकानामक्षराणां प्राप्तिप्रकारं दर्शयति। नाशक्नोज्जगती तृतीयसवनमुद्यन्तुं तां गायत्र्यब्रवी
दायान्यपि मेऽत्रास्त्विति सा तथेत्यब्रवीज्जगती तां वै मैतैरेकादशभिरक्षरैरुपसंधेहीति तामुपसमदधादेतद्वै त
द्गायत्र्यै तृतीयसवने यदैश्वदेवस्योत्तरे प्रतिपदो यच्चानुचरः सा द्वादशाक्षरा भूत्वा तृतीयसवनमुदयच्छदिति।

×ग गायत्री विशेषेण प्रशंसति । एकं वै सत्त्रेधाभवत्तस्मादाकुदनिष्यमेव विदुषमुस्यैकं हि सत्त्रेधाभवदिति ×

वैश्वदेवस्य साम्नस्य प्रति पद्भुत्तरा वुपरिष्टादुदाहरिष्यते ॥ उक्तमर्थं निगमयति ॥ तत्तो वा अष्टाक्षरा गायत्र्यष्टव द्वेकाक्षु
द्वशाक्षरा त्रिष्टुप् द्वादशाक्षरा जगतीति ॥ वेदाने ऽष्टवसवः सर्वे ॥ से वैश्वदेवैः समावद्वीर्यैः समावज्ज्ञामीभिरा प्नोतीति य एवं
वेदेति ॥ तत्र गायत्र्याः स्वरूपं पूर्वं चतुरक्षररूपेणैकमेव नन्त्वधिकाक्षर … चतुष्टयसंपादनेन स्वकीयानामष्टाक्षराणां
त्रिष्टुब्जगत्योः पर्वेणैव त्रेधाभवत् । यस्मादेवं गायत्र्या महिमा तस्मादेवं विदुषो गायत्री महिमानं ज्ञानवते पुरुषाय स्त्री
के गो सुवर्णादिकं दातव्यं इत्येवं धर्मरहस्यविदः प्राहुः । यस्माद्गायत्रीस्वरूपमेकं सत् त्रेधाभवत् तस्मात्तद्विदे दानमुचि
तमेवेत्युपसंहारार्थं पुनर्वचनम् ॥ ॥ इति … षोडशोऽध्यायश्चतुर्थः ॥ ॥ एवं तावत्तृतीयसवनमवतारयितुं सोमाहरणकथा वर्णि
ता ॥ अथ तृतीयसवनस्य … नाम च वैश्वदेवाग्निमारुतयोः शस्त्रयोः स्तुतिः संगृह्यते । स्वाद्वी … देव सवितुः पुनस्त्वधावापृथिव्योः
वैश्वदेव विश्वे वैश्वानरीयं मरुतां … जातवेदस्यं निहाग्निमारुते तृतीयसवनस्यादौ आदित्यग्रहं विधत्ते ॥ ते देवा अमु
मादित्यमन्युपमाभिरिदं सवनमुपधत्तामेति तत्त्वे तिस्मादादित्यारंभणं तृतीयसवनमादित्यग्रहस्य पुरस्तात्तस्येति ॥ तृतीयसवने
निविदः साजगत्या अक्षररूपाणि … गतवन्तस्ते देवा आदित्यां द्वादशाक्षरं स्वाकाम्यसेवम … आदित्याः पशुभिः सहिता
वयं इदं तृतीयसवनमादित्यारंभणमादित्यग्रहमारभेणेत्सर्वेषां ग्रहाणामादौ यस्य सवनस्य तदादित्यारंभणं स एवार्थ
आदित्यग्रहस्याहिताश्च पश्चात्क्रियते तस्य तृतीयसवनस्य पुरस्तात् आदावादित्यदेवताको ग्रहः कर्तव्य … तस्य ग्रहस्य याज्यां वि
धत्ते ॥ यजत्यादित्यासो अदितिर्मादयन्तामिति … रूपसमृद्धया … तृतीयसवनस्य रूपमिति ॥ अदितेः पुत्राः आदि
त्याः ते चतन्मा … अदितिश्च मादयन्तां ग्रहेणानेन तुष्यन्त इत्येषा या … मदन्ती मदो हर्षे इति धातो रूपमनेन … नयुक्तो यस्या
४ × ऋचस्तामनः … मदन्तीत्यादित्यानाध्यतनो … एवं नस्तस्मादारंभे आदित्याः … तृतीयसवनं ×

३८

आदित्यानामदितेश्च हर्षेवर्णेनानूविवक्षितदेवताविषयत्वेनरूपसमृद्धा तृतीयसवनस्यरूपमैद्धहर्षोपेतमेवतत्समासैादेवता
नांयजमानानाम्जीवहर्षोस्तेः इतरहस्यग्रहवत्प्रसक्तावनुवषट्कारस्य सोमप्रतिषेधति॥ नानुवषट्करोतिनेदृशयतिसंस्था
वाएषायदनुवषट्कारः संस्थावत्प्राणाः प्राणाआदित्यानेत्प्राणान्संस्थापयानीनीति॥ अनुवषट्कारस्य अयोग्रहसमाप्तिरूपत्वाद्ग्रा
दित्योनीवृत्प्राणरूपत्वादादित्यग्रहंसमापयतन्दं प्राणानेवसमापितवान्स्यां विष्यामीतिप्राणानसमाप्तिरूपावनुवषट्कारस्य
नेकुर्यान्नेदितिपरिच्छेदवधानतोर्थोनिपातः॥ अथसावित्रग्रहंवैश्वदेवस्यप्रतिपद्विविधत्ते॥ त आदित्या अब्रुवन्सवितारत्व
वयेदंसहसवनमुद्यच्छामेति तथेतिनस्मात्सावित्रोप्रतिपद्भवतिवैश्वदेवस्यसावित्रग्रहः पुरस्तान्तस्ययेजतिदमूनादेवः
सवितावरेण्यइतिमद्वत्याऋपसमृद्ध्यामद्वैतृतीयसवनस्यरूपंनानुवषट्करोतिनेदृशयतिसंस्थावाएषायदनुव
षट्कारः संस्थात्प्राणाः प्राणः सवितानेत्प्राणान्संस्थापयामीनीति॥ वैश्वदेवस्यप्रात्स्त्रस्यतत्सवितुर्वरेण्यंमहइत्येषासविता ३८
न्वीयमनद्तृतिमिष्टयइतिमदिधातुः प्रयुक्तः तस्मादियंमद्वती॥ अन्यस्सर्वमादित्यग्रहवद्व्याख्येयं॥ अथनिविसद्वारासवि
तृग्रहंप्रशंसतित्रेयाएषएतसवनेपिबतियत्सविताप्रातःसवनंचतृतीयसवनंचेतद्यत्पिबवन्नाविश्वेनिविदःपदंपुरस्ता
ऋचातिमद्वदुपरिष्टात्तद्योरेवैनंतत्सवनयोराजतिप्रातःसवनेतृतीयसवनेचेति॥ ग्रहस्यदेवोयः सवितास्तिएषदेवःप्रा
तःसवनेचतृतीयसवनेचेसेनेत्तद्रूपिसवनेपिबतिविलक्षणचेनपिबतितत्कथमितितद्देवोच्यतेवैश्वदेवशस्त्र
सापित्र्येसवितृदेवताकायांनिविदःपदंपिबवन्नूपिबतिधातुयुक्तंपुरस्तादाद्दोभवतिमद्वत्सदमदिधातुयुक्तंपदमुप

रिष्टादेनेभुवतितेन प्रातःसवने च तृतीयसवने चोभयोरपि सवनयोरेनं सविनारमाभुजति भगिनं करोति। सवितादेवःसो
मपिबा। विश्वेयेनं निविसद्दं आदौ प्रयुज्यमानेपि बवत्पदं आदौ प्रयुज्यमानेपि बवत्पदं तथानि प्रयुज्यमाने सविनो देवइद्दंभु
वदिषिद्दं सोमस्य मत्सदिति मयदमप्युदाहरणीयं तयोरुभयोः पदयोः सवनद्वयरूपयोर्विलक्षणत्वात् सवितुः पा
नमिति विलक्षणमिति द्रष्टव्यं एवंविधसवितृदेवताकत्वाच्छस्त्रोयं ग्रहइत्यभिप्रायः। अथवा निविसद्दविधानार्थमिदं
वाक्यं द्रष्टव्यं। अथ तस्मिन्नेव वैश्वदेवशस्त्रे एकया च दशभिश्च स्वभूतेन तस्ये वायुदेवताकामृचं विधत्ते॥ बह्व्यः प्रातर्वाय
व्याः शस्यन्ते एका तृतीयसवने तस्माद्ध्वीः पुरुषस्य भूयांसः प्राणा यथावोचदिति। वायुरग्रेगा इत्येषा द्यावापृथिव्या ऋचो बह्व्यः
प्रातःसवने शस्यन्ते तृतीयसवने तु एकैव द्वौ द्वाहतानस्मात्प्रातःसवने वायुदेवताकानां बहुत्वात् पुरुषस्यापि प्रातःसवन
णा स्थानीये मुखे वर्तमानत्वाद्ध्वीः ऊर्ध्वप्रदेशे भूयांसः प्राणा बहवः प्राणाः। यथा किंचिद् द्वौ चोनाभेरर्वाचीने तृतीयसवनस्थानीये देहेऽव
द्दा र्तमानाः पायुमुपस्थादयो द्वौ च प्राणाः अल्पीयांस इति श्रोषः। तस्मिन्नेव वैश्वदेवशस्त्रे द्यावापृथिवीदेवताकं सूक्तं विधत्ते॥ द्या
वापृथिवीयं शंसति द्यावापृथिवी वै प्रतिष्ठे इयमेवेह प्रतिष्ठासावमुत्र तद्यद्द्यावापृथिवीयं शंसति प्रतिष्ठयोरेवैनं तत्प्रति
ष्ठापयतीति॥ इह मनुष्यजन्मनि इयमेव भूमिः प्रतिष्ठा आश्रयः अमुत्र जन्मान्तरे असावेव द्युलोकः प्रतिष्ठाश्रयः एवं
द्यावापृथिवी वै प्रतिष्ठे तस्मात्तदीयसूक्तं शंसनीयं तत्सूक्तशंसनेनैव यजमानं प्रतिष्ठारूपयोः द्यावापृथिव्योरेव स्थाप
यति॥ ॥इति त्रयोदशाध्याये पञ्चमः खण्डः॥ ॥ द्यावायद्दैः पृथिवी ऋतावृधेत्येतद् द्यावापृथिवीयं सूक्तं विधायतत्रत्येयंसु
इत्ये नमिस्ये नदाभुवसूक्तं विधत्ते॥ आभुवं शंसतीति। अरभु नाम को देवा यस्मिन्सूक्ते सन्ति तदिदमाभवं तत्सूक्तस्य प्रथमायां

ऽऽसवितृतीयपादेनऋभवितृभ्यामनुवहतीति देवतात्वमवगम्यते ॥ अथ धाय्ये विधातुमाख्यायिकामाह ॥ ऋभवो वै देवेषु तपसा
सोमपीथमभ्यजयंस्तेभ्यः प्रातःसवने वाचिकल्पयिषंस्तानग्निर्वसुभिः प्रातःसवनादनुदत तेभ्यो माध्यंदिने सवने वाचिकल्पा
यिषंस्तानीन्द्रो रुद्रैर्माध्यंदिनात्सवनादनुदत तेभ्यस्तृतीयसवने वाचिकल्पयिषंस्तान्विश्वे देवा अनुनोद्यन्त नेह पास्यन्तीति
नेहेति स प्रजापतिरब्रवीत्सवितारं तव वा इमेऽन्तेवासास्त्वमेवेभिः संपिबस्वेति स तथेत्यब्रवीत्सविता तान्वै त्वमुभयतः परिपि
बेति तान्प्रजापतिरुभयतः पर्यपिबदिति ॥ देवेषु सर्वेषु मध्ये ऋभुनामकाः केचन देवविशेषा मानुषाः सन्तु पवित्रेणाः प्रजापतिमुद्दि
श्य तपः कृत्वा तेन तपसा सोमपीथमभ्यजयन् सोमपानमभिलषितवन्तः प्रजापतेः सकाशान्नलब्धवन्त इत्यर्थः । स प्रजापति
रन्ये देवास्तेभ्यः प्रातःसवने वाचिकल्पयिषन्सोमपानं कल्पयितुमैच्छन् तदानीं प्रातःसवनाभिमान्यग्निर्देवाः स्वकीयै
र्वसुभिः सह तान्स्मात्प्रातःसवनादृभूननुदत निराकृतवान् तथेन्द्रो रुद्रैः सह माध्यंदिनसवनान्निराकरोत् विश्वेदेवाः
तृतीयसवनादनोनुद्यन्त नेहेति निराकुर्वन् निराकरणप्रकार एवं नेहेति वाक्येन पुनरनूद्यते । इह तृतीयसवने ऋभवो
न पास्यन्तीति विश्वेषां देवानां प्रत्येकं निराकरणवाक्येन संबन्धान्नेहेति पुनरनूक्तं । स प्रजापतिर्निराकृतानृभून्दृष्ट्वा सविता
रमब्रवीत् हे सवितः तव मे ऋभवोऽन्तेवासाः समीपवासिनः स्निग्धाः [illegible] त्वमेवैभिः सह सम्यक् पिबस्वेति तथेत्युक्त्वा
सविता प्रजापतिमिदमब्रवीत् हे प्रजापते त्वं तान्वै तानेव ऋभून् उभयतः पिब तेषामृभूणामुभयोः पार्श्वयोः स्थित्वा
त्वमपि सोमपानं कुरु एवमुक्तो प्रजापतिस्तथैवाकरोत् ॥ अथ धाय्ये विधत्ते ॥ ते [illegible] ते धाय्ये अनिरुक्तप्राजापत्ये
शंस्येते ॥ [illegible] ते आवर्वे [illegible] रूप [illegible] मतये ये वेन [illegible] दयस्य [illegible] गर्भा इति प्रजापतेरेव रणौसा

दुग्धयतः परिपिबति तस्मादुक्थ्यश्रीः पात्रे रोचयसे वयं कामयेतेतमिति ॥ सुरूपकृत्नुमूतये का धाय्या अयं वेन इति द्वितीया
एते धाय्ये आर्तवसूक्ते अभिहिता शास्येते सुरूपकृत्नुमूतये पाद्य क्तो पूर्ववैश्यसनीया ॥ अयं वेन इत्येषा पाङ्क्त्या सख्यास्य सनीया वृ
द्वन्द्वो धाय्ये अनिरुक्ते निःशेषेणोक्तो देवानिरुक्तः तो हृद्गो धाय्यायो धाय्ययोर्नोस्ति ते अनिरुक्ते न स्वत्वेन यूस्के वाग्निद्वन्द्वो देवहवि
सहस्रान्निर्णेतुं शक्यते प्रजापतेरपि जगत्स्रष्टेः पूर्वमूर्ते स्यनिर्वक्तव्यत्वात् स्तोप्यनिरुक्तः अतो याग्यसांतेत्ते प्रजापतिदेवताके
एतयोर्धाय्ययोः शंसनेन प्रजापतिर्वै रेतात्र मनुष्ययमः परिपिबति यस्मात्प्रजापतिरग्निर्वस्यादिदेवानामग्रुपमुखस्य अरुख्य गावस
तिपितृद्वाराब्राह्मणादुक्थिमुसाहितवान् ॥ तस्मादुतेस्मादेवकारणात् लोकेपि श्रेष्ठाक श्चिज्जनपतिर्यैरवक्रीयंभ्रस्यमितरैरंगीकृत
मपि सर्वेभ्यो रोचयितुं कामयेततेन भ्रस्य समाचारहीनं पात्रे प्रतिग्रहस्थाने योग्य वृक्षा सर्वेभ्यो रोचयसे व ॥ अथा परे मंगद्यं धिय
ते ॥ तस्यो वे देवा अपेवाबीभत्सेतमनुष्याणां धान्न एते धाय्ये अन्तरदधनये भ्यो मातेवापित्र इतीति ॥ अग्निवरवाद्यादेवास्तेभ्य
न भुज्यः अपेवा स्वयमपगता एव संतो बीभत्संत एव मनसि बीभत्सां कृतवंतः ॥ कस्मात्कारणात् तेदुच्यते ॥ मनुष्यगंधादिति ए
ते मनुष्या भूस्म संश्रियोग्यान स्वैतानि शक्यंते सर्वः बीभत्सां प्राप्य एतेन वक्ष्यमाणे द्वे धाय्ये अन्तरदधत न रभ्र णामग्न्यादीनां च
मध्ये अंतर्धानं अवधानं अकुर्वत् केते धाय्या इति शुच्यते ॥ यस्यो मातामधुमदिव्येकाः एवापि चे विश्वेदेवाये सपराः अयं वेन इत्ये
नस्याङ्धर्मेतदुक्थयज्ञाससेदितिस्यार्थः ॥ ॥ इति त्रयोदशाध्याये षष्ठः खंडः ॥ ॥ अथ वैश्वदेवतांकं जानोः शुद्धाइ सेन सूक्तं विधत्ते ॥
वैश्वदेवं शंसन्तीति ॥ लौकिकदृष्टान्तेन स्तौति समाहार्वैविधत्ते ॥ वैश्वदेवं शंसति यथा वै प्रजा एवं वैश्वदेवं तन्यथा जनेरजनना एवंस

कानि यथारण्यान्येवं धाय्यास्तदुच्यते धाय्याभिः पर्य्यौहद्यदेनं तस्मात्रान्यरण्यानि संस्यरण्यानि मृगैश्च वयोभिश्चेति स्माहेति।
लोके यथा ग्रामा एवमत्रैवैश्वदेवशस्त्रे प्रजाशब्देन तन्निवासस्थानं राष्ट्रमुपलक्ष्यते राज्यसद्भावो राष्ट्रसिद्ध्यर्थः तत्र प्रजाशब्देन
विवक्षितराष्ट्रे अन्तरं अभ्यन्तरं जनताजनसमूहो यथा तिष्ठति एवं तस्मिन् शस्त्रे सूक्तानि तिष्ठन्ति यथा वारण्यानि राज्यस्य विकृ विन्दु
नेति। एवमस्मिन् शस्त्रे धाय्याः कश्चित् कश्चित् क्षिप्यन्ते तथा सति अरण्यस्थानीया धाय्यास्तदुच्यते पर्य्यौह्यन्ते इत्युक्तो सावित्रीनिवि
पर्सन्नः पर्य्योहा वः अस्य धाय्यां पार्श्वयोर्यस्मात् तस्माल्लोकेपि बहुधा संकीर्णानि स्थानानि सन्त्यवतोऽरण्यानि मनु
ष्यशून्यानि सन्ति अपि मृगैश्च पक्षिभिश्च संकीर्णानि अनरण्यानि अशून्यान्येव तिकश्चिद्दृष्टि आहस्म एवमेकेन दृष्टान्ते
न श्वेतहवि ग्रहस्य पुनरुत्पन्नेन दृष्टान्तेन ग्रहं सन्ति॥ यथा वै पुरुष एवं वैश्वदेवं तस्य यथा वान्तराङ्गान्येवं सूक्तानि यथा 
पर्वाण्येवं धाय्यास्तदुच्यते धाय्याभिः पर्य्यौहद्यतेन तस्मात् पुरुषस्य पर्वाणि शिथिराणि सन्ति दृढानि ब्रह्मणा हितानि धृतानीति॥
लोके पुरुषाय यथा हस्तपादादिमान् मनुष्यदेहस्तद्वदिदं वैश्वदेवशस्त्रं तस्य शरीरस्यावान्तरमध्ये तत्र वरदे द्वाङ्गानि अवयवा
यावन्ति एवं शस्त्रस्यान्तरे सूक्तानि विशिष्टानि यथा तेषामवयवानां संधयः एवमेता धाय्याः शस्त्रे तिष्ठन्ति तथा स
ति धाय्यानुच्यते पार्श्वे पर्वाणि शिथिराणि पूर्वं शिथिलानि सन्त्यपि पश्चात् प्रयत्नेन धारितानि दृढानि संपद्यन्ते तद् ब्रह्मवादी आह
वदितिस्मृतस्तानाह आहावरूपेण ब्रह्मणैव धाय्यारूपाणि पर्वाणि हृतानि भवन्ति॥ अथ धाय्यानां शस्त्रयाज्यानां सम्प्रके
नोविकल्पो वा प्यत्न निराकृत्येकं पक्षं विधत्ते॥ सूक्तेवा ए तघ्नस्य यद्धाय्या याश्चयास्पाम्यन्तघद्न्याअन्या धाय्याश्चया

स्याश्च कुर्युः तन्मूढमेव न पदं कुर्युस्तस्मात्तास्समान्य एव स्युरिति॥ धाय्यानां शस्त्रयाज्यानां बहुत्वं सूक्तपञ्चकस्य चैवं दृष्टान्तिगताः प
रिस्पन्द्य विकृतिगुणान्यस्वीकारे यद्दृष्टरूपो दृष्टस्तु मूढ्छितिः स्यात् तस्मात्सु हते तो ध्यः सन्तितास्ता एव विकृता विस्कन्ध यत्र समान्य एव कु
विधा एव कर्तव्याः। वैश्वदेवशस्त्रमवयवाः शस्त्रस्य समुदायाकारेण प्रशंसति॥ पाञ्चजन्यं वा एतदुक्थं यद्वैश्वदेवं सर्वेषां वा एतत्पञ्च
जनानामुक्थं देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितॄणां चैतेषां वा एतत्पञ्चजनानामुक्थं स एनं पञ्चजना विदुरिति॥ यद्वैश्वदेव
नामकमुक्थं शस्त्रमस्ति तदेतत्पाञ्चजन्यं पञ्चविधानां संबन्ध्येव स एवार्थः सर्वेषामित्यादिना स्पष्टीक्रियते। ये एते पञ्चजनाः पञ्चविधा ज
नाः सन्ति तेषां सर्वेषां एव संबन्धेन शस्त्रस्य पञ्चविधत्वमेव देवमनुष्याणामित्यादिनोच्यते। अग्न्यादिदेवगण एको वर्गः। ब्राह्मणक्षत्रि
यादिमनुष्यगणो द्वितीयो वर्गः। गन्धर्वाणामप्सरसां च वर्गस्तृतीयः। सर्पाणां वर्गश्चतुर्थः। पितॄणां वर्गः पञ्चमः। एतेषां पञ्चविधानां जनानां स्व
निहेतुत्वात्तद्दीयमेतदुक्थं एनं वैश्वदेवशस्त्रस्य शंसितारं होतारं सर्वे पञ्चजना विदुः जानन्ति तेषां अस्य कीर्तिः प्रसरतीत्यर्थः। वेदनं
शंसति एनं पञ्चविधा जना यं होतारं विन्यो गच्छन्ति य एवं वेद तज्जनानां देवमनुष्यादीनां समूहो जनता सा च सर्वा स्वकीयत्वेनेत्यर्थः। पञ्चजनैस्त्र्य
नं तत्सयथेऽहविनो होतृकर्मणः एनं वेदितारं आगच्छन्ति। अथ शंसनपूर्वकाले दिग्ध्यानं विधत्ते॥ सर्वदेवत्यो वा एष होता
यो वैश्वदेवं शंसति सर्वा दिशो ध्यायेच्छंसिष्यन्सर्वास्वेव तद्दिक्षु रसं दधातीति। यो होता वैश्वदेवं निविद्धं सोऽयं सर्वदे
वताओत्र्यर्थ दितिनयपरितोषहेतुरित्यर्थः। अतः सोऽयं शंसितुमुद्युक्तः। सर्वा दिशो मनसा ध्यायेत् तेन शंसनेन सर्वास्वेव दि
क्षु रसं धत्ते इति। कश्चिन्निध्यानं निषेधति॥ यस्यामस्य दिशि द्वेष्यः स्यात्तां न ध्यायेदनुहायैवास्य तद्वीर्यमादत्त इति॥ अ
स्य होतुर्द्वेष्यः शत्रुर्यस्यां दिशि वसति तां दिशं न ध्यायेत् तथा सति अनुहायैव द्वेष्यस्य एतत् गतं एव तद्वीर्यमादत्ते स
स्वीकरोति। शस्त्रस्य परिधानीयामृचं विधत्ते॥ अदितिर्द्यौरदितिरन्तरिक्षमित्यन्तमया परिदधाति यद्वा अदि

यं वै जातमियं जनित्वमिति ति ।७

३८ तिरियं द्यौरित्युमन्तरिक्षमिति अखण्डितत्वाददीनत्वाद्भूमिरेवादितिरित्युच्यते । सेयं भूमिरेव द्यौः स्वर्लोकरूपान्तरिक्षरूपा
च । अस्यां भूमौ कर्मफलत्वाज्जलोकप्राप्तिः सं पाद पितुरुपाख्यत्वात् । द्वितीयपादमनूद्य व्याचष्टे । अदितिर्माता स पिता स पुत्र इती
यं मातेयं पितेयं पुत्र इति । येयमदितिर्भूमिः सैव माता सोऽदितिरूप एव पिता सोऽदितिरूप एव पुत्रः । इयं वाव सादितिरुत्त
र्थं प्रसिद्धिरुच्यते । अस्यां भूमौ मातापितृपुत्राभ्यामवस्थानं दृश्यमानत्वात् तेषामदितिरूपत्वं प्रसिद्धमित्यर्थः । तृतीयपादं
मनूद्य व्याचष्टे । विश्वेदेवा अदितिः पञ्चजना इति अस्यां वै विश्वेदेवा अस्यां पञ्चजना इति विश्वेषां देवानां भूमौ मनुष्यैः
इज्यमानत्वात् पञ्चजनादेवमनुष्यादीनां भूमावस्थानाददितेः स्वरूपत्वं । चतुर्थपादमनूद्य व्याचष्टे । अदितिर्जातमदि
तिर्जनित्वमिति जातं पूर्वमुत्पन्नं प्राणिरूपं जनित्वं इतः परमुत्पत्स्यमानं प्राणिरूपं तयोरुभयोर्भूमौ संभववान् अदितेः स्वरू
परूपत्वं । परिधानीयां अस्यां ऋत्विक् शंसनप्रकारं विधत्ते शंसेदिति । द्विः पच्छः परिदधाति चतुष्पाद्वै पशवः पशूनाम
वरुद्ध्यै सकृदर्धर्चशः प्रतिष्ठाया एव द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमानमेव तद्द्विप्रतिष्ठं चतुष्पात्सु पशु ३८
षु प्रतिष्ठापयतीति । त्रिः प्रथमं त्रिरुत्तमामन्वाहेति विधेः सावृत्तिकत्वात्तस्याः परिधानीयायाः त्रिरावृत्तिः प्राप्तात्तत्र द्वयो
र्वाक्ययोः पच्छः शंसेत् एकैकस्मिन्पादे अवसायावसाय शंसनं कुर्यात् । पादशः शंसनं चतुष्टयेन पशुसाम्यात् पशुप्राप्तिर्भवति
तृतीयस्यामावृत्तौ अर्धर्चशः शंसेत् । अर्धर्चे एवसाय पठेत् इत्यर्थः । तत्र प्रतिष्ठायै स्थैर्येणावस्थानाय समर्था भवति । किं च
पुरुषोऽयं द्विप्रतिष्ठः पादद्वयोपेतः पशवश्च चतुष्पादाः तथा सति उभयविधशंसने द्विपादं यजमानमेव चतुष्पात्सु
पशुषु प्रतिष्ठापयति । परिधानकाले भूमिस्पर्शनं विधत्ते । स देवपञ्चजनीयया परिदध्यात्तद्घस्यामेवयद्वसैकं

१ उपस्पृशन्भूमिं परिदध्यात् ×

रतिनस्यामेवैनं तद्देनतः प्रतिष्ठापयतीति॥ सदेव सर्वेषु पित्र्यप्रयोगेषूपचजनीयया। विश्वे देवा अदितिः पञ्चजना इत्यक्
त्वादियमृक्षं चजनीया तया परिधानं समापनं यदा कुर्यात् नूनं दानीं भूमिमुपस्पृश्य नु परिदध्यात्। तथा सति यस्यामेव भूमौ
यज्ञं संभरति अनुष्ठानं यज्ञसाधनानि संपादयति तस्यामेव भूमौ यज्ञं एनं अनेन तोमस्यार्हणा ततः प्रतिष्ठापयति। तत्रस्य स्व
याज्यां विधत्ते॥ विश्वे देवाः शृणुतेमं हवं म इति वैश्वदेवमुक्थं शस्त्वा वैश्वदेव्या यजति यथाभागं तद्देवताः प्रीणातीति। वैश्व
देवशास्त्रे त्र्यं स्वनान्तं घे विश्वे देवाः शृणुतेमं वैश्वदेवीं याज्यां पठेत्। तस्यां याज्यायां निरिक्षेपं दृष्ट्वा विश्वेसादिना विश्वेव
गणानामभिधानात्तासां देवतानां स्वस्वभागमनतिक्रम्य प्रीतिं करोति॥ ॥इति त्रयोदशाध्याये सप्तमः खण्डः॥ ॥अथ इतरया
गसौम्ययागयोर्याज्यां विधत्ते॥ आग्नेयी प्रथमा घृतयाज्या सौमी सौम्यपाज्या वैष्णवी घृतयाज्या त्वं सोम पितृभिः संविदान
इति सौम्यस्य पितृमत्याय यजति निरायुतं सोमं यदभिषुण्वंति तस्यैतामनुस्तरणीं कुर्वन्ति यत्सौम्या। सौम्यस्य पितृमत्या
यजतीति सौम्यचरो रुभयतो घृतयाज्यौ द्वौ यागावनुष्ठेयौ। तत्राग्निदेवताकं विष्णुदेवताकाय तत्ते द्वे याज्ये घृतादेवनो द्व
न हृष्टा अग्निरित्याग्नेया प्रथमा याज्या तत्र विक्रमस्वेति वैष्णवी द्वितीया घृतयाज्या अस्ति कश्चित्सोमदेवताकश्चरुः तस्य
त्वं सोमेति सौमी याज्या तत्र पितृभिः संविदान इति निगदीर्यं पितृमतीनां याज्यां सौम्यचरोः पठेत्। तस्य चरोः पुरस्तादूर्ध्व
प्यायाज्यया घृतयागः उपरिष्टाद्वैष्णव्या याज्यया घृतयागः तत्र घृताद्भय माश्वलायनेन पठितं सौमी याज्या प्रशंसति
घ्नंति वा एतत्सोमं यदभिषुण्वंति तस्यैतामनुस्तरणीं कुर्वन्ति यत्सौम्यः पितृभ्यो वा अनुस्तरणीत्स्मात्सौम्यस्य पितृ
मत्याय जनीति। ऋचि जः सोममभिषुण्वंति तत्पदस्ति सोपं सोमस्य वध एव तत्रयः सौम्यश्चकरस्ति एनां सौम्यचरुरूपां

५।०

३९

तस्यमतस्यअनुस्तरणींकुर्वीतमृतस्यदीक्षितस्यदहनकालेकृष्णविषाणांगांहत्वादीक्षितावयवेषुगोरवयवान्‌वस्थापद
हेत्‌।सेयंगोर्मृतदीक्षितमनुमृतत्वादनुस्तरणीत्युच्यते।।सापितस्यैयोग्यातस्मात्सिद्धमत्सायाज्ययासोमस्यया
गस्यहविर्भजेत्‌।।घृतयागसहितंसोमयंचरुंसंगृह्णीयात्‌सेति।अवधिपूर्वोएतत्सोमंयदभ्युष्णुवुरस्वादेनपुनःसंज्ञा
सु वयतीति।ति।अन्यथेषुनुःअभिनःसोमसुन्वंनःइतियर्त्तिएतेनसोमम वधिपुष्ठैर्कविजोहन्तवेतएवतन्मस्मोदेनंव्यायेनसोमंद
नचरुभ्यायथापरिहारायसंभावयेतिसंग्रहेभ्यात्तस्यदेवनाद्वारा।पुनर्विस्तरेणवक्ष्यामोदक्षिणयति।।पुनराप्यायमंतिपु
पसदोरूपेणोपसदांकिव्येवतद्रूपयदेनादेवनाआनिसोमोविष्णुरिति।।योयंहतःसोमस्तसोमम्मुसदांरूपेणसंपा प
दितेनपुनराप्यायेति।अग्निःसोमोविष्णुरितियाएतास्तिस्त्रोदेवतास्तद्देवतुपसदामेवस्वरूपतत्राप्येतस्यदेवतात्रयस्य ३९
विद्यमानत्वात्‌।अथर्तोनुराज्यावेक्षणंविधत्ते।प्रतिगृह्यसोम्यंहोताघृतंवक्ष्यद्दोणेभ्यावेक्षेतेति।।कृत्स्नशेषंसोम्यंचरुंअघ
गुणादत्तंहोताप्रतिगृह्यतस्मध्येसिक्तंवकुलेघृतेजेद्दोणेभ्यासरेतितत्रथमकुर्यान्नवषट्‌कृताप्रथमःसर्वभक्षान्भक्ष
यन्नीतिहस्माहतेनैवरूपेणतस्मादषट्‌कृतेनवघृतंवीक्षेतेताध्येनर्द्दोणेभ्याहरंतीति।केवलयाज्ञिकाहानुराज्यावेक्षणं
पूर्वमेवतंघृतपुत्रंसोमयंचरुंद्दोणेभ्यःसमर्पयंति।तत्समर्पणंतथानकुर्यान्न्‌हविःशेषभक्षणंपुर्वषट्‌कृताहानाप्रथ
मःपूर्वशाखीसाहृयहविःशेषाद्भक्षयतिइत्येवमभिप्रायमतर्षिवाहस्मतस्माकारणात्तेनैवरूपेणभक्षणक्रमेणैवावे
क्षणोपिहोतेवप्रथमोपरित्यावेक्षेतानंतरमेवेनंसोमयंचरुंद्दोणेभ्यःसमर्पयेयुः।। ।।इतित्रयोदशाध्याये षष्ठःखण्डः।। ।।

अथाग्निमारुतं शस्त्रं वक्तव्यं तदर्थमादावुपाख्यानमाह ॥ प्रजापतिर्वै स्वां दुहितरमभ्यध्यायद्दिवमि
त्यन्य आहुरुषसमित्यन्ये तामृश्यो भूत्वा रोहितं भूतामभ्यैत्तं देवा अपश्यन्नकृतं वै प्रजाप
तिः करोतीति ते तमैच्छन्य एनमारिष्यत्येतम।न्योन्यस्मिन्नाविंदंस्तेषां या एव घोरतमास्तन्व आ
संस्ता एकधा समभरंस्ताः संभृता एष देवोऽभवत्तदस्यैतद्भूतवन्नामेति। पुरा कदाचित्प्रजापतिः स्वकीयां
दुहितरमभिलक्ष्य भार्यात्वेन ध्यानमकरोत्॥ तस्यां दुहितरि महर्षीणां मतभेद आसीत्। अन्ये
केचिन्महर्षयः दिवं द्युलोकदेवतां ध्यातवानित्याहुः। अपरे तु महर्षय उषसमुषःकालदेवतां ध्यानवानि
त्याहुः। तस्या मृगजातिविशेषत्वं तथा चाभिधानप्रकारमाह। गोकर्णमृगविशेषस्तु ऋश्य रोहिताख्यमरोम गाकृति॥ स प्रजापतिस्तथाविध
श्यो ऋश्योऽभवत् सा च दुहिता रोहितं लोहितं भूतामगात् ऋतुमती जातेत्यर्थः॥ एतादृशीं दुहितरं अभ्यध्यायत्। अभिगतवान्मिथुन
धर्मं प्राप्तवानित्यर्थः। तं दुहितृगामिनं प्रजापतिं देवाः परस्परमिदमब्रुवन् अयं प्रजापतिरकृतं वै अकर्तव्यमेव निषिद्धाचर
णं करोतीति विचार्य यः पुरुष एनं प्रजापतिमारिष्यत् आर्तिं प्रापयितुं समर्थस्तं तादृशं पुरुषं ऐच्छन्। अन्वेषणं कृतवन्तः। तदा चा
न्योन्यस्मिंस्तेषां मध्ये तं प्रजापतिघातकं नाविदन् नालभन्त नाहं हन्तुं शक्नोमि त्वं हन्तुमिति परस्परं स्पर्धमानस्य ह्येकस्याप्येकस्य शक्ति
राहित्यं निश्चितवन्तः। ततः सर्वेषु देवेषु या एव काश्चिद् घोरतमास्तन्वः अत्युग्राणि शरीराण्यासन् ताः सर्वा एकधा समभरन्नि
ळित्वैकमेव शरीरं कृतवन्तः। ता घोरतमास्तन्वः संभृताः एकत्वेन संपादिताः सन्तः एष देवोऽभवत् एष रुद्र इति तस्मान्नामदस्य

जा० ४०

रुद्रस्येत रुद्रोऽभिधीयते॥ तत्तस्मादेव घोरत्ववत्त्वात् अस्य लोके रुद्र इति प्रसिद्धं भूतवत् भूतशब्दोपेतं नामसंपन्नं भूतपतिरित्येतत् भूतवन्नाम
तद्येतस्य भुवस्तथानुगमाख्यमेतन्नाम। वेदनं प्रशंसति॥ भवति वै स योऽस्यैतदेवं नाम वेदेति। वेदिता भवति वैभूतिमानेव संप
द्यते। अथ तेन रुद्रेण सह देवानां संवादं दर्शयति॥ तं देवा अब्रुवन्नयं वै प्रजापतिरकृतमकरिमं विध्येति स तथेत्यब्रवीत्सवै
वो वरं वृणा इति वृणीष्वेति स एव वरमवृणीत पशूनामाधिपत्यं तदस्यैतत्पशुमन्नामेति। तं रुद्रं देवा एवमब्रुवन् देहेनायं प्रजा
पतिरकृतमकः अकृत्यं निषिद्धाचरणं कृतवान् तस्मादिमं विध्य बाणेन प्रहरेति सरुद्रस्तदंगीकृत्य वरत्वेन पशूनामा
धिपत्यं वृतवान् तस्मात्कारणात् अस्य रुद्रस्य एतल्लोके प्रसिद्धं पशुपतिरिति एतादृशं पशुशब्दोपेतं नामसंपन्नं रुद्र
तद्वेदनं प्रशंसति॥ पशुमान्भवति योऽस्यैतदेवं नाम वेदेति॥ अथ रुद्रप्रजापत्योर्वृत्तांतं दर्शयति। तमभ्यायत्याविध्यत्सविद्ध ४०
ग ऊर्ध्व उदप्रपतत्तमेतं मृग इत्याचक्षते य उ एव मृगव्याधः स उ एव स या रोहित्सा रोहिणी यो एवेषुस्त्रिकांडेति॥ स रुद्रः अभ्या
यत्य बाणयुक्तं धनुः अभितः आकृष्य तं प्रजापतिमविध्यत्। तत्र स्वयं मृगरूपः प्रजापतिर्विद्धः सन् ऊर्ध्वाभिमुखः उदप्रपतत्
प्रकर्षेणोत्पतनमकरोत्। तमेतमुत्पतितं स्वयं मृगरूपं प्रजापतिमाकाशे दृष्ट्वा सर्वे जना मृग इत्याचक्षते रोहिण्यार्द्रयोर्मा
नक्षत्रयोर्मध्यवस्थितं मृगशीर्षं नक्षत्रं कथयंति। नक्षत्ररूपेण निष्पन्न इत्यर्थः। य उ एव यः खलु रुद्रः मृगव्याधो मृगघाती स
रुद्र आकाशे दृश्यमानः स एव लोके प्रसिद्धो मृगव्याध आसीत्। या दुहिता रोहिता रोहिद्रूपवर्णा मृगी सेयमाकाशे रोहिणी
नक्षत्रमभवत्। यो एव या तु रुद्रेण प्रेरिता इषुः त्रिकांडा अनीकत्रयव्यस्ता अवयवत्रयोपेता सो एव सेषुर्लोके प्रसिद्धा

कां उत्तरयोपेतेषु ब्राणोऽभवत्॥ अथ मनुष्याख्यत्रिं दर्शयति॥ तद्वा इदं प्रजापते रेतः सिक्तमधावत्तद्देवा अब्रुवन्मेदं प्रजापते रे त्तस रोऽभव १
तो दुषदिति यदब्रुवन्मेदं प्रजापते रेतो दुषदिति तन्मादुषमभवत्तन्मादुषस्य मादुषत्वं ह वै नामैतद्यन्मानुषं तन्मादुषं सन्मा
नुषमित्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवा इति॥ मृगरूपेण प्रजापतिना यद्रेतो मृग्यां सिक्तं तदेवेदमतिबहुत्वात्
भूमौ पतितं तत्प्रवाहरूपेण धावत् न तु क्वचित्स्थितम्। तद्देशो वस्थाय प्रौढसरोऽभवत्। तद्देवा एवमब्रुवन्। प्रजापते रिदं रेतो मा
दुष्टं भूदस्तु त्वयेति मा दुषदिति। यस्मान्मादुषादिति अब्रुवन् तस्माद्दोषरहितस्य रेतसो मादुषमिति नामसंपन्नं जनास्तद का
रस्थाने नकारं प्रक्षिप्य यस्मान्मानुषमिति यद्व्यवहरन्ति प्रिया दिक्षा बीरमायक्षते तद्रूपं तो देवावरणे न दोषरहित
त्वान्नाम्ना मादुषमेव तथा सति मादुषनामयोग्यमपि यच्छरीरं परोक्षेण नाम्ना व्यवहरन्ति व्यमिस्पष्टि ... वर्णव्यत्ययेन
मानुषमित्याचक्षते यस्माल्लोके देवव स्पष्ट्यात नमपुरुषाः परोक्षप्रिया इव हि देवाः अयञ्च मातापितृनिमित्तेदं वदन्ना
दिनाम्नि नकारमिति कुर्वन्ति तस्मात्परोक्षत्वाय नकारप्रक्षेपो युज्यते॥ ॥इति त्रयोदशाध्याये नवमः खण्डः॥ ॥अथादि
त्यादिदेवतास्तां दर्शयति॥ तदग्निना पर्यादधुस्तन्मरुतोऽधून्वंस्तदग्निर्न प्राच्यावयत्तदग्निना वैश्वानरेण पर्याद
धुस्तन्मरुतोऽधून्वंस्तदग्निर्वैश्वानरः प्राच्यावयत्तस्य यद्रेतसः प्रथममुददीप्यत तदसावादित्योऽभवद्यद्द्वितीयमा
सीत्तद्भृगुरभवत्तं वरुणो न्यगृह्णीत तस्मात्स भृगुर्वारुणिरथ यत्तृतीयमदीदेदिव त आदित्या अभवन्ये ऽङ्गारा आसं
स्तेऽङ्गिरसोऽभवन् यदङ्गाराः पुनरवशान्ता उददीप्यन्त तद्बृहस्पतिरभवदिति॥ प्रजापतेः संबंधि यद्रेतो देवैर्द

रदितेन कृतेन तेजसा तेन देवा अग्निना पर्यादिधुः परिविष्टितवन्तः रूपेणावस्थितस्य रेतसो दाहेन द्रवीभावं निवारितुं प
रितो ग्निं विश्वज्वालितवन्तः सूर्यः। तदग्निः प्रज्वलितेन दाहरूतो वायुवत्तेजसो धून्वन्तु शोषणाय वायुः सम्यक् अकुर्वत सो
ऽग्निस्तेजसा तान गच्छ्याचय तेन द्रवीभावात्मच्युतनाकरोन्। उद्ववबाकुल्यासिद्धाकार एव तेनु नाशको दित्यर्थः। वैश्वानरो नाम कश्चि
दग्निविशेषप्राणिनामुदरेषु प्राविश्यान्नपानादिकं पाचयति। तथा च भगवतोक्तं॥ अहं वैश्वानरो भूत्वा प्राणिनां दे
हमाश्रितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधमिति। तेन वैश्वानराख्येन नाम केनाग्नि विशेषेण तेजसः पूर्ववत् पर्याद
धुः। देवैरग्नौ प्रक्षिप्ते सति मरुतः तेजसः पूर्ववद्धून्वन्। सोऽयं वैश्वानराग्निस्तेजसो द्रवीभावात्मच्युतमकरोन्। तस्य जरोभूतस्य
रेतसो यः प्रथमः पिंडरूपं उद्दीप्यतेऽदीप्यत मारतूत तद्रूपम् असौ दिवि दृश्यमान आदित्यो भवत्। ह्यतो यत्पिंडरूपमा ४१
सीत् तद्दृषिर्भृगुरभवत्। तं भृगुं वरुणो न्यगृह्णीत निगृह्य स्वपुत्रत्वेन कृतवान्। तस्मात् स भृगुर्वारुणिरित्युच्यते वरुणस्या
पत्यं वारुणिः। एतदेवाभिप्रेत्यैतरीयाः आमनन्ति। भृगुर्वै वारुणिः। वरुणं पितरमुपससारेति। अथानन्तरं तेजसो यत् पिंडरू
पं नदीदे दिवं अतिशयेन दीप्तिमिवासीत्। तत आदित्याः अदितेः पुत्रा देवविशेषा अभवन्। पूर्वम् आदित्यशब्देन मंडलव
त्र र्ती सूर्य उक्तः। अत्र अदितेः पुत्रा इति द्वादश उच्यते येऽरे तेषां नित्यहिताः संज्ञा उद्दीप्यन्त उत्कर्षणं दीप्तास्ते सर्वे बृहस्पतिर
भवन्। पिंडाद्दग्धा संतो अंगारा अभवन्ते सर्वेऽप्यंगिरसो नामकाः ऋषयोऽभवन्। पुनरपि तत्र यदंगारा ये केचिदंगारा अ
शांताः तेषां नित्यहिताः संतः उद्दीप्यन्त उत्कर्षणं दीप्तास्ते सर्वे बृहस्पतिरभवन्॥ अथ पशुसृष्टिं दर्शयति॥ यानि परिक्षाणि

हमि~~स्य~~ति तमेत पश्चो निरवादयं तयेषा रौद्री

न्यासीत्स्तेन ह ह्यः प्रजावोऽन्याऽछादिनी मृत्तिका ते रोहिता। अथ यद्भस्मासीत्तत्पुरुषो व्यसर्पद्गौरो गवय ऋष्यऽ
ष्ट्रो गर्दभ इति ये चैतेऽरुणाः पशवस्ते चेति। अङ्गारेषु चा ते पुनरभ्यानिकोऽलवणो न्यासुरकाष्ठानि ते ह ह्यः ह लवणो पशु
वो भुवन्। अग्निदाहेन भस्मोऽयालोऽहिनीरलवणा मृत्तिका तिष्ठति ते रोहिता रलवणाः पशवो भुवन्। अथाग्निस्थाने यद्भ
स्मासीत्तत्पुरुषं पुरुषशरीरजातं भूत्वा व्यसर्पत् विविधमरण्यादावगच्छत् किं तत्स्वरूपमिति। तदेवोच्यते गौरो
गवय ऋश्य इति एते रण्यमृगा इति उष्ट्रगर्दभो ग्रामसिद्धो एवमादिकं पुरुषशरीर ये चैते रुणाः पशवस्तेन व्यसर्पते
स्वमुपास्थानेनाग्निमारुतेशास्त्रस्योपोद्घातमभिधाय तस्मिन्शस्त्रे सूनी यामेकामृचं विनियुंक्ते॥ तान्वा एष दे
वोऽभ्यवदत मम वा इदं मम वै वास्तुहमिति तमेतयर्चा निरवादयं तयेषा रौद्री शस्यत इति॥ तान्चेतानेव पशून् सर्वो
न भिन्नउक्षेव रुद्रो देव इदं सर्वं ममेवैस्य ब्रवीत् तत्रोपपत्तिर्वो कामान्वा वास्तु इदं वास्तो यज्ञ भस्मौ हानं यद्द्व्यमक्तेन तस्मा वास्तुह
द्वै ममेति श्रुत्यन्तरेपि प्रसिद्धं तथा चैतेन्नैरीया रुद्रवाक्यमाम्नाति यद्यहे वास्तो हीयते मम वैत दिति। तं रुद्रं सर्वान्
पशून्वभिगच्छंतमेत यावक्ष्यमाणयर्चा निरवादयंति निरपक्षमकुर्वंत तया तु ष्टो रुद्रः पशूनपेक्षांपरित्यजति। का
सा ऋगिति सोच्यते। एषा रौद्री रुद्र देवताका शस्यते सा वर्गनव्याख्यः पादत्रयं पठति॥ आ ते पितर्मरुतां सुम्नमेतु
मा नः सूर्यस्य संदृशो युयोथाः। त्वं नो वीरो अर्वति क्षमेथा इति। मरुतां देवानां हे पितः हे रुद्र ते तव सुम्नं सुखं ए
तु आगच्छतु नो अस्मान् सूर्यस्य संदृशः सूर्यावलोकनं आ युयोथाः मा वियोजय यद्वा प्रसुक्तान्कुर्वि स्यथः किं च

हे रुद्र वीरस्य जवेति अश्वादिवत् निक्षेप्यथाः सदि त्वं नु अस्मदीयान् अश्वादिवत् निमा विवास पेत्सथैः। तृतीयपाद
स्य त्वं नो वीर इत्यत्र सः पाठः। अभिनो वीर इति शाखान्तरपाठः। तयोर्मध्ये पाठमन्यतरं विधाय पाठान्तरं निषेधति। इति ब्रू
यात् भिन इत्यनभिमानुको हे घदेवः प्रजाभुवनीति। इत्यनेन पूर्वोक्तप्रकारेण त्वं नो वीर इति पाठमेव शंसनकाले ब्रूया
त्। अभिन इति पाठं न ब्रूयात्। त्वं नो वीर इति पाठे स्तुति एषदेवः प्रजा अनभिमानुको न भवति अभिमानुको भिनो वी
र इति पाठान्तरे जलिशाखस्य विघातानवान् पुत्रादिकाः प्रजा अभिलक्ष्य नाशयिष्यामीति रुद्रो मनुते। त्वं न इति पाठे नु न त
थे त्सथैः। चतुर्थपादेपि स्वाभिमतपाठविधिपूर्वकं पाठान्तरं विधत्ते। प्रजायेमहि रुद्र प्रजाभिरिति ब्रूयान्न रुद्रस्येत्यस्यैव
नाम्नः परिहृत्य इति। हे रुद्रिय रुद्रसंबन्धिन् त्वदनुज्ञया वयं प्रजाभिः प्रजायेमहि पुत्रपौत्रादिरूपेणोत्पद्येमहि। अ ४२
स्मिन्यादे रुद्रियमित्येतमेव पाठं ब्रूयात्। न रुद्रेति पाठं तस्यैव रुद्रनाम्नः उग्रस्य परिहाराय रुद्रियेति पाठादेशः।
आजेपित इत्यस्याः ऋचः स्थाने काचिदन्यामृचं विधत्ते॥ तदु खलु शं नः करती सर्वं शंसेत् शिमिमित्राणि पद्यते सर्वस्मा एव
शंसेत् नष्यो नो दिव्यो गाव इति पुमांसो वनक्रियो नार्यः सर्वस्मा एव शंस्या इति। तदु खलु तत्रैव पूर्वामृचं परिस्य उपत
स्या एव स्थाने शं नः करत्यर्वं त इत्येनामृचं शंसेत् तथा सति क्रोत्रो भु इति तदुच्यते। तस्या ऋच आदौ शामिस्येनु नप
देन प्रतिपद्येत। प्रारंभः क्रियते। तस्य पदस्य शांतिवाचकत्वात् सर्वस्मै सर्वस्यापि स्वकीयस्य वक्तानः शांतिर्भवति।
सर्वस्मा इत्यस्य विवरणं नष्य इत्यादि तस्यापि व्याख्यानं पुमांस इत्यादि सर्वस्मा एव शंस्या इत्युपसंहारः। प्रका

रौनरेण नामत्रयमन्त्रं शंसति। सो निरुक्तो ऽराड्री ञ्नां नृ सर्वायुः सर्वायुत्वायेति। सो साध्नग निरुक्तात् इ वृत्रचक्षुर्दामा वादस्य
दैवताकानन्तरं एव रोडाश इन्द्र देवताकास्त्यपि प्रधानार्थवाचकं ऋष्यद्रष्टुत्वादियुक्तो न तं नूनं सरूदोत। सर्वायुर्भवति। नत्वयज्ञमा
नस्य सर्वायुत्वाय संपद्यते। वेदनप्रशंसति। सर्वमायुरेतिय एवं वेदेति। पुनरपि त्र्यक्षानरेण त्र्यृचं शंसति। सो गायत्री ब्रह्मवै
गायत्री ब्रह्मणैवैनं तं नमस्यन्तीति। सो सानु गायत्री छन्दस्का च ब्राह्मणजातिरेव उभयोः प्रजापतिमुखजत्वात्। अनो ब्रा
ह्मणैवैव ब्राह्मणेनैव एनं ऋइं नमस्करोति॥ ॥इति त्रयोदशाध्याये द्वितीयः खण्डः॥ ॥अथ वैश्वानरीयं प्रपद्यु पाजसे पिवद्य
नस्य केनाग्निमारुतशस्त्रस्य प्रारंभं विधत्ते। वैश्वानरीयेणाग्निमारुतं प्रतिपद्यते वैश्वानरो वा एतद्रेतः सिक्तं प्राच्यावयते। तः
स्माद्वैश्वानरीयेणाग्निमारुतं प्रतिपद्यत इति। रेतसः प्रच्यवने काठिन्यापादनं तस्मिन्वैश्वानरीयस्य हेतोः किं विहितं प्रोष
विधत्ते। अनवानं प्रथमामृचं शंसेदग्नीचाएवावीष्य ग्नीतान्धः सीदन्तीति य आग्निमारुतं शंसति प्राणेनैव नद्य नि
न स्तरन्तीति॥ अनवानं हृन्नोच्छ्वासनिश्वासोऽव्यवधानेनैव यथा न भवेत् तथा प्रथमामृचं शंसेत्। आजय्यासस्य यो ग्नी वै
ज्वालारूपा नग्नी नैवेष होता ञ्नां नाकूचाप्रसीदन्नासादं कुर्वन्नेति गच्छति यः पुमानाग्निमारुतं शस्त्रं शंसति। तस्य
कृशादेहेतु तत्कथमिति तदुच्यते। उच्छ्वासनिश्वासनिरोधात् अनवानं शंसन् प्राणवायुरेव नानग्नीन्तरति। उल्लुपय
ति अभिक्रान्तमुपद्रवं रामयन्तीत्यर्थः। शंसनकाले प्रमादितस्य वर्णादिलोपरूपस्यापराधस्य प्रतिकारं द्रष्टुं यति
अधीयन्नुपहन्यात् एवं कारमिद्धेन्नमेव नः सेतु कृशानरनीति। अधीयन् आधायानः शंसनं कुर्वन्नहोता यथा प

भा०२

४२ दन्यात्तु पदनन्तं वर्णस्थोपाद्दिरूपं कुर्यात्तदानीं अन्यं कं चित् पुरुषं विवक्षारं विविच्य वक्तुं समर्थमिच्छेत्। समीपे चस्थापये
त् तदानीं तमेव पुरुषं अपराधत्तरणोपायसेतुं स्थानमपराधमुल्लंघयति॥ अयं पक्षोक्तिः कल्पो मुख्यं नु पक्षं दर्शयति। त
स्मात् दाग्निमारुतेन तु धर्मं मेष्टव्यो विवक्षेति। यस्मात् प्रमादं कृ वा विविक्तं पुरुषं संपादनं न मुख्यं तस्मात् दाग्निमारुतेन शास्त्रे
ण सुखं पश्चाद्धि विच्यन वक्तव्यं किं तु प्रथममेव विवक्षां विविच्य वक्तव्यं समर्थो हि तात् एष्टव्यः प्रयत्नेन संपादनीयः॥ अथ प्रत्न मा
क्षसः प्रतवसे इति मरुद्देवताके सूक्ते विधत्ते॥ मारुतं शंसति मरुतो नाह वा एतद्रेतः सिक्तं च्यावयन्ति तस्मात् मारुतं शंसति
ति मरुतां धूननेन प्रजापतिरेतः स्थापयेदेवमेवातो॥ अथ प्रगाथद्वयं विधत्ते॥ यज्ञायज्ञा वो अग्नये देवो वो द्रविणोदा इति मध्ये
योनिं चानुरूपं च शंसति तस्मान्मध्ये योनिं धत्ते॥ यज्ञायज्ञावक्तव्ये कः प्रगाथः। ४२
देवो वो द्रविणोदा इति द्वितीयः। तत्र प्रथमे प्रगाथे न चः संपद्यते सोयं स्तोत्रियस्तस्मिन्नस्त्रे चे सामगेनगायमानत्वात् अ
त एवासौ हृदयोर्मध्ये प्रथमं आविर्भावितो ऽत्र योनिरित्युच्यते द्वितीय प्रगाथे सम्मुखं नकारो वानुरूपः स्यादशस्तोत्रियः
स्तोऽहमात्त्वमनुरूपत्वेन दे तदुभयं शास्त्रस्य मध्ये शंसनीयं न तु शस्त्रांतरेष्वियं स्तोत्रियानुरूपयोर्वादोशंसनीयं तथा
सति यस्मादत्र सूक्ते मध्ये योन्यनुरूपस्य शंसनं तस्माल्लोकेपि नारीणां शरीरमध्ये योनिर्धृता शास्त्रमध्ये तयो
स्थानविशेषं दर्शयति॥ यत्तु दूस्सूक्ते शस्त्रात्शंसति जातिष्ठयोरेव नतुपरिष्टात्सृजनं दधाति प्रजात्या इति॥ यद्यु य
स्मादेव कारणात् एव कारणाद्वैश्वानरीयं मारुतं चेति द्वे सूक्ते शस्त्रात्पश्चाद्देनं स्तोत्रियानुरूपौ शंसति तस्मात्कारणा

द्विस्त्रीस्वापेतयोः अनिष्टयोंस्थितिहेतोः पादयोरेवोपरिष्टादूर्ध्वदेशोपजननं प्रजोत्पादकं इंद्रियद्वयमिति तत्र प्रजायै प्रजो
त्पादनाय संपद्येत ॥ वेदनं प्रशंसति ॥ प्रजायते प्रजया पशुभिर्य एवं वेदेति ॥ ॥ इति त्रयोदशाध्याये एकादशः खंडः ॥ ॥ अ
थ प्रजनयसीमिष्टेन ज्ञातवेदोस्य देवताकं सूक्तं विधत्ते ॥ जातवेदस्यं शंसतीति ॥ तदेतन्मंत्रं शंसति ॥ प्रजापतिः प्रजा असृज
त ताः सृष्टाः पराच्य एवायन् न व्यावर्तंत ता अग्निना पर्यगच्छत् ता अग्निमुपावर्तंत तमेवाद्याप्युपावृत्ताः सोऽब्रवीज्जाता वै प्रजा अ
नेनाविदमिति यदब्रवीज्जाता वै प्रजा अनेनाविदमिति तज्जातवेदस्यमभवत् ज्ञातवेदसो जातवेदस्त्वमिति ॥ पुरा प्रजा
पतिना सृष्टाः प्रजाः पतिं पृष्ठतः कृत्वा पराङ्मुखत्वेनैव गच्छन्न पुनरावृत्ताः तदानीं प्रजापतिस्ताः प्रजा अग्निना पर्यगच्छ
त् परितोऽग्निप्राकारं कृतवान् अनंतरं प्रजा दूरं गंतुमशक्ताः अग्निमुपेत्य पुनरावर्तंत ॥ यस्मादद्यापि ताः प्रजाः त
मेवाग्निमुपावृत्ताः पितरो गच्छन्सोऽप्यग्निर्दृश्यो समीपे सवितुमावर्तंते तासु दृष्टः स प्रजापतिरेवमब्रवीत् जाता उ सन्त्वा याः प्रजा
जातास्ताः सर्वा अहमनेनाग्निनाविदं लब्धवानस्मीति वा यस्माज्जाता अविदमनेनेत्युक्तवांस्तस्मादग्निसं
बंधि सूक्तं जातवेदस्यमभवत् जातवेदसोऽग्नेरपि जातान्वेसनेनेति व्युत्पत्त्या नाम संपन्नं ॥ ओपाहिष्ठा मयो भुव इत्या
दिकं तृचं विधत्ते ॥ ता अग्निना परिगता निरुद्धाः शोचंतो दीध्यंतोऽतिष्ठंस्ता अद्भिरभ्यषिंचत्तस्मादुपरिष्टाज्जातवेदस्य
स्याया आपोहिष्ठीयं शंसंतीति ॥ अग्निना परिगताः परितो वेष्टिता वेष्टितेनानिरुद्धाः गंतुमशक्ताः शोचंतः शोकं प्राप्नुवंतो दीध्य
तो दीप्यमानाः प्रजास्तत्रैवातिष्ठन् प्रजापतिस्ताः प्रजाः संतापपरिहाराय अद्भिरभ्यषिंचत् यस्मादेवं तस्माज्जातवेदा
स्येस्य सूक्तस्योपरिष्टादापोहिष्ठेत्यादिकं तृचं शंसेत् ॥ अत्र किंचिद्विशेषं विधत्ते ॥ तस्माच्छमयेतेवत्रीस्तव्यैता अ

६४

अङ्गिरोभिर्विच्छिन्नाङ्गास्यैवामन्यतेति। यस्मादापो हि श्लिष्टीयंतापुनः शमनकारणं तस्मात्तच्छमयत्येव दोषाशंसनीयं। यथा वह्नि
शमयन्पुरुषः शनैः शनैः क्रमेण जलं सिंचति एवमनेनापि शनैः शमनं कर्त्तव्यं ततः स प्रजापतिस्ताः प्रजा अङ्गिरोभिर्वि
च्छिन्ना एव स्वकीया एवताः प्रजा इत्यमन्यत तस्यां शाखायां तच्छब्दपर्यायः एकवचनान्तोपि बहुवचनान्तत्वेन परिणामयितव्यः।
तथासति ताः प्रजा इत्यकर्मणुवर्तिता तस्माच्छनैः शमनेनैतास्त्वस्य स्वकीयत्वं संपद्यत इत्यर्थः। यद्वा ताभिरङ्गिरस्याद्य धृष्ट एवादः
उक्तस्तोमत्वेन योजनीयः। ततो दिर्बुध्न्य इत्यस्यार्थः वःशंसनं तद्वता सूक्तिद्वारेणोन्नयति। तास्तु तदा अहिना बुध्न्येन
परोक्षात्तेजो दधात् एष वा अहिर्बुध्न्यो यदग्निर्गार्हपत्योऽग्निनैवास्तु तमार्हपत्येन परोक्षात्तेजो दधाति तस्मादाहुर्जुह्वद्देवा
जुहुतो वसीयानिति। तास्वभिषेकादूर्ध्वं स्वकीयासु प्रजासु संप्रतिरहिना बुध्न्येन अहिर्बुध्न्य इति शब्दद्वयं नाम का ४४
ग्निविशेषेण परोक्षरूपेण तेजो दधातु। प्रजानां संतापशीकत्वात्तायथा न पश्यंति तथा तास्वग्निविशेषसंबंधि तेजः स्था
पितवान् यो गार्हपत्योऽग्निरस्ति एष एवाहिर्बुध्न्य शब्देनाभिहितः अनेन दीयाशंसनेन सति गार्हपत्येनैवाग्निना प्रजासु परो
क्षत्वेन तेजः स्थापयति यस्मादाग्नेयं तेजोऽपेक्षितं तस्मात् जुह्वतो होमरहितात् पुरुषात् जुहृद्देवहोमं कुर्वाण एव पुरुषो
वसीयान् अत्यंतं श्रेष्ठ इत्येवं जना आहुः॥ ॥इति त्रयोदशाध्याये द्वादशः खंडः॥ ॥अथ देवानां पत्नीरित्यादिखंडोक्तं
न इत्यन्यद्वयं देवताकं विधत्ते॥ देवानां पत्नीः शंसस्तत्वा रम्ने गृहपतिं तस्मादन्नी पत्नी गार्हपत्यमास्त इति॥ देवा
नां पत्नीरित्यनेन देवतावाचकेन शब्देन तत्प्रतिपादकमन्त्रद्वयं विवक्षितं। ताश्च पत्नीः गृहपतिमग्निमनु शंसेत्

यितुमारभ्यते। तेवा इमे इतरे छंदसी गायत्रीमभ्यवदेतां वित्तं नावक्षराण्यनुपर्यागुरिति। ते एवं ब्रूवीतां गायत्रीं यथावित्तं नो
वन इति ते देवेषु प्रश्नमैतां ते देवा अब्रुवन् यथावित्तमेव व इति तस्माद्ध्याप्येतर्हि वित्त्या व्याहुर्यथावित्तमेव न इति ता ते
वा अष्टाक्षरा गायत्र्यभुवन् त्र्यक्षरा त्रिष्टुबेकाक्षरा जगती साष्टाक्षरा गायत्र्यभूत्। ये त्रिष्टुप्जगत्योः स्वकीयान्यक्षरा
णि परित्यक्तवत्यौ नेष्टे ये से इतरे गायत्रीं प्रति विरुद्धे छंदसी गायत्री मत्स्वत्व्य समागत्य वेमुक्तवत्यौ दृगो यत्त्रियत्वया वि
त्तं उद्धृत्य अधिकमक्षरचतुष्टयं न दत्तं नौ त्रिष्टुप्जगत्योरावयोः तत्तस्मात् नौ निवर्त्यार्य क्षराणि अनुमन्यि। पुः आवां त्रिष्टुप्
जगत्यावनुउद्धृत्य पर्याविस्य गच्छतीति। गायत्र्या तयोर्वचने नेति निराकृते नचैतातुपपत्तिमब्रूवीतां नोस्माकं यथावित्तं न मे
वउद्धृत्य न निक्रम्य आवृत्य स्वामि चेयुः यद्गुत्यये न उद्धृत्य न तस्यैव वस्तित्वि लौकिको न्यायः। तं न्यायं निर्णेतुं ते त्रिष्टुप्
जगत्यौ देवेषु प्रश्नमैतां आगतौ हे देवाः कथं न्याय्यमिति तयोः प्रश्नः ते च देवा उत्तरमेवमब्रुवन् आवां युष्माकं तिस्रणां
यथावित्तमेवाक्षरस्वीकारो युक्त इति यस्माद्देवैरेवमुक्तं तस्मात्तत एव कारणादिदानीमपि वित्त्याक लि चिमुक्त्वा वस्य २५
उद्धृत्य स्वोत्सर्वा आहुः। विप्रतिपन्ने प्रति न्यायाभिज्ञा एवमाहुः। नोस्माकं सर्वेषामपि उद्धृत्य मनतिक्रम्य एव वस्तुस्वी
कारो युक्त इति। युद्धाय स्वयं सजिपरस्मेनायां विद्रुपयेन यद्धु भवति तेनैव तत्स्वयं एव तु रणामभिप्रायः। देवैर्न्यो
य निर्णीते सति इदं गायत्री स्वकीयैः स्वाभाविकाभिः इत्वत्वरक्षरैः युद्धाद्धृतैरन्यैश्चतुरक्षरैरपि स्वयमष्टाक्षराभू
त्। त्रिष्टुप् एवं विद्यमाने प्रथममनुष्टुभु काक्षरस्य गतत्वात् त्र्यक्षरैरेव सा। तथा जगत्यपि त्र्यक्षरेषु अक्षरत्रयस्य गतत्वात्
एकाक्षरैरेवसाभवत्। इदानीं त्रिष्टुबेकाक्षरत्रयादधिकानामक्षराणां प्राप्तिप्रकारं दर्शयति। साष्टाक्षरा गायत्र्यभूत्:

रा का रव्यादेवता सोव्यन्ति दृढ बर्हीः करोति तस्मात् दीयामर्च्यं ह्वासेत् वेदत प्रहासन्ति। पुमांसो स्य पुत्रा जाया यं तेयप एवं वेदेति।
पावीरवी कन्या सेनाम मृत्युं विधत्ते॥ पावीरवी ह्वासन्ति वाग्वै सरस्वती पावीरवी वाक्येवतद्वाचं दधातीति। ये यं वा गच्छिमा सिनीस
रस्वती देवता स्विवास्य स्तो घस्यदे त्वासावीरवीं न सप्तेन वाक्येव देवता यां मंत्र रूपां वाचं स्थापयति॥ अत्र विचार मवतार य
ति तदाकु यो मीपूर्वां ह्रासेत् पितृ आदि इतीति। इमं यम प्रस्तरे त्येषा यमदेवताधायामी। उदीर नामवर इत्येषा पितृदेवता। तासिन्याउभ
युयोः पौर्वापर्यकारणस्या निश्चयाद्विचारः तदर्थोपरि तिः अत्र निर्णयं दर्शयति। याभी मे वह्र वीह्रा सेदिमं यम प्रस्तरमाहि
सीदेति राह्वा वै श्वपर्यं तस्मा याम्यामेव पूर्वां ह्वासेदिति॥ यमो हि राजा। यमः पितॄणां राजेति श्रुत्यंतरात्। यस्मा प्रथमं याम्य
मुखे पूर्वं तिः याम्यानंतर अन्या यामी विधत्ते॥ मातली कव्ये यमो अंगिरोभिरिति काव्यानामनुवीह्रासस्सवरेणैव वै देवान्का ४८
व्याः परेणैव पितॄंस्तस्मात्काव्यानामन्वीह्रासन्तीति॥ कव्यैरिति श्रुतावुक्तायं काव्यानामृक् सा च पूर्वोक्तामृचमनु पश्चात्
गच्छतीत्यन्वीतां तथैव ह्रासेत्। काव्या देवानां स्तोतारः केचिदथ मंदेवता जातिविशेषाः पितृभ्यस्तु त्तम जातीयाः एते देवदेवा
नवरेणाणि तन्यरेणस्तुष्यते॥ अत एवमु काया म्याव क्ष्यमाणायः पित्र्यायाश्च मध्ये तच्छंसनं युक्तं॥ अथ तिस्रः पितृदेव
ता का न्से यो विधत्ते। उदीरतामवर उत्परा स इति पित्र्याः ह्वासन्तीति। उदाहृतं पादं द्वितीये तपादेन सह द्व्यात्स्वधा द्विती
यं पादं पठति। उन्मध्यमाः पितरः सोम्यास इति। पादद्वयं व्याचष्टे। ये चैवावमा ये च परमा ये च मध्यमास्तान्सर्वानने
रा युं चीणातीति। अवरे निकृष्टाः पितर उदीरता उत्कर्षेण गच्छंतु। परा सत् उत्कृष्टाः पितर उदीरताः। तथा मध्यमानि
कृष्टोत्कृष्ट मध्यवर्तिनः पितर उदीरताः ते त्रिविधाः पितरः। सोम्यासः सोमयोग्या इत्यसेतस्य पादद्वयस्य पाठेन विविधान

प था पिवित्रनु अनेन तरा पूर्वस्याप्यनंतरायौं न भवतीति तथा तर्पयति ॥ विहिता स्तुतिस्तक्ष प्रथमायामुदाहृता वादनेनर आविंनो हितो
यामृचं विधत्तेऽमव दर्शयति । आहं पितॄन्सु विदत्रां अविसीति द्वितीयां शंसती ति तस्याश्चरचतुर्थीयपादमनूद्य व्याचष्टे ॥ बर्हि
षदो य स्वधया सुतस्य स्येतद्व वा एषां प्रियं धाम यद्बर्हिषद इति प्रियेणैवैनांस्तद्धाम्ना समर्धयतीति ॥ बर्हिषि सीदं रूप वित्रा
तीति बर्हिषदः पितरः अच्वर्हिषद इति यदुच्यते तद्वैवैतद्व बर्हिरेषां पितॄणां प्रियं स्थानं तस्मादेतत्पाठेनैव पितॄन्प्रिये
णैव धाम्ना स्थानेन समृद्धान्करोति विदनेत्र्यृ सति । प्रियेण धाम्ना समृध्यते य एवं वेदेति ॥ तृतीयामृचं दर्शयति ॥ इदं पितृ
भ्यो नमो अस्त्वद्येति नमस्कारवतीमंततः शंसतीति तस्मादंततः पितृभ्यो नमस्क्रियंत इति ॥ अस्यामृचि नमो अस्त्विति श्रू
यमाणत्वान्नूर्यैन नमस्कारवती नामेतां विस्तर्णां पित्र्याणां अंते शंसेत् यस्मादृग्द्वयमिति नमो वः पितर इत्यादिना पितृभ्यो
नमस्कारः क्रियते एतास्तिस्रः पित्र्यास्त्र्यचं विहितो ऽपविचार्य निर्णयं दर्शयति ॥ तदाहुर्व्याहावं पित्र्याः शंसे ३ न ३ व्याहावा ३
इति व्याहावमेव शंसेदसंस्थितं वै पितृयज्ञस्य साध्वसंस्थितं वा एष पितृयज्ञं संस्थापयति यो व्याहावं शंसतीति तस्मा
द्व्याहावमेव शंसतमिति । शोंसावोमिति मंत्र आहावः अनेन मंत्रेण प्रत्यृचं आहुः तावं विशेषेणाहू याहूयति स्तोः ति
व्याः शंसेत् । अहोस्विदव्याहावं पृथक् पृथक् आहावमंत्रं विना शंसेदिति विचारे ब्रह्मवादिन आहुः । अत्रपित्र्याः शं
सतीत्येकेनैव विधिना विहितत्वात् पृथक्पृथगाहावो नास्तीति पक्षः । प्रतिज्ञाति पुनरपि द्वितीयां शंसति । नमस्कारवती
ति शंसतीति पृथग्विधिदर्शनात् प्रत्येकमाहावः कर्तव्य इत्यभि प्रतिज्ञाति । विचार्य पुनि सिद्धं पं । तत्र पृथक्पृथगा
हावइत्येव सिद्धांतः तत्वेयमुपपत्तिः पितृयज्ञस्य संबंधि पदे नाम संस्थितमेवव त्वेते

अस्मान्निर्ऋतिर्हन्ति तद्दशासाकं समाप्तं कृत्वे अपोहोना पृथक् पृथक् कुम्भाद्दावञ्जनात्रीसमित्र एषहोना पृथिवी मस्तु स्थितं अस्मात्
पितृयज्ञं संस्थापयति समापयति तस्मात् पृथक् पृथक् गाहावमन्त्रैः पृथिवैव दशात्रव्या ॥ ॥ इति त्रयोदशाध्याये त्रयोदशः खण्डः ॥ ॥
अथ च नस्तोऽत्र चो विधत्ते । स्वादुष्किलायं मधुमाँ उतायमिति ऊरस्येद्दशारस्य पानीयाः त्रीस स्येनाभिवाई इन्द्रस्तृतीयसवनमन्वपि
बन्नद्दनुपानीयानामनुपानीयात्वमिति ॥ स्वादुष्किलेत्यादिका ऋचः ऐन्द्र्यः इन्द्रदेवताकत्वात् पिबा सम्मिन्द्र मितीन्द्रस्तृतीयपा
दे स्रूयतेनाम्बेऽत्पानीयास्तु ऊर्ध्वं यसानं तस्य श्वाद्भाविलादनुपानं तस्थानीयाः एता ऋचः ताः शंसेत् कथमेतासामनुपा
नीयत्वमिति निरुच्यते । अथमिन्द्रस्तृतीयसवने मनुपश्चाद्देनाभिर्ऋग्भिः शस्यमानैः सन्तू सोममपिबन् तस्माद्दनुपानीये
ति नाम संपन्नं । एतच्छंसनकाले धर्येः प्रतिगरणमन्त्रे विशेषं विधत्ते । माद्यन्तीवेयेन दिवनाय देवाहोतारी सतिनस्माद्
देतास्तु मदन्तीति गीर्यमिति । तस्मिन्ननुपानीयानामृचां शंसनकाले होतुः शंसनेऽन्या देवताः सर्वा माद्यन्तीवेव सर्वथा ४६
हृष्यन्से वत तस्मात् कारणादेतासु ऋक्षु शस्यमानासु अध्वर्युणा मदन्तीति गीर्यं मदिधातुयुक्तं प्रतिगरणं पठनीयं । मद्
मोदे वेसयीमदिधातुयुक्तः प्रतिगरमन्त्रः । अगीनर विधत्ते । पयोराजस्तस्कृष्टितारजांसीति वैष्णुवारुणमनृचं शंसतीति वि
ष्णुर्वै यज्ञस्य दुरिष्टं पाति वरुणः स्विष्टं तयोरुभयोरेव शान्त्याहुति । विष्णुर्वरुणश्चेति मिलित्वा देवता यस्या ऋचः सा वैष्णु
वारुणी तां त्र्यस्त्रेजपे छंसेदित्यर्थः । तस्याश्चतुर्थपादे विष्णु जगद्वे तणे निश्रवूणानु वैष्णुवारुणी तैसायाश्चलायनेन
पठितां दुरिष्टं भागविकल्प यनु अनुष्ठितं तद्विष्णुः पाति विकल्पं निवारयतीत्यर्थः । स्विष्टं साकल्येनयद्यागमनुष्ठितं तद्वरु
णः पाति तस्य फलप्रतिबन्धं निवारयतीत्यर्थः । तस्मादियन्न कयोरुभयोर्विष्णुवरुणयोरेव शान्त्यै प्रीत्यै संपद्यते ॥ अ

गंतरं विधत्ते ॥ विष्णोर्नु कं वीर्याणि प्रवोचमिति वैष्णवीं शंसति यथा वै मत्यमेवं यज्ञस्य विष्णुस्तद्यथा दुष्कृष्टं दुर्मतीकृतं सुकृष्टं सु
मतीकृतं कुर्वन्नियादेवमेवैनेन यज्ञस्य दुष्टुतं दुःशस्तं सुष्टुतं सुशस्तं कुर्वन्तो यंति ये वैनां होतारः शंसंतीति ॥ विष्णोर्वितिष्ठ यमापा
तादं वेत्ति वीमत्यं बुद्ध्या सम्यक्तेन प्रतिज्ञातं कार्यमसंजयं दृष्टांतः विष्णु दार्ष्टांतिकः ॥ यथा मत्स्यैकार्ये लोके फलपर्यवसायी उप
तिस्तथा विष्णुरपि फलपर्यवसायी यज्ञस्य पं उक्तमर्थं दृष्टांतदार्ष्टांतिकयोरन्वयप्रदर्शनेन प्रपंचयति ॥ यथा लोके दुष्कृष्टे
कृषीकैः सृष्टस्थाने दोषयुक्ते यथावर्तित तत्कर्षणं कृतं यत्किंचिद्राजकार्यं मनासम्यक्तु र्मतीकृतं दुष्टमनं अन्यथा विचिंतित
प्रयत्नकार्यमदुर्मतं सत् पश्चाद्बुद्धिमद्भिर्दुर्मतं संपादितं तत्र कृषिबुद्धिमान्कर्षकः क्षेत्रस्थानं दुष्टस्य तत्त्वानादेरपनयनेन
सुकृष्टं कुर्वन्नियात् । कर्षकस्य पृष्ठतो गच्छेत् । राजकार्येपि दुर्बुद्धिनामात्येन दुर्मतीकृतं कार्यं कश्चित्सुबुद्धिरमात्यः सुम
तीकुर्वन्गच्छेत् । यथैतदुभयं लोके एवमेवास्मिन्कर्मणि यज्ञसंबंधिप्रस्तोत्रमकुत्राद्धैः मस्तुतं सुष्टुतं दुष्टृभिः ॥ दोषसं
तीकृतं यदपि होतृभिः शस्त्रं दोषसहितं पठितं तदुभयमयं विष्णुः क्रमेण सुष्टुतं सुशस्तं कुर्वन्नितिगच्छति । उभयत्र दो
षपरिहरतीत्यर्थः ॥ यद्धा वैष्णवमिनां होतारः शंसंति तदानुभयसाधनमिति द्रष्टव्यं ॥ अग्नेतरं विधत्ते ॥ तंतुं तन्वन्रजसो
भानुमन्विहीति प्राजापत्यां शंसति प्रजा वै तंतुः प्रजामेवास्मा एतत्संतनोतीति ॥ अस्यामृचि काचिद्देवता साक्षाद
श्यकृष्टं नोक्ता तस्मादियमृक् अनिरुक्ता तादृश्याश्च प्रजापतिर्देवताकत्वं पूर्वमेव निरूपितं नामेतो प्राजापत्यत्वं से
प्रादिप्रजापतेर्नंतुं तन्वन्नपुत्रपौत्रादिसंततिविस्तारयन्नरजसो रंजनात्मकस्य जगतो भानुं प्रकाशकमादित्यमन्विहि अ

नुगच्छत्यादित्यो हि पुनः पुनः संचरन्नहोरात्रनिष्पत्तिं करोति। तत्कालानुसारेण यज्ञमपि संतानवृद्धिं कुर्वित्यर्थः। अक्षिमन्या
हि तन्तुशब्देन पुत्रपौत्रादिप्रजा विवक्षिता तन्तुर्विस्तार्यमाणत्वात्। तस्मादनेन सादपाठेनास्मै यजमानाय प्रजामेव संतनोति। अ
विच्छिन्नां करोति। द्वितीयपादमनूद्य व्याचष्टे। ज्योतिष्मतः पथो रक्ष धिया कृतानिति देवयाना वै ज्योतिष्मन्तः पन्थानस्तान्
वास्मा एतद्वितनोति। हे प्रजापते धिया बुद्ध्या कृतान् यागानुष्ठानबुद्ध्या संपादितान् ज्योतिष्मतः प्रकाशयुक्तान् पथः स्वर्गमार्गा
न् रक्ष। विघ्नपरिहारेण पालय। अत्र ज्योतिष्मत्स्थिरादृष्टाभ्यो देवयानमार्गा विवक्षिताः देवा येषु मार्गेषु यान्ति गच्छन्ति ते दे
वयानाः देवानां सर्वेषां तेजस्वित्वात् तन्मार्गेष्वनुकूलादित्यप्रकाशोऽस्ति। तस्मादनेन सादपाठेनास्मै यजमानाय तानेव मार्गा
न् वितनोति विस्तारयति। उत्तरार्धमनूद्य व्याचष्टे। अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनमित्येवैनं तन्मनोः ४७
प्रजयास्तनोति प्रजास्य इति। पुनः पुनः कर्मसु गच्छतीति प्रवर्तते इति अनुष्ठानशीलत्वाज्जोगुवाः इत्युच्यते तेन हे ऋत्विजो जोगुवो क
अस्मत्संतानावुत्पन्नानां पुत्रादीनामपेक्षणीयमानमेतत्कर्म अनुल्बणमनतिरिक्तं वयत हे प्रजापते वयत निर्वर्तय बहुव
चनं प्रजार्थं। मनुर्भव त्वमेव मनुष्योत्पादनार्थं मनुरूपो भव। ततो दैव्यं देवताराधनयोग्यं जनं पुत्रादिरूपं मनुष्यमुत्पा
दय। तदनेनार्धपाठेन एनं यजमानं मनोः संबन्धिन्या प्रजया मनुष्यरूपया संतनोति संयोजयति। तच्च प्रजास्य यजमानस्य
प्रजोत्पादनाय संपद्यते। वेदनं प्रशंसति। प्रजायते प्रजया पशुभिर्य एवं वेदेति। ऋगन्तरेण द्वास्यस्य समाप्तिं विधत्ते।
एवा न इन्द्रो मघवा विरप्शी। इत्यनया परिदधाति। इयं वा इन्द्रो मघवा विरप्शी इति। योऽयमिन्द्रोऽस्ति सोऽयं न एवास्मदर्थमेव

करोत्विति द्वितीयपादेन वक्ष्यमाणेन संबंधः। कीदृशः इंद्रः मघवा धनवान् विरप्शी रप्शी महान् तस्य इदं तस्मात् ज्ञानोत्कर्षमनोयं शास्त्रविशे
षेण राजते स्यवान् सर्वदा कुरु इदं सर्वथा। अनयर्चा तमयाज्यां प्रापयितुं यातिम या परिधानं कुर्यात् उदाहृते प्रथमपादे इंद्रादि
शब्दैः सर्वैरपीयं वै भूमिरेवोपलक्ष्यते। अनया भूमिस्तुतिः स्पृविधास्यमानत्वात् प्रथमपादं व्याख्याय द्वितीयपादमन्वयव्या
चष्टे। करत्सत्यं चर्षणीधृतं अनवर्तीयं वै सत्यां चर्षणीधृदनवर्तीति। चर्षणीशब्दो मनुष्यवाची तान् धारयतीति चर्षणीधृत् इंद्रः
सोयमनवीरथं परित्यज्य यागभूमो उपविष्टत्वात् अध्वरदिनः माहृशाः सन् सत्यफलप्रदानस्यावश्यकत्वेन सत्यानि
कार्माणि करतु। करोतु विघ्नपरिहारेण संपादयतु। अस्मिन्नपि पादे सत्यादिपदैः पूर्ववदियं भूमिरेवोपलक्षणीया।
तृतीयपादमन्वयव्याचष्टे। त्वं राजा जनुषां धेयस्मे इति यं वै राजा जनुषामिति। जनुषां जनानां अस्मे अस्माकं नर्त्य
जीदेइ त्वं राजा ... वक्ष्यमाणमभीष्टं संपादय। अस्मिन्नपि पादे राजा जनुषामिति पदद्वयेन पूर्ववदियं भू
मिरेवोपलक्षणीया। चतुर्थपादमन्वयव्याचष्टे। अधिश्रवो माहिनं यज्जरित्र इति यं वै माहिनं यशः श्रवो यजमानो ज
रिता यजमानायैवैनामादिष्टमात्रा ... जरित्रे स्तोत्रे यजमानाय प्रस्तुतिं ... मदितं श्रवः कीर्तिं च अधिधेहि निरवर्णा
न्वयः ... समाधिक्येन संपादयेत्यर्थः। अस्मिन्नपि पादे माहिनमिति सनेनेयं भूमिरेवोपलक्षणीया यय ... पुंस्त्व
लिंगाय इति पुंल्लिंगत्वेन परिणमयितव्यः तेन या यज्ञ इति प्रसिद्धं यज्ञेमाचष्टे। सोपि द्वयं वै भूमिरेव कीर्तिताधि
नाश्च वा राष्ट्रेनापि भूमिरेवोपलक्ष्यते। यजमानो जरित्रा ष्टनाभिधेयः। एतत् पादचतुष्टयेन होता यजमानार्थमेव

शस्त्रमासीनीयं सर्वं शास्त्रार्थ्यते। परिधानकाले होतुर्भूमिस्पर्शनं विधत्ते। तदुपस्पृशन्भूमिं परिदध्यात् यस्यामेव यज्ञं सं-
भरति तस्यामेवैनं तदन्ततः प्रतिष्ठापयति। तत्र शस्त्रस्य समाप्तिकाले भूमिं स्पृशन्नेव परिदध्यात् समापयेत् तेनैनं स्पृष्ट्वा-
नेनानेन यस्यामेव भूमौ यज्ञमनुष्ठातुं साधनं संभरति संपादयति। तत्तस्यामेव भूमावेवैनं यज्ञं तदन्ततस्तत्समा-
प्तिपर्यन्तं प्रतिष्ठापयति। अथ शस्त्रयाज्यां विधत्ते। अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिरित्याग्निमारुतमनु वषट्कृत्य शस्त्वा-
ग्निमारुत्या यजति यथाभागं तद्देवताः प्रीणाति प्रीणानीति। अग्निर्मरुतश्च यस्योक्थस्य शस्त्रस्य देवता त-
दाग्निमारुतमुक्थं सर्वं शस्त्रप्रकारेण शस्त्वा। तदूर्ध्वमग्ने मरुद्भिरित्येतयाग्निमारुत्या यजेत। आग्निमा-
रुतीयाज्यां पठेदित्यर्थः। तया सति तस्मिन्शस्त्रे प्रतिपादितायाः देवताः सतीताः सर्वाः ततस्ताभि-
मनतिक्रम्य तर्पयति। अन्त्यासो ध्यायस मास्यर्थः॥ ॥इति श्रीमाधवीये वेदार्थप्रकाशे ऐतरेय-
ब्राह्मणे त्रयोदशाध्यायस्य चतुर्थः खण्डः समाप्तः त्रयोदशोऽध्यायः॥ त्रयोदशे सोमक्रयः प्राक्कीर्तितो राजक्र-
यार्थी स्वर्वनान्विजानाति स्याद्दैक्ष्यदर्वचमकत्वनीयं तत्र द्वितीयापादु दिनाः क्रमेण॥ पूर्वाध्याये शुक्लो ग्निष्टोमे सर्वं यज्ञक्रतु-
नीश्रुतितिवेन श्रूयते॥ तदर्थमुपाख्यानमाह॥ देवा वा असुरैर्युद्धमुपप्रायन्विजयाय नानभिनो नु कामयन्ते तु तदेवा
अब्रुवन्नग्निमेव स्मार्क वृत्वे मक्कोसीति स नो मक्कज्ञो न्वेष्यामौ त्यब्रवीत् त्सु तनुमे तनिनयेतिनं तेसमुक्तो प्योपनिहृसा स्त-
वेन्नेता न्सुतेनानुप्रस्त्रि श्रेणीर्हृत्वा दिना॥ देवाश्चाग्निं जयार्थं असुरैः सह युद्धमुपप्राय युद्धे उपक्रांतवंतः इदानीम

४८

ग्निस्तो देवाननुपश्यान् एतुमागन्तुं नाकामयत नाग्निमिच्छन्त देवा एवमेवाब्रुवन् दे अग्ने त्वमप्येहि आगच्छ अस्मा
कमेव मे ध्यत्वमेको सि न त्वस्मान्त्वान्यद्दृतिन ततः सो ग्निरेवमब्रवीत् युष्माभिरस्म ततः सन्नद्ध नान्वेष्यामि युष्माकं पृष्ठेनान
गमिष्यामि तस्मान्मामन्वेष्टि ग्रमे वस्तु तस्माच्चकुरु नेति देवास्तथेत्यंगीकृत्य समनुगम्यो ... योपनि त्र्यान्तर त्रिषु
स्वत्वेन निवृत्तिकृतवान् मामग्निमस्तु वपुः सो ऽप्यग्निस्ततः सन्नद्ध देवाननु ... प्रकर्षेणागच्छ तु अग्ने
युद्ध प्रकारं दर्शयति। सत्रिः श्रेणिर्न ... लाघ्यनीकास्तु ... त्रिः श्रेणि ... दास्य वश्च नीर कृत्वा
तत्स्थनीकानि सवनान्येवानीकानि नाम संज्ञा ... पराभावयन्तो वै देवा असुरान् असुरा इति सोग्निर्विजयार्थं त्रिः
श्रेणिः सोमपानं पंक्तिं च ययुः ... अनीकः त्रिभिरनीकैः सेनापतिरूपैः सेनाम् असुरैर्युद्धकाले सुरानति युद्धमुपेत्य सप्तायन्त
तत्सवीप प्रकर्षेण गतवान् त्रिश्रेणीरिति पदं ... तत्र गायत्री त्रिष्टुप् जगती रूपाणि ... दास्य वति स्त्रः श्रेणीकृतानि
पदु अनीकद्वयं कृत्वा ततः सवनैर्माध्यंदिनं सवनेन तृतीयसवनान्येवं ... ण्यनीकानि सेनान्तु ... कुर्वन्ततस्तानसुरान्
पुनः ... पराभव ... ततो वै देवा विजयिनो भवन् असुराः परा
भूताः विदन् एवं ... एवमग्निष्टुद्दशत्रय सवनत्रय
युक्तो ऽग्निष्टोमः ... कारणाग्निष्टोमस्य ... प्रकामोत्तरेण स्तोति।। ता वा एषा गायत्र्येव यदग्नि
ष्टोमश्चतुर्विंशत्यक्षरा वै गायत्री चतुर्विंशतिरग्निष्टोमस्य स्तोत्राण्येव।। यो यं पूर्वो ऽग्निष्टोमो ऽस्ति सा वा एषा

गायत्र्येव अग्निष्टोमगायत्र्योः संख्यासाम्याद्गायत्रीगतेषु अक्षरेषु यासंख्या सैवाग्निष्टोमगतेषु स्तोत्रशस्त्रेषु न यथाव
द्विष्पवमानो माध्यंदिनपवमानः आर्भवः पवमान इति। त्रीणि पवमानस्तोत्राणि चत्वार्याज्यस्तोत्राणि चत्वारि पृष्ठस्तोत्राणि
एकं यज्ञायज्ञीयस्तोत्रं एवमेतानि द्वादशसंपन्नानि शस्त्राण्यपि तावं स एव आज्यप्रउगे निष्केवल्ये मरुत्वतीये वैश्वदे
वाग्निमारुतमिति होतुः शस्त्राणि षट् तथा होत्रकाणामपि षट् एवं स्तोत्रशस्त्रसंख्यया अग्निष्टोमस्य गायत्रीरूपत्वं
कारान्तरेण गायत्र्याः सर्वस्य संपाद्य स्तौति। यद्वै यदि द्विमाहुः सुधायां दैवे वाजी सुकृतो दधातीति गायत्र्यैवैतन्नदिवे
गायत्री स्म भारमतं ऊर्ध्वा आहवाय प्राप्य यजमानमादाय स्वर्गे नेति। नहैतयैव यज्ञस उपायां वेदवादिनो यदि देवचनमाहु
र्दिवं वचनमिति निरुच्यते। सुष्टु धीयते सुकृतिनाय स्यां द्वि विसाधोः सुधायां स्वामेव वाजी वाजो मे सोम कल्पेन दक्षि
ति अग्निष्टोमेऽनुच्यते सर्वं सुकृतिनः साङ्गुण्येनानुष्ठितः दधाति सुधायां स्थापयति यदि वियजमानं स्थापयति प्रदेवा
दिनो वचनं तस्मा यन्न वे गायत्री साम्यमाउ प्रैसे वा गम्मि निजर्थं। न ह्वा इत्यादिना तदेव स्पष्टं क्रियते। क्षमेति स
स्य यो विवक्षितः। क्षमा यो भर्मे गायत्र्या आरब्धा देवतानहे वे रमते नेव क्रीड इति किं वेपाया गायत्री नु ऊर्ध्वगामिन्येव भरतानुष्ठि
तवेतं यजमानमादाय स्वर्गे लोके गच्छतीति एवं प्रकारेण ये ये गायत्रीवर्णिता न गायत्री रूपोऽग्निष्टोम एव नेयोः
समतानु अग्निष्टोमोऽपि क्षमायां न रमते किं तु अनुष्ठितः ऊर्ध्वगामी स्वर्गं प्रापयजमानमादाय स्वर्गं प्राप्नोति। इहै गाय
त्री साम्येन स्तुत्वा संवत्सर साम्येन स्तौति। स वा एष संवत्सर एव यदग्निष्टोमश्चतुर्विंशः स धर्मात्मा वै संवत्सरः अनुविं
त्रानि रग्निष्टोमस्य स्तोत्रशस्त्राणीति। यो यमग्निष्टोमः स एष संवत्सर एव अर्धमाससंख्यायाः स्तोत्रशस्त्रसंख्या

याश्च समानत्वात्॥ समुद्रस्यास्मिन् दृष्टान्तः॥ तद्यथा समुद्रं स्रोत्याः एवं सर्वे यज्ञक्रतवोऽपियन्तीति॥ स्रोत्याः स्रवत्स्वरूपा नद्यो
यथा लोके समुद्रं प्राप्नुवन्ति तद्वैवान्यस्य षोडशरूपतिरात्रादीनि रूपाः सर्वे क्रतवो विकृतिरूपाः प्रकृतिरूपमग्निष्टोममपयन्ति।
प्राप्नुवन्ति अग्निष्टोमात्मशाखीनो द्वहिः पशुप्रधानादयो यान्यग्निष्टोमं प्राप्नुवन्ति तथा सति सर्वे शाखाद्यामुत्पत्त्याः सर्पपदतेनत्
संकोचः॥ इति चतुर्दशाध्याये प्रथमः खण्डः॥ ॥अग्निष्टोमादयो नानायज्ञानामग्निष्टोमप्राप्तिं दर्शयति॥ दीक्षणी
येष्टिस्तापनेनामेवानुयाः काम्येष्टयस्ताः सर्वा अग्निष्टोममपियन्ति॥ अग्निष्टोमस्य प्रारम्भे ये यदीक्षणीयेष्टिस्ताय
नेविस्तार्थं तेतामनुन स्यादन्ययेन वेदोक्ताः सर्वा अपीष्टयोऽग्निष्टोमं प्राप्नुवन्ति। अत्र विकृतिरूपा एवेष्टयो विवक्षिताः प्र
कृतिरूपयोर्दर्शपूर्णमासयोर्वक्ष्यमाणत्वाद्दीक्षणीयेष्टिगतचोदकप्राप्तेडोपह्वानसादृश्येन पाकयज्ञानामग्निष्टोमप्रा
प्तिं दर्शयति॥ इडामुपह्वयत इडाविधा वै पाकयज्ञा इडामेवानुयन्ति पाकयज्ञास्ते सर्वेऽग्निष्टोममपयन्तीति॥ पाकयज्ञा
श्च सप्त संस्थाकाः हुतः प्रहुतः आहुतः शूलगवो बलिहरणं प्रत्यवरोहणमष्टकाहोम इति॥ सोऽयमत्रोत्तरकारस्य पक्षः
अश्वलायनस्त्वहुतादीस्त्रीनेव पाकयज्ञानाह। नैव पाकयज्ञाः इडाविधाः इडासदृशाः। इडा खल्वनुवेषा पाकयज्ञप्र
तिकृत्येन तरात्। नत्वादीक्षणीयेष्टौ इडोपाह्वानेन तत्सदृशाः पाकयज्ञाः सर्वेप्यग्निष्टोमं प्राप्नुवन्ति। अग्निहोत्रस्य प्राप्तिं
दर्शयति॥ सायंप्रातरग्निहोत्रस्य प्राप्तिं दर्शयति॥ सायंप्रातरग्निहोत्रं जुहोति सायंप्रातर्व्रतं प्रयच्छंति स्वाहाकारेणाग्नि
होत्रं जुहोति स्वाहाकारेण व्रतं प्रयच्छंति स्वाहाकारमेवान्वग्निहोत्रमग्निष्टोममप्येतीति॥ यथा व्रतिदिने काल

श्रौ०३

द्वयोऽग्निहोत्रहोमतः तथा दाक्षिणस्य काळद्वये क्षीरपानरूपव्रतदानं। अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति यथा स्वाहा
कारेणाग्निहोत्रहोमः तथान्तेनर्पीतुनेनोर्वनुते भ्यो नमस्साभ्यां स्वाहेति स्वाहाकारेण दाक्षिणे व्रतप्रदानमावर
ति। अतो व्रतगतस्वाहाकारमेवानुसृत्याग्निष्टोमप्राप्तिः। अग्निष्टोमगतप्रायणीयेष्टिस्साहचर्येण दर्शपूर्णमास
योरग्निष्टोमप्राप्तिं दर्शयति। पंचदश प्रायणीये सामिधेनीरन्वाह पंचदश दर्शपूर्णमासयोः प्रायणीयमेवानु दर्श
पूर्णमासावग्निष्टोममपीतः इति प्रायणीयेष्टिकर्मणि धाय्यारहितत्वान् सामिधेन्यः पञ्चदश प्राप्ताः पंचदशैव तथा प्रक
ति तत्तयोर्दर्शपूर्णमासयोरपि अग्निष्टोमगतसोमगतसोमद्वारो लौकिकानामपि सर्वेषां ओषधीनामग्निष्टो
मप्राप्तिं दर्शयति। सोमे राजनि क्रीणे त्योषधयो वै सोमो राजौषधिभिरेषज्यन्ति यंभिषज्यन्ति सोमसमेव राजानं क्रियमा
णमनु यानि कानिच भेषजानि तानि सर्वाण्यग्निष्टोममपि यन्तीति लोके यं व्याधिग्रस्तं चिकित्सकाभिषज्यन्ति चिकि ८०
त्सन्ते तेन पुरुषं ओषधिभिरस्मत्तवल्यादिभिश्चिकित्सन्ते। सोमस्यौषधयो राजानमनु सर्वाण्योषधान्यग्निष्टोमं प्रानु
वंति॥ अग्निष्टोमगतातिथ्यकर्मद्वारा चातुर्मास्ययागानां प्राप्तिं दर्शयति॥ अग्निमातिथ्ये मंथंत्यग्निं चातुर्मास्ये
ष्वातिथ्यमेवानु चातुर्मास्यान्यग्निष्टोममपि यन्तीति॥ आतिथ्यायामग्निमंथनं विहितं चातुर्मास्यपर्वस्वपि मंथनं
विहितं तदुभयत्र मंथनधर्मसाम्यान् आतिथ्यानि सहद्वारानि चातुर्मास्यान्यग्निष्टोमं यन्ति। एवं च साम्येन दाक्षा
यणयज्ञस्याग्निष्टोमप्राप्तिं दर्शयति। पयस्याप्रवर्ग्यैवरेति पयस्या दाक्षायणयज्ञे प्रवर्ग्यमेवानु दाक्षायण

यज्ञोप्यग्निष्टोममप्येति॥ दर्शपूर्णमासयोरेव गुणविकृतिरूपः कश्चिद्दाक्षायणाख्यो यज्ञस्तथा शाखान्तरे दर्शपूर्णमासौ-
सन्निधावाम्नायते॥ दाक्षायणयज्ञेन स्वर्गकामो यजेतेति तस्य च तद्वर्ग्यस्य च क्षीरद्रव्यसाम्येन च वर्ग्यसदृशो दाक्षाय-
णयज्ञोप्यग्निष्टोममेति॥ पशुबन्धानामग्निष्टोमप्राप्तिं दर्शयति॥ पशुरूपवसथे च वतिनमेवानुयेके च पशुबन्धास्ते सर्वे
ग्निष्टोममपियन्तीति॥ सुत्यादिवसात्पूर्वदिवस उपवसथाख्यः तस्मिन्नग्नीषोमीयः पशुरनुष्ठीयते तद्विकृतिरूपाचे-
ष्टकाः सर्वपशुबन्धाः पशुद्रव्यसाम्यादग्नीषोमीयसदृशाः सर्वपशुबन्धा अप्यग्निष्टोममेयन्ति॥ इडादधानामकस्य-
चिद्यज्ञतरस्याग्निष्टोमप्राप्तिं दर्शयति॥ इडादधो नाम यज्ञक्रतुस्तं दधावरतिर्वा दाधिघर्ममेवाग्निष्टोममप्येतीति॥ दर्श-
पूर्णमासविकृतिरूप एव कश्चिदिडादधनामको यज्ञोस्ति अत एवायं सर्वोपि दर्शपूर्णमाससन्निधावेवमाह॥ एतेनेडा-
दधसावर्गेनियज्ञो वसिष्ठयज्ञः शौनकयज्ञो व्याख्याताः इति॥ दधिघर्मनामकः कश्चिदग्निष्टोमगतः कश्चिद्दधियागस्ते-
नमध्यंदिने चरन्ति॥ इडादधोपि दधिद्रव्यकः अतस्तयोरुभयोर्दधिद्रव्येणसाम्याद्दधिघर्मसदृशादिडादधो नित्यमग्नि-
ष्टोममेति॥ ॥इति चतुर्दशाध्याये द्वितीयः खण्डः॥ ॥ केषांचन राणामग्निष्टोमप्राप्तिं दर्शयति॥ इतिष्ठपुरस्ताद्धर्मोपरिष्टा-
च्च दशोक्थ्यस्य स्तोत्राणि पञ्चदशातिरात्रस्तोत्राणि समासो नाम यास्संवत्सरो विहितः संवत्सरोग्निर्वैश्वानरेणाग्निरग्निष्टो-
मः संवत्सरमेवाप्नुवन्त्याग्निष्टोममप्युक्थ्यमपियन्ति महाव्रतं वाजपेयोप्युक्थ्यो हि सम्भवतीति॥ इति तु पूर्वखण्डोक्तेनै-
व प्रकारेण पुरस्तादग्निष्टोमानुप्राचानस्यकर्म आनस्याग्निष्टोममवेवर्तत इतः इतिशेषः॥ अथानन्तरं तत्परिष्ठामादि

नेरेषां ऋतूनां शवेद्भाउच्यते। तत्र योयमुच्यते ऋतुः तस्य पंचदश संख्याकानि स्तोत्राणि अग्निष्टोमे विकृतिस्तत्र द्वौ यानि द्वा
दशस्तोत्राणि जातानि द्वितीये नो नवत्र द्वौ त्राणि उक्थ्यसंज्ञकानि स्तोत्राणि वा पंचदश संपद्यन्ते। तत्र प्रथमं यो यो ऽयं:
तानि स्तोत्राणि च शास्त्राणि च मिलित्वा मासगतानां रात्रिसंख्यां प्राप्नुवन्ति। अतः सोयं स्तोत्रशास्त्रसमूहो मासः संपद्यते मा
सधा मासप्रकारेण मासात्मकः संवत्सरो विहितः संपादितो भवति। एवं संवत्सरो वैश्वानराग्निरूपः गर्भे प्रविष्टस्य
पुरुषस्य संवत्सरमात्रेण वृद्धार्थं तस्य अग्नेः पाटवसंभवात् अग्निष्टोमस्वरूपः पूर्वोक्तप्रयोगात्। स्तोत्राणि च
यत्र पैनौ यत्र पुरुषेणचाग्ने रेवाग्निष्टोमरूपेणाविर्भावात्। एवं सति उक्थ्यास्य: ऋतुः स्तोत्रशस्त्रादि परंपरया
संवत्सरमेवात्तु प्रविश्य तद्वदाग्निष्टोमे प्रविष्टानि प्रविष्टानि उक्थ्यानु वाजपेयस्यापि ऋतुर्नग्नेन प्राप्येति त्राणि निसहितवा
जपेयात्मकस्य उक्थ्यानुवर्तितुं उक्थ्यानुक्ते ऋतुः अतिक्रम्य वर्तमानत्वात् उक्थ्येयानि पंचदशस्तोत्राणि तत्र उक्थ्ये वाजपेयस्तोत्रद्वयं सो
यमुक्थ्यातिक्रमेन तस्मात् उक्थ्याद्वारा वाजपेयस्य मन्त्राप्तिः॥ अथातिरात्रप्राप्तियुमि यो ऽत्र अग्निष्टोमप्रवेशो दर्शयति॥ द्वा
दशरात्रैः पर्यायाः सर्वे पंचदशास्ते द्वौ द्वौ संपद्य त्रिंशद्वेदे विंशत्यो मासस्य त्रिंशद्धि सा त्रिंशत्समासस्त्रिंशन्मासस्य
रात्रयो मासस्य संवत्सरो विहितः संवत्सरोग्निर्वैश्वानरोग्निरग्निष्टोमः संवत्सरमेवान्वतिरात्रोग्निष्टोममप्येतिरा
त्रमप्यत्र मन्त्रमात्रेर्गमोप्येति स्पतिरात्रो हि संभवतीति॥ अतिरात्रयागे द्वादशसंख्याका रात्रेः पर्यायाः तेवापशस्ते वे
स्पष्टीकृताः। अतिरात्रे शंसेषो ... यो यमस्तु ... पंचदश ... गणेभ्यो राजानमतिरेव युनि पाउ ... 
यं रात्रिपर्यायैः प्रथरन्ति होता च मस्म मनुस्वः प्रथमगणो मैत्रावरुणव मस्म मनुस्वः द्वितीयो ब्राह्मणाच्छंसि च मस्म मनुस्वः

८१

तृतीयोऽच्छावाकचमसस्तमुख्यश्चतुर्थः। प्रथमाभ्यां गणाभ्यामध्वर्युः प्रचरति उत्तराभ्यां प्रतिप्रस्थाता एषः प्रथमः पर्याय एवं विहितो द्विती
यस्येति। अस्यायमर्थः। अतिरात्रसंस्थे क्रतौ अग्निष्टोमवदनुतिष्ठति इदानीं चोदकप्राप्तं सर्वमनुष्ठाय अनन्तरं सायंकाले षोडशिग्रहं सं
वीर्य नश्यमसानूरयित्वा तत ऊर्ध्वं त्रयोदशचमसगणपर्याप्तं सोममवस्थाप्य षोडशिग्रहप्रचारं कृत्वा तत ऊर्ध्वं रात्रिप
र्यायैः प्रचरेत्। तेषु पर्यायेषु होतृचमसादिकल्पनामिषु चतुर्षु प्रथमद्वितीयाभ्यामध्वर्युरनुतिष्ठेत्। तृतीयचतुर्थाभ्यां
प्रतिप्रस्थाताऽनुतिष्ठेत्। एवं गणचतुष्टयानुष्ठानमेकः पर्यायो भवति। पुनरपि द्वितीयस्तृतीयः पर्यायो तथैवानुष्ठेयो।
तेषु पर्यायेषु द्वादशगणाः संपद्यन्ते। एतत्सर्वमभिप्रेत्य द्वादशरात्रेः पर्यायाः इत्युक्तं। तेषु वेपि पञ्चदशाः। तदीयस्तोत्रेत स
मतीनामृचो विनियोगविशेषेण पञ्चदशस्तोमस्य सामगैः संपादितत्वात्रे पञ्चदशस्तोममनुकारा द्वादशपर्यायाः संति तेषु द्वौ द्वौ
पर्यायौ संपद्य मिलित्वा पञ्चदशसंख्याया द्विरावृत्त्या त्रिंशत्संख्यातसर्वं पर्यवस्यन्ति। द्वितीय षोडशिस्तोत्रे च यन्नामासि
तदेकविंशं भवति। तदा यत्र च गणानामृचो आहूताः सामगैः रेकविंशतिस्तोमसंपादनात्। योऽयमतिरात्रसंस्थाने स्म
धिरेतन्नामकं स्तोत्रं तन्त्रिवृत्स्तोमः सामगैः प्रयुक्तः। तस्य च स्तोमस्य त्रिरनुवृत्ते त्रय्यावृत्तिसंख्यादि पूर्ववद्योजनीयं। एवं सति
व-संख्याद् अतिरात्रे अग्निष्टोमे चतुर्विंशतिः पञ्चविंशतमतिरात्रमनुसंधारेण स्तोत्रमपि पञ्चविंशति संख्यातिरात्रमतिरिच्य
स्तोत्राधिक्ये न वर्तमानत्वात्। अस्यातिरात्रः एकोनत्रिंशत्स्तोमाः स्युः। अतिरात्रादौ यामेषु त्रयस्त्रिंशदादि साधिक्यं अति
तिरात्रद्वारा आप्तोर्यामस्याग्निष्टोमे प्रवेशात् उक्तं सर्वयज्ञकतवं रूपसंहरति। एतद्वै यच्च पुनस्ताद्दृष्टोपरिष्टा
द्यज्ञक्रतवस्ते सर्वेऽग्निष्टोममपियन्तीति। एतद्वै एतेन वाक्यप्रकारेणाग्निष्टोमस्य पूर्वभाविनः द्वाग्निहोत्रादयो ये य

रेकेन नवः ये चोत्तरस्मिन् उक्थ्यवाजपेयादयो यज्ञक्रतवस्ते सर्वे अग्निष्टोमं ग्रामनुवर्तिता अथ प्रकारान्तरेणाग्निष्टोमं संस्त्रीसनि तस्य
संस्तुतस्य नवतिशतं स्तोत्रियाः सा या नवतिस्ते दश त्रिवृतो यथा नवतिस्ते दश ग्राम्यया दशतां साम्येकोऽस्ति त्रियो दति त्रिवृ
त परिशिष्यते सा साबे के विंशी ध्याहिता स्तपति विषुवा चोए एष स्तोमानां दशवा एतस्माद वां यस्त्रिवृतो दशापरां चो मध्य एष ए
कविंश उभयतो ध्यादितस्तपति न घासो स्तोत्रियादेति सेतस्मिन् ... यजमानस्तदेवं क्षत्रं सहो बलमिति। तस्या
ग्निष्टोमस्या ... संस्तुतस्य स्तोत्रियाः स्तोत्रे सर्वधिष्ण्यो ... नवत्यधिकशतं संपद्यते कथमिति चेन्नृतदुच्यते प्रातःसवने
बहिष्पवमानाख्यमेकं स्तोत्रं तस्य त्रिवृत्स्तोमः त्रिवृत्स्तोमस्य आवृत्तिरहितत्वाद् विद्यमानप्रकृतेषु विद्यमाना नव च स्तोत्रियाः अथै
तन्नूर्ध्वे चत्वार्याज्यस्तोत्राणि तेषु एकैकस्मिन् विद्यमानानां तिसृणाम् आवृत्तिविशेषेण पञ्चदशस्तोमः संपादनीयः तथा सत्येकैक ८२
स्मिन् स्तोत्रे पञ्चदशार्चं इत्येव चतुर्षु स्तोत्रेषु मिलित्वा षष्टिः संपद्यते तदेवं प्रातःसवने एकोनसप्ततिः। माध्यंदिनसवने माध्यं
दिनपवमानाख्यमेकं स्तोत्रं तस्यापि पञ्चदशस्तोमयुक्तत्वात् स्तोत्रियाः पञ्चदश संपद्यन्ते च त्वारि पृष्ठस्तोत्राणि तेषु सप्त
दशस्तोमयुक्तेन सप्तषष्टिसंख्याकाः स्तोत्रियाः भवन्ति मिलित्वा माध्यंदिनसवने अशीतिः संपद्यते तृतीयसवने आर्भव
पवमानस्तोत्रं तस्य सप्तदशस्तोमोपेतत्वात् सप्तदशत्वं यज्ञायज्ञीयस्तोत्रस्यैकविंशस्तोमोपेतत्वात् तत्रैकविंशतिः
मिलित्वा तृतीयसवने षट्त्रिंशत् एवं सवनत्रये मिलित्वा नवत्यधिकशतसंख्याकाः स्तोत्रियाः भवन्ति। तत्र या नवति
स्ते दशसंख्याकास्त्रिवृतः स्तोमाः संपद्यन्ते एकैकस्मिन् दशकेति मानेकोपरि स्त्र ... अवशिष्टानामृचां नवसंख्यापे
तत्वात् त्रिवृत्स्तोमत्वं तेन नवसु दशकेषु नव त्रिवृत्स्तोमाः तेषु दशकेषु परिसक्ता नवर्चाः स एकस्त्रिवृत्स्तोमः। एवं दश

संख्याकास्त्रिवृत्स्तोमाः। अथानन्तरं षष्ठ्यौ ने अस्मिन्नस्मिन्नपि यान्भवन्ति ते पूर्वन्यायेन द्वात्रिंशस्तोमम् आगमनीया। अथ
नव साद्धर्धभावि न्यायाच्चोदशानामसीद् दशानाम् चाँ मध्ये एकास्तोत्रियोदेति अतिरिच्यते अवशिष्टाः स्तुत्स्तोत्रिया अनुत्रि
वृत्स्तोमः परिशिष्यते। एवं सत्येकविंशतिसंख्याकास्त्रिवृत्स्तोमाः नेष्योतिरिक्ताकावियस्ति एनाव संपन्नोऽनन्तरैकविंशतित्रिवृत्स्तो ८
मसंघोयोस्त्रिसससर्वोप्य सोमंडले द्वयमानेएकविंशतिसंख्यापूरकोप्यादित्यो मंडले स्थापितः आदित्यस्तपति यत्काशाने आदि
स्यस्यैकविंशतिसंख्यापूरकत्वमन्यत्रश्रूयते। द्वादशमासाः पंचर्तवस्त्रय इमे लोका असावादित्य एकविंशः। इति यत्तु सत्रेगवाम
यनाख्ये तत्र याहानि तत्साद्द्वयादपि पंचो एकत्रिवृत्स्तोमसंघः प्रशस्तः कथं साद्द्वयमिति तिनदुच्यते। तस्मिन्सत्रे यन्मध्यमहः
तद्विषुवं नाम कं दिवाकीर्त्यं भवति। तस्य पुरस्ताद्दशाहानि उपरिष्टाद्दशाहानि एवमन्यत्रापि पूर्वोक्तनीत्या सपादिनानामेकविं
शतिसंख्याकानां त्रिवृत्स्तोमानां मध्यवर्तीयश्चित्रिवृत्स्तोमः स एव विषुवान्भवति एतस्माद्विषुवद्रूपात्त्रिवृत्स्तोमादर्वाचः पूर्वे
विनो दशत्रिवृत्स्तोमाः परस्तादुत्तरभाविनोऽपि दशत्रिवृत्स्तोमा उभयोर्दशकयोर्मध्ये एष एकविंशतिसंख्यापूरकस्त्रिवृत्स्तो
मउभयतो ध्यादिनः पार्श्वद्वयदशाद्व्याप्तः सन्नुतपस्यादिस्यवस्सकाशतेन तत्रैकविंशावृत्त्रिवृत्स्तोमस्य मध्येयास्ता वृ
यो कास्तोत्रियोदेति अनिरिक्ता भवति स्वयमेकस्मिन्नेकविंशतिसंघे अध्यूढा अधिकत्वे नावस्थिता समञ्जमानः अति
रिक्तास्तोत्रियारूपायजमानत्वेनावगंतव्याः। किं च न स्तोत्रियानुरूपं देवस्य च देवसंबंधिनी क्षत्रियजातिरिद्रवरुणादिरू
पा तच्च क्षत्रं सद्रः पराक्रमवक्ष्यसंबलं सैन्यमेवमग्निष्टोमस्तोत्रियद्वारा दशस्य तत्कार्थं वदन्तां प्रशंसति॥ अथातिद
वैदेवं क्षत्रं सहोबलमेतस्य रससायुज्यं सरूपतां सलोकतामश्नुते य एवं वेद॥ तत्कार्थं चोदिनापराह्णं वसति स्तुसेऽन्योपेतो

मिंद्रादि क्षत्रियजातिमभ्युनेनाप्नोति ॥ तत्र उदरोन क्षत्रेणेंद्रादीनां सायुज्यं सहत्वा सरूपतां समानरूपत्वं सलोकतां ए
कलोकायस्थितिं चाप्नोति ॥ ॥इति चतुर्दशाध्याये नवमः खंडः ॥ ॥अथ त्रिवृदादिस्तोमचतुष्टयद्वारेणाग्निष्टोमस्तोत्रं आख्या
यिकामाह। देवा वा असुरैर्विजिग्याना ऊर्ध्वाः स्वर्गं लोकमायन्सोऽग्निर्दिविस्पृगूर्ध्व उदश्रयत्स स्वर्गस्य लोकस्य द्वारमवृणोदग्नि
र्वै स्वर्गस्य लोकस्याधिपतिस्तं वसवः प्रथमा आगच्छंस्त एनमब्रुवन्नति नोऽर्जस्याकाशं नः कुर्विति स नास्तुतोऽतिस्रक्ष्य इत्यब्र
वीत्स्तुत नु मेति तथेति तं ते त्रिवृता स्तोमेनास्तुवंस्तान्स्तुतोऽत्यार्जत ते पृथा लोकमगच्छन्निति। ये देवा अग्निसहिताः पूर्वमसुरैः
सह युद्धं कृत्वा विजिग्याना विजयं प्राप्तास्ते देवा ऊर्ध्वगामिनस्ततः स्वर्गं लोकमायन् गतवन्तस्तदाग्निः स्वस्थान एव स्थित्वा दिवस्पृ
ग क्। द्युलोकं स्पृशन्नूर्ध्वोन्नतः सन्नुदश्रयत उपरि देशमाश्रितवान् द्युलोकपर्यन्तं स्वकीयां ज्वालां वर्द्धितवानित्यर्थः। त ८३
ता स्वर्गलोकद्वारमवृणोत् तथाच्छादितमकरोत्तान्चेतरेषु स्थितेषु कथमग्नेरीदृशं सामर्थ्यमिति वाच्यं यस्मादग्निरे
व स्वर्गलोकस्याधिपतिः स्वामी आग्नेयादिकर्मैवानुष्ठाय स्वर्गद्वारनिरोधिनमग्निमष्टौ वसवः प्रथमाः पुरोगामिनोऽपरे
त्या आगच्छन्प्राप्तवन्तः प्राप्य चैवमग्निं ते वसव एवमब्रुवन् हे अग्ने नोऽस्मानत्यर्जसि स्वदीयां ज्वालामतिरुध्य अर्जयितुं स्वर्गं प्रा
पयितुं अर्हसि नोऽस्माकं तत्प्राप्त्यर्थं आकाशं स्वदीयज्वालोपशमेनावकाशं कुर्विति। ततः सोऽग्निरेवमब्रवीत् युष्माभिरस्तु
तोऽहं नातिस्रक्ष्ये द्वारावरोधं न परित्यजामि तस्माद्वरोधपरिहाराय नु क्षिप्रमेव मामग्निं स्तुत स्तोत्रं कुरुतेति ते वसवस्तथै
त्यङ्गीकृत्य त्रिवृतामेकेन स्तोमेनाग्निमस्तुवन् तस्य त्रिवृत्स्तोमस्तोत्रस्य विधापकं छन्दोगब्राह्मणमेवमाम्नायते। तिसृभ्यो
हिंकरोति स प्रथमया तिसृभ्यो हिंकरोति स मध्यमया तिसृभ्यो हिंकरोति स प्रथमया तिसृभ्यो हिंकरोति स मध्यमया तिसृ

न्या मध्यमयातिसृभिर्हिंकरोति स उत्तमया घनीनि त्रिवृतो विष्टुतेरिति ॥ अस्यायमर्थः । उपास्मै गायता नर इति यः प्रथमस्तृचः दवि
द्युतत्येति द्वितीयस्तृचः । पवमानस्य ते कव इति यस्तृतीयस्तृचः । एतेषु त्रिषु त्र्यात्मकेषु सूक्तेषु विद्यमानानां नवानामृचां त्रिभिः प
गो र्यायैर्गानं कर्तव्यं तत्र प्रथमे पर्याये त्रिषु सूक्तेषु आद्यास्तिस्र ऋचो गातव्याः द्वितीयपर्याये मध्यमास्तिस्र ऋचो गातव्याः उत्तमपर्या
ये उत्तमा ऋचो गातव्याः तिसृभ्य इति तिसृभ्यो याभ्यः पंचमामाहिंकरोति । अनेन गानमुपलक्ष्यते सेयं पद्योक्तप्रकारोपेता गीतिस्त्रि
वृत्स्तोमस्य विष्टुतिः स्तुतिप्रकारविशेषः । एतस्या विष्टुतेरुपतामेवं नामधेयमिति ॥ इदं त्रिवृता स्तोमेन स्तुतोऽग्निः नादेवानस्या
जैत निरुद्धद्वारमतिलंघ्य स्वर्गमध्यं प्रापितवान् तं चैव संवादे वायथालोकं स्वस्य स्वोचितं लोके स्थानविशेषमनति
कम्यन्नागच्छन् । अथ पंचदशेन स्तोमेन स्तुतो इंद्रो यति ॥ तं रुद्रा आगच्छंस्त एनमब्रुवन्निति नोऽजस्या कारानं कुर्विति स ना
स्तुतोऽतिस्वरस्य इत्स्यब्रवीत् स्तुतं नु मे तेन तथेति तेन पंचदशेन स्तोमेनास्तुवंस्तान् स्तुतो माजितं तथा लोकमगच्छन्निति ॥ पंचदशाना
मकस्य स्तोमस्य रूपं द्वितीयरवमाम्नायते । पंचभ्यो हिंकरोति स तिसृभिः स एकया स एकया पंचभ्यो हिंकरोति स एकया स
तिसृभिः स एकया पंचभ्यो हिंकरोति स एकया स तिसृभिरिति ॥ अस्यायमर्थः तृचात्मकमेकं सूक्तं त्रिरावृत्तेनीयं तत्र प्रथमा
ए तो प्रथमायामृच त्रिरभ्यासः द्वितीये त्रैमध्यमायास्तृतीयावृत्तमायाः सोयं पंचदशस्तोम इति अन्यत्सर्वं व्याख्येयं
पा अथ सप्तदशेन स्तोमेन स्तुतो इंद्रो यति ॥ तं मादित्सा आगच्छंस्त एनमब्रुवन्निति नोऽजस्याकारानं कुर्विति स ना स्तुतो गतिः
इत्सब्रवीत् स्तुतं नु मे तिनथेति जिनते सप्तदशेन स्तोमेनास्तुवंस्तान् स्तुतोस्याजितं ते यथालोकमगच्छन्निति ॥ सप्तदशस्तोमस्य

स्वरूपं छंदोगैरेवमाम्नायते। पंचभ्यो हिंकरोति स तिसृभिः स एकया स एकया पंचभ्यो हिंकरोति स एकया स तिसृभिः स ए
कया स सप्तभ्यो हिंकरोति स एकया स तिसृभिः स तिसृभिरिति। अत्र प्रथमायास्तृचो प्रथमायास्त्रिरभ्यासः द्वितीयायास्तृचो मध्यमायाः
तृतीयायास्तृचो मध्यमोऽत्र भयोः सोऽयं सप्तदशस्तोम इति। अन्यत्पूर्ववत्। एकविंशेन स्तोमेन स्तौतीति दर्शयति। विश्वे देवा आगछँ
स्तएनमब्रुवन्निति नूर्जस्याकाशीनः कुर्विति स नाक्तेनागिते स्वक्ष्यद्द स्यब्रवीस्क ननु मेजिनथेति तेन एकविंशेन स्तोमेनास्तुवं स्तो
स्कन्नोत्याजनेन यथालोकमगछन्निति। एकविंशस्तोमस्य स्वरूपं छंदोगैरेवमाम्नायते। सप्तभ्यो हिंकरोति स तिसृभिः स
एकया स सप्तभ्यो हिंकरोति स एकया स तिसृभिः स तिसृभिः स सप्तभ्यो हिंकरोति स तिसृभिः स एकया स तिसृभिरिति। प्रथ ४८
मपर्यायान्स्योत्तमाया ऋचः सप्तसाठः द्वितीयपर्याये प्रथमायाः सप्तसाठः तृतीयपर्याये मध्यमायाः सप्तसाठ अवशिष्टा
नां तु त्रिरावृत्तिः सोऽयमेकविंशस्तोम इति। अन्यत्पूर्ववद्व्याख्येयं। स्तोमस्यानुष्टुभमुपसंहरति। एकैकेन वै तं देवा स्तोमेनास्तुवंस्त
नास्याजनन्नेयथालोकमगछन्निति। अग्निष्टोमप्रयोगे उक्तानां स्तोमानां विकृत्यप्राकाण्यादृत्यर्थे समुच्चयं विधत्ते॥ अथ
हैनमेष यज्ञः सर्वैः स्तोमैः स्तोत्रियो यजत इति। अर्थवादवैलक्षण्येन विधित्वं द्योतयितुमथशब्दः। योऽग्निष्टोमेन यजते स
एतैश्चतुर्भिरपि स्तोमैः स्तुवीत अनुष्ठातुः स्वर्गप्राप्तिफलस्य सिद्धत्वात्तेन सह समुच्चित्य वेदितुरपि फलं दर्शयति। यश्चै
नमेवं वेदेत्युदातीनुतमज्ञानाइति। यजमानो येन प्रकारेण यजतेऽनेनैव प्रकारेण तमग्निष्टोमं यश्चैवं वेदितानमपि
वेदितारं द्वारं निरोधनमतिलंघ्याज्ञाने प्रापयत्येव। अनीतिनिंदार्थं छांदसः। वेदनमात्रेणानुष्ठानसमानफलं प्र॰

व्यितुं पुनरप्याह ॥ अनिद्दं वा एनमङ्गानस्वर्गं लोकमभियय एवं वेदेति । विद्वन्मात्रेणापि सिद्धेऽपि फलेऽकृमे भयस्तानू फलभरूयस्वमितिन्या
य नानुष्ठानवैयर्थ्यं नास्ति ॥ ॥इति चतुर्दशाध्याये चतुर्थः खण्डः ॥ ॥अथाग्निष्टोमादिशब्दं निर्वचनतः प्रशंसति ॥ स वा एषोग्नि
रेव यदग्निष्टोमस्तं यदस्तुवंस्तस्मादग्निस्तोमस्तमग्निस्तोमं संतमग्निष्टोम इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवा
इति ॥ योयमग्निष्टोमोस्ति स साक्षादग्निष्टोम एव स्वरूपतो दिव्यचित्रिभिर्द्वाभिः त्रिभिः सवनेश्च विशेष्यक्रतोर्निष्पादित वानूनेक्रतु
रूपममियधस्मा । कारणाद्दाअस्तुवन् तस्मादग्नि विषयस्तुति युक्तवादयं क्रतुरग्निष्टोम इत्युक्त नामकः तं नाम युक्तस्य क्रतोः
परोक्षयाह तुं सकारनकारयोः षकारटकारा वोस्टि स्माग्निष्टोम इति वैदिका आचक्षते वर्णान्तरेण व्यवहितवानू शीघ्रप्रती
तिरहितं नाम परोक्षमित्युच्यते । यस्माल्लोके देवाः इन्द्राआचार्यादयः परोक्षनाम प्रियाः एव तस्मात्क्रतोरपि तद्धक्तं नामीतर
स्य निर्वचनं दर्शयति । चतुर्भिः स्तोमैरस्तुवंस्तस्माच्चतुस्तोमस्तं चतुस्तोमं संतं चतुष्टोम इत्याचक्षते परोक्षेण परोक्षप्रिया इव
हि देवा इति । चतुष्टयाश्चतुर्विधाः वसवो रुद्रा आदित्या विश्वेदेवाश्चेति स्तोमाख्यत्रिरश्मयदशा सप्तदश एकविंशास्ये च चार
चतुष्टोमनाम निर्वचनं दर्शयति । अथ यदेनमूर्ध्वं संतं ज्योतिर्ज्योतिर्भूतमस्तुवंस्तस्माज्ज्योतिस्तोमस्तस्माज्ज्योतिस्तोमस्
तं ज्योतिष्टोम इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवा इति । अथ नामद्वयानन्तरं तृतीयं नाम कथ्यत इति शेषः । अथ कथना
यमग्निर्भूमिमारभ्य द्युलोकपर्यन्तं कूर्ध्वावस्थितः तथा प्रकाशमानत्वानु ज्योतिर्भूतः तं तादृशं देवा अस्तुवंस्तस्माज्ज्योतिस्तो
मस्तुतिः यस्मिन् क्रतौ स क्रतुर्ज्योतिस्तोमः अन्यत्पूर्ववत् । नामनिर्वचनेन प्रशस्य पुनरप्यागृह्य राहित्येन प्रशंसति । स वा एषो
मस्तुतिः यस्मिन् क्रतौ स क्रतुरमनेन तरमेवमनंतमेवं यदग्निष्टोमस्तस्य यथैव प्रापणं तथोदयनामिति । स एषोग्निष्टोमः पूर्वोप
दृक्रीनपरोयथारथचक्रमनेतरमेवमनं

ररदितः श्वे आदित्यपरः अंतः आद्यंतरहितोयं ऋतुः यथा लोके रथचक्रं अनंतं पुनः पुनः परिवर्तमानस्य रथचक्रस्य अयमा
दिरयमंत इति विभागाभावेन शक्यते न तस्मादिदमंतरहितमादिरहितस्याप्येतदुपलक्षणं एवं ऋतुरूपान्तु प्रायणीयेष्टिरादिरुद
यनीयेष्टिरंत इति चेन्नैवं । योग्निष्टोमोस्ति तस्य प्राहुः प्रायणीयं क्रमेणादशमे वोदयनीयं क्रमे । तयोर्योगधर्मसाम्यान्न भेदो वि
वक्षितुमशक्यतान् आद्यंतरहितः ऋतुः उक्तमर्थं मंत्रोदाहरणेन द्रढयति । तदेषाभियज्ञगाथागीयते । यदस्य पूर्वमपरं तदस्य
यद्वास्यापरं तद्वस्य पूर्वं । अहेरिव सर्पणं शाकलस्य न विजानंति यतरत्परस्तादितीति ॥ सर्वैरपि स्तुत्या विततेन गीयते इति यज्ञ
गाथाभिर्गीयते सूर्वेतः पृच्छ्यते यदस्येत्यादि । गाथार्थस्त्वग्निष्टोमस्य यत्पूर्वमुपक्रमरूपं कर्मास्ति तदेवास्यापरं समाप्तिरूपं कर्म
मे यदस्यापरं कर्म समाप्तिरूपं तदेवास्य पूर्वमुपक्रमरूपमादिरूपं । प्रायणीयश्चानुश्चतुरादि सदृदयनीयश्चेति द्वयोर्देवत
योः रूपस्य चैकविधत्वात् तयोरेकत्वोपचारः आद्यंतयोरपरिज्ञाने पूर्वब्राह्मणे रथचक्रदृष्टांतो दर्शितः । मंत्रे त्वन्यो दृष्टांत उच्य ८८
ते । शाकलशब्दः सर्पविशेषवाची । शाकलनामकोहिः सर्पविशेषस्य यथा सर्पणं गमनं तथैवायमग्निष्टोमः स तु सर्पणका
ले मुखेन पुच्छस्य दशनं कृत्वा वलयाकारो भवति तत्र किं मुखं किं पुच्छमिति न ज्ञायते एकमत्राणादिति ॥ देवताकस्यचे वा
रोः साम्ये सति । प्रायणीयोदयनीययोर्यत्तरत्क्रमे परस्तात्पश्चात् अनुविधयतरच्च पूर्वं भावीति केपिन विज्ञातं त्वस्या गाथाया तात्प
र्यं संक्षिप्य दर्शयति । यथा ह्येवास्य प्रायणमेवमुदयनमसदितीति ॥ अस्याग्निष्टोमस्य प्रारंभो यादृशस्तादृशमेवमुदयनेस
समाप्तिरसदस्ति भवतीत्यर्थः । अत्र केचिदाक्षेपमुद्भावयंति तदाहुर्यत्त्रिवृत्प्रायणमेकविंशमुदयनं केन ते समे इति । पूर्वो
दाहृतगाथायां स्तोमः प्रातःसवनादौ प्रयोक्तव्यत्वात् प्रायणमुपक्रमरूपं एकविंशस्तोमोस्ति स एव त्रिवृद्वदवगन्तव्यः । स्तोमत्याका

रेण नयोरेकविधत्वादथो अपि च यद्यस्मात्कारणात्स्तोमद्वयाश्रयाभ्यां नावुभौ स्तो वै तृचिनौ न चा तथमेयुक्तौ नत्र त्रिवृत्स्तो
माश्रयस्योपास्मैगायता नर इति तृचस्य तद्धर्मः प्रसिद्ध एकविंशस्तोमाश्रयस्य यज्ञायज्ञा वो अग्नय इति तृचस्य
प्रगाथत्वादेव तस्मिन्स्तृचो वा यन्न यैनेन तथापि स्तोत्रकाले प्रगृह्यतेनेन पादानावृत्य तृचत्वं संपाद्यते तेन नतृच यथर्मि
पतत्वकारणेन द्वयोस्तोमयोरेकविधत्वमप्युत्तरे ब्रूयात्॥ ॥इति चतुर्दशाध्याये पंचमः खंडः॥ ॥पुनरादित्यस्य साम्ये
न प्रशंसति॥ यो वा एष तपत्यग्निष्टोम एष स साह्नस्तं सहैवाह्ना संस्थापयेयुः साह्नो वै नाम तेन य एव प्रसिद्धः एषोस्म
स्य सो आदित्यस्तपति एषोग्निष्टोमस्तयोरादित्याग्निष्टोमयोः सद्भावात्कथं साम्यमिति न दुच्यते एषोग्निष्टोम आदित्यसा
म्यः यथा आदित्योह्ना सहैव वर्तते तथा तमग्निष्टोममप्याप्ययेदेकेनाह्ना सहैव संस्थापयेयुः तस्मादादित्यस्यैव साह्न इति
कृतो नामसंपन्नो इदानीमग्निष्टोमानुष्ठाने त्वरां निषेधति ते नासत्वरमाणाश्चरेयुर्यथैव प्रातःसवन एवं माध्यंदिन एवं तृती
यसवन एवमु ह यजमानोऽप्रमायुको भवतीति॥ यस्मादेकमहः साकल्येनानुष्ठेयं तेनोपर्यालेन कारणेन सर्वेऽप्यृत्विजोऽसं
त्वरमाणाः त्वरामकुर्वन्तः उत्तरोत्तरमनुष्ठेयं सम्यक्कुर्यात्ते चरेयुस्तत्र तस्मात्पुरस्तुष्टेयुः यथैव प्रातःसवने मध्यरात्रादूर्ध्वमारभ्य
मध्याह्नात्पूर्वे कालस्यानुष्ठानाय पर्याप्तत्वात्त्वरा नास्ति त्वरा एवमुत्तरयोरपि सवनयोः द्रष्टव्यम् अनेनैव प्रकारेण त्वरोपेतानुष्ठा
ने सति बुद्धिसमाधानेनांगलोपाभावाद्यजमानोऽप्रमायुकः अपमृत्युरहितो जीवति विपक्षे बाधं दर्शयति॥ यद्ध वा इ
दं पूर्वयोः सवनयोरसंत्वरमाणाश्चरंति तस्मादिदं ग्राम्या ग्रामता बहुला विष्टा अथ यद्धेदं तृतीयसवने संत्वरमाणाश्च
रंति तस्मादिदं दस्युविदीघारण्यानि भवंति तथा ह यजमानः प्रमायुको भवतीति यद्ध वै यदि प्रथमद्वितीययोः सवनयोः

कालस्य संकोचात्स्वाज्ञावानुष्ठ संचरमाणा इदं कर्म संचरंतीत्यनुतिष्ठेयुः । तदानीं तस्मादुत्तरस्मादेवांगत्वोपाध्यायात्कारणादिदं दृश्यते । वि-
सिद्ध मिलित्वा यत्र प्राच्यां यामतो दूर्वं दिग्वनो ग्रामसमूहाः बहुलं विष्टाः बहुकुटुं जनसमूहैः संसृष्टाः भवंति । अथ तदानीं यद्यपि पर्या-
यणपद्ध यदि तृतीयसवने कालसंकोचमात्रं स्वयं संचरमाणा अपि त्वरयाप्यस्मादिदं कर्म संचरंतीत्यनुतिष्ठेतिः तदानीं तस्मादृग्वे-
कत्वसंभवादेव दृष्टांके दृश्यते प्रत्यंचि पश्चिमदिग्वर्ती निदाघ रिक्तानि जनशून्यानि भवंति तथा हृदा दृष्टांते संस्थापितांगवे-
त्ययुक्तेनानुष्ठानेन यजमानः प्रमायुको भवति अपमृत्युना म्रियत इत्यर्थः । विपक्षे बाधकमुक्त्वा स्वपक्षं निगमयति तेनासंचर-
माणाध्वरपुर्यग्येव प्रातःसवन एवं माध्यंदिने एवं तृतीयसवन एवमुत यजमानो प्रमायुको भवतीति ॥ अथ त्रिषु सवनेषु श-
स्त्रस्योत्तरोत्तरवृद्ध्यादिविषयं विधीयते । स एतमेव शस्त्रेणानुपर्यावर्तते यदा वा एष प्रातरुदेत्यथ मंद्रं तपति तस्मान्मंद्रया
वाचा प्रातःसवने शंसेदथ यदाभ्येत्यथ बलीयस्तपति तस्माद्बलीयस्या वाचा माध्यंदिने शंसेदथ यदाभितरामेत्य-
थ बलिष्ठतमं तपति तस्माद्बलिष्ठतमया वाचा तृतीयसवने शंसेदेवं शंसेद्यदि वाच ईशीत वाग्घि शस्त्रं यया तु वाचो-
त्तरोत्तरिण्योत्सहेत समापनाय तया प्रतिपद्येतैतत्सुशस्ततममिव भवतीति । सहोता एतमेवादित्यमनुसृत्य स शस्त्रेणानुप-
र्यावर्त्तेतेत्यर्थः यथा यथादित्यस्योत्तरोत्तराधिक्येन तपति तथा तथैवोत्तरोत्तराधिक्येन होता शंसेत् यदा वा एष आदित्यस्तद-
वस्थाः क्रियते यस्मिन्नेव लोके एष आदित्यः प्रातरुदेति प्रातःकालमभिव्याप्यानुदियात् । अथ तदानीं मंद्रं मन्दं य-
या भवति तथा तस्मादादित्यमनुवर्त्तमानो होता प्रातःसवने मंद्रया स्वल्पध्वन्युपेतया वाचा शंसेत् । अथ प्रातःकालाद्

ध्वं सूर्योऽस्तं गते नितरामेव निपश्यिमाधिमुख्यानां पुरुषाणाम् अस्तं नाम अधिमुखेन गच्छति। अथेदानीमादित्यो बलिष्ठतमेन न पतितं स्यादुत्ता
पादपि अस्तं गतं एवं वक्तव्यं भवति भूमौ दिशो वा ह्येतद् वक्तव्यं स्यान्नूनं तस्मादिदानीं होता माध्यन्दिने ध्वनेरप्यधिकं ध्वनिं कुर्यात्।
वान्तृतीयसवने ससेन्नूः। यदा यं होतावाच इति ज्ञाने ऽधिरो ऽभवेन्नूनं स्याद्वाक्स्यान्नूनं इत्यादिदोषेण ध्वनेमांद्येन प्राप्नुयान्नू।
तदानीं येन ध्वनिना तृतीयसवने प्रारब्धः स्मृतः एवं तेनैव ध्वनिना त्रासेन्नू। किमर्थं ध्वन्याधिक्यमिति। ननु उच्यते यस्मादागे
वशान्त्येवा वाडिष्याधत्वान्नूस्मात् यथा नु याहशा ध्वनिप्रयुक्तेयेव वाचा उत्तरोत्तरिण्या उत्तरोत्तराधिक्ये द्विगुणाः समापना यो
स्मात् वाक्प्रभवेन्नू। ननु आनीतेनैव ध्वनि भवेन्नूनं यथा तथाविधं चतुष्पेनेन यावाचा त्रस्य प्रतिपद्येत प्रारभेन्नूदेत। तत् उक्तलक्षणाः प
तेशास्त्रसु आस्तम भवति सुहृदेवत्यरादित्यस नास्तं तत्रास्तमेव भवति। ननु तृतीयसवने त्वेवामे तरेणा त्रानेः त्रो सेदि
ति पूर्वेत्रा गते तथा सति कालस्योल्यु चेनेन समापना प्रागेव सूर्यो स्तमियान्नूनं स्यात् त्रीक्यवक्तुं नो स्तमयाभावान्त्या स्तिदो
षइत्यभिप्रेत्याह॥ स वा एष न कदाचनास्तमेति नोदेति। अस्तमयः स्वयं स्थापनात्रः। उदयः सूर्योस्तिः न हि सूर्यस्य कदा
चिदपि स्वरूपनाशो स्ति। किंघेत कथं तर्हि जनानां सूर्ये स्तमयव्यवहार इत्याशंक्याह। तं यदस्तमेतीति मन्यन्ते अहर
एव तदन्तमित्वाथात्मानं विपर्यस्यते रात्रिमेवावस्तात्कुरुते ऽहः परस्तादिति॥ यं यदा प्राणिनः सूर्योदयादूर्ध्वं यामचतुष्ट
यानन्तरं स्तमेतीति तं सूर्यमस्तमितं मन्यन्ते तत्तदानीं सूर्यं तत्प्राणिप्रयुक्तो देशो प्रकाशयुक्तस्यास्य वानमित्वा समाप्ति प्रा
याथानन्तरे स्वात्मानं विपर्यस्यते विपर्यस्तं करोतीति कथं विपर्यास इति ननु उच्यते। अधस्तादतीतदेशे रात्रिमेव कुरुते परस्ता
दागामिनि देशे अहः कुरुते। अयमर्थः मेरोः प्रदक्षिणं कुर्वन्नादित्यो यद्देशवासिनां प्राणिनां दृष्टिपथमागच्छति तद्देशवासिभिः

ःत्यां प्रक्रियते॥ अन्यस्मिन्देशे रात्रिर्भवति॥ आदित्यस्य नगरांतर्वर्तिदेशे गमने तद्देशवासिभिः प्राणिभिः सूर्यस्य दृष्टत्वादहर्भव
ति। एवं सति सूर्यस्य विनाशरूपोऽस्तमयः कदाचिदपि नास्तीति सिद्धं। अनेनैव न्यायेन सूर्यस्य स्वरूपोत्पत्तिलक्षणोदय
भावं दर्शयति॥ अथ यदेनं प्रातरुदेतीति मन्यंते रात्रेरेव तदंतमित्वाथात्मानं विपर्यस्यतेहरेवावस्तात्कुरुते रात्रीं परस्तादिति
पूर्ववद्व्याख्येयं। परमार्थतोऽस्तमयस्याभावं दर्शयति। स वा एष न कदाचन निम्रोचतीति। निम्रोचनं अस्तमयः। एतस्याप
लक्षणत्वान्न कदाचिदुदेतीत्यपि द्रष्टव्यं। वेदनं प्रशंसति॥ न ह वै कदाचन निम्रोचति य एवं वेद अस्य ह सायुज्यं सरूपतां सलोकतां
मश्नुते य एवं वेद य एवं वेदेति। वेदितुरस्तमयाभावो नाम पापक्षयराहित्यं इहजन्मनि नाशो न भवति पश्चादेतस्यादित्यस्य
सदृशः समानरूपत्वं समानलोकवासित्वं प्राप्नोति। न च मनुष्यस्य समानलोकवासित्वं सिध्यतीति वाच्यं। कदाचिदपि स्वेच्छया
यथावस्थानेऽपि लोके भ्रंशो नास्तीति विवक्षया समानलोकत्वमुच्यते॥ ॥इति श्रीमाधवीये वेदार्थप्रकाशे ऐतरेयब्राह्म
णे चतुर्दशाध्याये षष्ठः खंडः॥ ॥अग्निष्टोमः सर्वयज्ञक्रतूनां योनित्वेनाग्निरूपत्वेन प्रशंसितः। देवैस्तोमैः संस्कृतो यज्ञक्रतुर्भिः
वाचं मेडे मध्यमेन ... ॥ ॥अथेष्टिसंस्थादिकं वक्तव्यं तत्र दीक्षणीयेष्टिसंस्थामाख्यायिकया दर्शयति॥ यज्ञो वै देवे
भ्य उदक्रामत्ते देवा अब्रुवन्यज्ञो वै नोऽन्नाद्यमुदक्रमीदिच्छामेमं यज्ञमन्विमन्विच्छामेति तेऽब्रुवन्कथमन्विच्छामेति ब्रा
ह्मणेन च छंदोभिश्चेति ते ब्राह्मणं छंदोभिरदीक्षयंस्तस्यांतं यज्ञमतन्वतापि पत्नीः समयाजयंस्तस्मादप्येतर्हि
दीक्षणीयायामिष्टावांतमेव यज्ञं तन्वतेऽपि पत्नीः संयाजयंति तमनु न्यायमन्ववायन्निति॥ पुरा कदाचिद्यज्ञो ज्योतिष्टो
माख्यः केनापि निमित्तेनापरक्तः सन्देवेभ्यः सकाशादुदक्रामत्तस्मिन्निष्क्रांते तेन फलमन्नाद्यमप्युदक्रामत्तेनो

दे०।

नाः परस्परमिदमनुवन्त्यूर्द्ध्वं तदुभयमस्मदीयमुदकर्मानेदं तदुपर्यसर्वेणाप्यविज्ञाम अन्ये पुनः कुरवामः न तु कुर्वामा
नृषणा। मन्त्रभुया पूर्वं विचार्यो। ब्राह्मणानन्तरं चिन्त्यज मानरूपाः गायत्र्यादिच्छन्दांसि वतदन्येभ्यो पायत्तेन निष्ठितेन च्छंदांसि
ब्राह्मणं यक्ष्यमाणं यद्दीक्षयं दीक्षणीयेष्टिरूनवर्त्तते। तस्य ब्राह्मणस्य यद्दीक्षणीयेष्टिरूपमातस्समाप्तिपर्यन्तमूतन्वं
तन्विस्तारितवन्तः तं यज्ञमनुष्ठायपत्नीनामकं देवनाम् अपि समयाजयद्वपत्नीसंयाजानुष्ठानमपि हृनवन्त इत्यर्थः। य
स्मादेवं देवैः कृतं तस्मादेवकारणादिदानीमपि दीक्षणीयायामिष्टौ चोदकप्राप्तं यज्ञसमाप्तिपर्यन्तमनुतिष्ठेत् किं तु रक्षा
कीर्नागं व्याहृत्य पत्नीसंयाजपर्यन्तं। पत्नीसंयाजैरेव समाप्तिरित्यपि जेत्याननिष्कृच्छ्रं देवैः कृतं न अनुन्याय अनुक्रम
नुष्ठानमनुपश्यामनुष्ठा। अपयन्ति च वा अमन्तु अवगन्तव्योऽनुविष्ठितवन्त इत्यर्थः। तमनुन्यायमितिवाक्यमुत्तरत्रापि स्ये
वायोऽर्थो दीक्षणीयेष्टेः पत्नीसंयाजैः समाप्तिदर्शयित्वा प्रायणीयेष्टेः शंयुवाके समाप्तिं दर्शयति। ते प्रायणीयमतन्व
तेन प्रायणीयेन नेदीयांसं च्छन्दांसि क्रमभिः समतरं नेन हुर्युवर्तमकुर्वन्तस्मात् प्रायणीयं शंयवन्तमेवतृतिन
मनुन्यायमन्वायन्निति। नेदेवाः प्रायणीयाख्यं कर्मानुष्ठितवन्तः। प्रायणीयेन कर्मणा तत्पूर्वोक्तदीक्षणीयेष्टिरूपं ज्यो
तिष्टोमरूपं वा नेदीयांसं समीपयन्तं वर्तितम् एवान्यच्छ अनुष्ठितवन्तः। दीक्षणीयेष्टेः विरमव्यवधानम
सत्वा प्रायणीयमनुष्ठितवन्त इत्यर्थः। देवाः कर्मभिः प्रायणीयाख्यैः समतरं सम्यक्तरां शान्तवन्तः। दीक्षणीयेष्टि
वत्पत्नीसंयाजपर्यन्तं नान्यन्निष्ठुरं किन्तु त्वरीतं चापपत्नीसंयाजेभ्यः पूर्वमेव शंयुवाकपर्यन्ते तत्रोपरताः तस्मादेतस्यापि
पूर्ववदनुष्ठानमपि दीक्षणीयवत्पत्नीसंयाजपर्यन्तं नेति तत्रापि शंयुवाकपर्यन्तं नेपि तत्पूर्वमेवेत्यनुष्ठानेपि। आतिथ्यमन्वन्न नमातिथ्येनेदीयांसं न्वागच्छन्त्स्वकर्मभिः समत्वरं तं नदिच्छन्ति

मकुर्वंस्तस्माद्धाप्येतर्ह्यातिथ्यमिष्टान्तमेव कुर्वन्तितमनुन्याप्रमन्वचायन्निति॥अनुयाजेभ्यः पूर्वं यदिडोपाह्वानं तदन्तमेवातिथ्येष्टि
रूपं कर्म कृत्वोपरताः अन्यत्सर्वं च ह्यास्त्येयं॥अथोपसत्स्वनुष्ठेयं दर्शयति। तउपसदोतन्वत तन्नूपसडिर्नेदीयो नाग्रायत्स्तकुमीडिः
सपत्वरं न नैनिस्त्रः सामिधेनीरन्वाच्यतिस्त्रो देवताअजयंस्तस्माद्धाप्येतर्ह्युपसत्सु तिस्त्र एव सामिधेनीरनूच्यति स्त्रोदेव
तायजेतितमनुन्याप्रमन्वचायन्निति॥तिस्त्रः सामिधेन्यआश्वलायनेन दर्शिताः उपसद्यायमीत्क्रुषइति तिस्त्र एकैका
त्रिरनवानं ताः सामिधेन्यइति अग्निः सोमो विष्णुश्चेत्येतास्तिस्त्रोदेवताः स्पष्टमन्यत्॥अथाग्नीषोमीयपशावनुष्ठेयं दर्शय
तितउपवसथमतन्वत तमुपवसथ्येऽहन्याग्नीषोमीयं स्तस्तवांतं यज्ञमतन्वत। पिपलीः समयाजयंस्तस्माद्धाप्येतर्ह्येकपवस्थ
आतमेव यज्ञं तन्वते पिपलीः संयाजयन्तीति॥उपवसथशब्देन सोमयागसमीपवासित्वाश्रूवेस्मिन्नहनि अनुष्ठेयाग्नि
षोमीयपशुर्विवक्षितः ते पशुदेवाउपवसथ्येऽहनि सोमयागदिनात्पूर्वेद्युः ग्राह्मवर्त्तेयज्ञं समाप्ति पर्यन्तमन्वति ७८
ष्ठन् पत्नीसंयाजान्तमन्वतिष्ठन् दीक्षणीयेष्टिवत् पत्नीसंयाजान्तमेवइष्टं स्पष्टमन्यत्॥उक्तास्विष्टिषु होतुरनुवच
नस्यमन्द्रस्वरं विधत्ते॥तस्मादेतेषु ष्टेषु कर्मसु उपांशुनेस्तरामिवानुब्रूयादिति॥ यस्मादग्नीषोमीयात्पूर्वं भाविते न
उपक्रमत्वात्प्रादक्षिणीयादय तस्मादेतेषु पूर्वेषु दीक्षणीयाद्युपसदन्तेषु कर्मसु उपांशुनेस्तरामिवांस्येतनीचस्वरेणैव होतानुब्रू
यात्॥अग्नीषोमीये पशौ होतुरनुवचने धने रिष्टानुसारित्वं विधत्ते॥अतउत्सारमिव हि तेनमार्यं स्तस्मादुपवसथ्ये यावत्सा वाचो
कामयीत तावत्यानुब्रूयाद्यासोद्दिसन्तर्हि भवनीति॥अनुत्सारं उत्तरोत्तरभावी सारउत्सारः उत्तमसुत्सारसानुत्सरसेतिनस्या
थाः दीक्षणीयेष्टेः सारभ्ये नाग्रायणीयेष्टिस्तदपेक्षया सोमयागस्य समीपवर्तित्वात् एवमातिथ्यादिषु उत्तरोत्तरंइदत्तमुत्तरो

तनोत्तरस्मारमनुस्रत्यतेदेवास्तंसोमयागमायनुप्राप्तवंतः तस्माद्त्यंतसारउपवसथेऽग्नीषोमीयपशौ होता यावत्सावाचा
कामयीत यावंतमुत्तमध्वनिमिच्छेत् तावता ध्वनिनानुवचनं कुर्यान् । नहि तस्मिन्नग्नीषोमीयपशुकाले स सोमयागः प्राप्तो भवती
ति हानुरूपं गायनः लोके पशुः एव रक्को निबंधो चिरकालेन प्राप्तः स निदर्शयानेनायासेन ध्वनिना वाचो कुर्वंति तद्दृष्टांतापि द्रष्टव्यं ॥ देवा
नां यज्ञप्राप्त्युपायमभिध्याय ब्रह्माधः प्राप्त्युपायं दर्शयति [illegible] नमा वायु वं स्तिष्ठस्व नो नाधायेति सने स ब्रुवीत कथं वस्तिष्ठेयेति
ज्ञानीक्षंते वनमब्रुवन्ब्राह्मणेनवृष्ठहादिश्चस युग्मत्वान्नाधाय तिष्ठस्वेति तथे ति तस्माद्ब्राह्मणेन दीयज्ञः सयुग्मत्वाद्दे
वेभ्यो द्व्यं वदति ब्राह्मणेन च छंदोभिश्चेति ॥ ते देवास्तं ज्योतिष्टोमं यज्ञं प्राप्येदमब्रुवन्नहे यज्ञो नोस्माकमन्नाधासिद्ध्यर्थं तिष्ठ
स्व स्थितिं कुर्विति स यज्ञो [illegible] ह्यवाक्यं निराकृतानूममनि ष्यादकसाधनमंतरेण वायु भदर्थं कथं स्थितस्यामिति स्वाभिप्रायम
ब्रवीन्नते घंतु यद्घोतनाय नादेवानीक्षंते वपत्र्यंत्रेवास्तेन रूपेक्षामकनोनून्नो दवायहस्याभिप्रायं ज्ञात्वा ते देवास्तं यज्ञ
मिदमब्रुवन्नहे यज्ञो नोस्मार्थं त्व साधनेन [illegible] त्विग्यजमानरूपेण ब्राह्मणब्राह्मणेन तत्तन्मंत्रगतेरछंदोभिश्च सयुक्तेरोपो [illegible] ध्याद् सहादस्थितो
न्नाधायनि भस्व स्वांगीकुर्विति तथा यज्ञोप्यंगीचकार यस्मादेवं तस्मादिदानीमपि यज्ञो ब्राह्मणसहितो भूत्वा देवेभ्यो न्नाद्यं रूपं भत्राच
हविर्वहति ॥ ॥ इति पंचदशाध्याये प्रथमः खंडः ॥ ॥ दीक्षापणीयादिषु अग्नीषोमीयांतेषु दिवसेषु होतुर्ध्वनिविशेषविधानार्थं ब्राह्म
णेन चिज्जा यज्ञनिष्पत्तिरिति [illegible] तत्र वज्रो ब्राह्मणविशेषो वीर्यातिकुशत्वोक्ति ॥ त्रीणि ह वै यज्ञे क्रियते जग्धं गीर्णं वांतमिति ॥ तत्र वं
क्षित्वा वशिष्टं भा[illegible]तनपात्रस्थितं गीर्णं मुदरे प्रविष्टं वांतं यदुदरे प्रविष्टं पुनर्निर्गतं ॥ तान्येतानि त्रीणि दुष्टानि यज्ञ
के यं जग्धादिस्थानीयानि त्रीणि वर्ज्यानीत्यर्थः तत्र जग्धस्थानीयं दर्शयति [illegible] षानिषेधति ॥ तद्धैतद्वज्ज्ञ[illegible] यदाशीः समाने

मार्त्विज्यं कारयेत्तत्रवामेदद्याद्धनंवामाहृणीतेति त्यक्तेनस्यराड॰ वयथाजग्धं नदेवनयजमानं भुनक्तीति॥ कश्चिद्ब्राह्मण आर्त्वि
ज्यमात्रीसते कामयते केनाभिप्रायेणेति तदुच्यते। आर्त्विज्यार्थमपियज्ञत्रोक्त्वा प्रागतेस्सति यजमानो मे महर्त्वं तनवाददद्यान्न किंचिद्
नैवाप्रयच्छेत्तत्रवामाहृणीत। अथवा मोग्यो गमिर्दं दृष्ट्वा त्वमार्त्विज्यं कुर्विति दूसेवं धनाधजेनेष्टपटः सन्ननुष्ठाननासर्व
त्विग्नोनिरन्तरमार्त्विज्यं कामयते नादृशी कामयमाने पुरुषे यजमान आर्त्विज्यं कारयतीति यदस्ति तदेव जग्धं यथा याजयेत्ले ६व
केजग्धं पात्रस्थितं जग्धितावशिष्टमुच्छिष्टवादित्तरे रस्पृश्यं तथात। इतस्मिन्प्रयोगे धूर्तलंपटस्यार्त्विज्यं पराङ्वविकृष्टमे
वनचादृशमार्त्विज्यं यजमानेन भुनक्तीन पाठयति। यज्ञो विकृतोभुवनीस्यपथ्येः। गीर्णमुद्दाहस्य निषेधनि। अथ देतद्देवगीर्ण
यदि भ्यदार्त्विज्यं कारयेत्तत्रवामानबाधेतोन वामेन यज्ञवेत्रासं कुर्यादिति तदेतत्पराड॰ वयथागीर्णं नैदेवनयजमान
भुनक्तीति॥ यजमानो यस्मिन्ग्रामे यजते तत्र कश्चिद्ब्राह्मणो ग्रामणीः प्रभुस्तत्प्रयोगकोऽत्रालरहितो जावतिष्ठते तमार्त्विज्यमेवर्जं ९.९
यितुं अयं यजमानो बिभेति केनाभिप्रायेणेति तदुच्यते। अयमत्र प्रभुर्मयि द्वेषं कृत्वा कालांतरे मां बाधेतेन वेदानीमेव यज्ञ
वृत्रासं यज्ञविघातं कुर्यान्न तदुभयमापद्दिस्यनेनाभिप्रायेण भीतिश्च प्रभुवनार्त्विज्यं तेन प्रभुणा कारयन्नहृति यदस्ति
तदेतज्जीर्णं यथालोके गीर्णं उदरस्थं पुनर्भोगयोग्यं न भवति नयानस्मिन्प्रयोगे तज्जीर्णमितिमात्रप्रयुक्तं आर्त्विज्यं पराङ्
वनिकृष्टमेवतत्रादृशप्रयोगकोऽत्रालरहितेन प्रभुणाहृतेमार्त्विज्यं यजमानेन पाठयति वांतं दर्शयित्वा निषेधति। अ
थहेतद्देववांतं यदभित्रासमानमार्त्विज्यं कारयेत्तयथाहृवाइदंवांतं मनुष्याबीभत्सन्त एवं तस्माद्वांतमेतत्तयरा
ड॰ वयथावांतं नैदेवत यजमानं भुनक्तीति। यः कश्चित्पुरुषोऽप्रयोगकुशलोऽपिकेनविसाति स्यापवादेन सर्वैर्निंद्यस्सेना
रा

द्वाभ्युपित्रास्यमाने यजमाने स्वकीयबंधुत्यादि दाक्षिण्याभिमानेनापवादपरिहारार्थं आर्त्विज्यं कारयतीति यदस्ति न
देनदोनेनत्रेदं विदर्शनमुच्यते यथा लोके मनुष्याणां तादृशीं तु सेवां तदृष्टाक इमकळमेन दिति निष्ठीवनं कुर्युः एवं देवाः
तस्माद्भिर्त्रास्यमाने कृता हार्दिद्दा पासर्वबीभत्सं मो। ततो यथा लोके यो नमति निकृष्टं तथा तास्मिन्य तेत दार्त्विज्यं निकृष्टं त
यजमाने सर्वथानुपालयति वर्ज्ये त्वेनां त्रिविधमुपसंहरति॥ सएतेषां त्रयाणामार्त्तान्येयादि॥ स यजमानः एतेषां पूर्वोक्ता
५ नां धनलोपटअयदतेषां महास्नानां त्रयाणामार्त्विज्यार्थमनस्यापे धाम पिनकुर्यात्। अथ प्रमादकृतस्य प्रायश्चित्तं दर्शयति॥
तेयद्येतेषां त्रयाणामेकं चिदकाममभ्याश्रवेत्तस्य त्वं वामदेव्यस्य स्तोत्रे प्रायश्चित्तिरिति॥ यदिकदाचिदेतेषां धनदत्वदाहृ दीनां
त्रयाणां मध्ये कृतमेवं तन्मानं पुरुषं एकं चिदकमपि अकामम बुद्धिपूर्वकं अभ्याश्रवेत्। अभिलक्ष्यार्त्विज्यं कुर्वन्। तदानीं तस्य वे
कृत्यस्य प्रायश्चित्तिरस्ति॥ कुत्रास्ति नित इत्यनेवामदेव्यस्य स्तोत्रे। वामदेवमहर्षिणा दृष्टं साम वामदेव्यं कयानश्चित्र आ
वदित्येतस्यामृच्युत्पन्नं तत्साम तच्च गायेनत्रोद्गातारः पृष्ठस्तोत्रं चमनुतिष्ठन्ति तत्र कश्चित्प्रयोगविशेषः प्रायश्चित्तिः उक्तं साम
प्रशंसति॥ इदं वा इदं वामदेव्यं यजमानलोकोऽमृतलोकः स्वर्गो लोक इति। यजमानस्य लोकः पृथिवी अमृतलोको मुक्तिपदं स्व
र्गादिव लोकः इदं वै तत्त्रलोकत्रयं इदं सर्वमपि इदं वामदेव्यं कयानश्चित्र आभुवदित्यस्यामृच्युत्पन्नमिदं साम गानोऽस्ति
इदं वामदेव्यमनस्तस्मिन् समाप्तिर्क्तव्या। प्रायश्चित्तं प्रकारं दर्शयति॥ त्रिभिरक्षरैर्न्यूनं तस्य स्तोत्रमुपसृप्य चेद्यजमानं
थ गृह्णीयात्स्तु [illegible] इति निंति वामदेव्यं साम त्रिभिरक्षरैर्न्यूनं कयानश्चित्र इत्यादिका ऋचो गायत्रीछन्दस्काः तस्य च छन्दसः
[illegible] पादेषु प्रसेकमष्टाक्षराणि अपेक्षितानि अभीषुणइत्येतस्यामृचि जगतिपादे सप्तवाक्षराणि अतस्त्रिभिरक्षरैर्न्यू

नेतनस्य वामदेव्यसाम्नः संबंधि नित्योत्रं तपस्तस्य समीपं उच्चैः आत्मानं स्ववाचा पुरुषः इति त्राहं त्रेधा विगृह्णीयात् तस्य प्र
ति तद्यः एकैकस्मिन् पादे प्रक्षिपेत् यथा अजोषुणः सखीनां पुरा अविता जरितॄणां शतं भवास्यूतिभिः इति प्रक्षिप्य
गायेत् एवं प्रकारेण विज्ञेयवैकल्यपरिहारं दर्शयति ॥ स एतेषु लोकेषु आत्मानं दधात्यस्मिन् यजमानलोकेस्मिन्नन्तरिक्षलोकेस्मिन्स्व
र्लोके स सर्वां दुरिष्टिमत्येतीति ॥ अयं गायत्रोयजमान एतेषु लोकेषु आत्मानं स्थापयति त एवं भूर्लोके [illegible] तु लोकाद
स्मिन्नादित्यादिनास्य षष्ठी क्रियं नेसयजमान सर्वां दुरिष्टिं दोषापतयद्यं असंजिकामति ॥ एवं नैमित्तिकमक्षरत्रयप्रक्षेपं वि
विधाय नित्यप्रयोगेपि विघ्नो अपि यदि सम्यगिव कृत्विजः स्युरिति तदस्मादाहाथ हैतं जपेद्देवनीतिः ॥ दोषाद् ऋत्विजो
यद्यपि सम्यगिव धनल्पटादिदृष्टो वैकल्यरहिताः एव स्युः तथापि पुरुषः स अक्षरत्रयं स्तोत्रे जपेद्देवं सैतरेयामुनि
वादमस्म ॥ इति पंचदशाध्याये द्वितीयः खंडः ॥ ॥ पूर्वत्र यद्ब्राह्मणेन छंदोभिश्चेसयुग्मन्वादव्यं वहतीस्फ [illegible] ॥ अत्र ब्रा
ह्मणप्रयुक्तो वक्तव्यो विशेषोस्ति ॥ अथ छंदः प्रयुक्तं विशेषमाह ॥ छंदांसि वै देवेभ्यो हव्यमूढ्वा श्रान्तानि जघनार्धे
यज्ञस्य तिष्ठंति यथाश्वो वाश्वतरो वा वहिर्वा स्तिष्ठेदेवं तेभ्य एतमैत्रावरुणं पशुपुरोडाशमनु दैविकाहवींषि निर्वपेदि
ति ॥ गायत्र्यादीनि छंदांसि देवेभ्यो हव्यं वहनेन त्यो श्रमं प्राप्य यज्ञस्य जघनार्धे पश्चिमभागे [illegible] तिष्ठंति
यथा लोके कश्चिदश्वो वा गर्दभः सांकर्येण जातोऽश्वतरो वा [illegible] वहनं [illegible] स्वहनेन श्रान्तः क्लिष्टः एवं देवा
मेनानि छंदांस्यपि तेभ्यः श्रमपरिहारार्थं हवींषि निर्वपेत् देविका इति तेषां हविर्विशेषणीनाम कस्मिन्काले
निर्वाप इति तदुच्यते ॥ यज्ञस्यावसाने यो यं पशुरनुबंधारब्ध्यः —— ६०

त स्यपक्षेः सर्वं धीमित्रावरुणदेवताकोयः पुरोडाशः तमनुतस्मिन्नतु मिश्रेन पश्चान्निर्वपेत्। तत्र प्रथमं हविर्विधत्ते। धात्रेकपालं
पुरोडाशं द्वादशकपालं यो धाता सवषट्कार इति। धातृनाम्ने देवाय द्वादशसु कपालेषु संस्कृतं पुरोडाशं निर्वपेत्। योयं धातृना
मको देवः स वषट्कारः स्वरूपः तेन पुरोडाशेन वषट्कार देवताया प्रमोपगच्छति॥ द्वितीयं हविर्विधत्ते॥ अनुमत्यै चरुं याऽनुमतिः
सा गायत्रीति। कलाहीने सानुमतिः पूर्णे राका निशाकर इति अभिधानात्। चतुर्दशी मिश्रा पूर्णिमाऽनुमतिशब्द वाच्या द्वितेत्रि
मानिन्या देवताया अपि देवनामनस्यानुमतेर्गायत्री रूपत्वात् दीयः प्रमोपगच्छति। तृतीयं हविर्विधत्ते। राकायै चरुं
या राका सा त्रिष्टुबिति। पूर्ववद्व्याख्येयं। चतुर्थं पंचमं हविषी विधत्ते॥ सिनीवाल्यै चरुं या सिनीवाली सा जगती कुह्वै चरुं या कु
हूः सानुष्टुबिति। साद्दृष्टेन्दुः सिनीवाली सा नष्टेन्दुः कला कुहूरिसमावास्याद्वैविध्यमभिहितं। तदभिमानिदेवताया पू
र्ववद्योजनीयं। इतरेषां छंदसां कथंप्रमपरिहारइत्याशंक्याह॥ सर्वेषामन्येषामुक्तछंदोनुवर्तित्वान्नावेतप्रांतिपरिह
र इत्यभिप्रेत्याह॥ एतानि वाव सर्वाणि छंदांसि गायत्रं त्रैष्टुभं जागतमानुष्टुभं न्यान्येतानि हि यज्ञे प्रतमामिव क्रियंतइ
ति। एतान्येव गायत्र्यादीनि चत्वारि सर्वछंदोरूपाणि अन्यानि उष्णिगादीनि गायत्र्यादिकमनुसृत्यैव वर्तंते। यस्मादेता
नि चत्वारि यज्ञप्रयोगे प्रतमामिव प्राचुर्यातिशयेनैव क्रियंते प्रयुज्यंते। तस्मादेतदनुसारित्वादितरेषां पुनः॥ उक्तार्थवेद
नरुवकमनुष्ठाने प्रशंसति। एतैर्ह वा अस्य छंदोभिर्यजतः सर्वैः छंदोभिरिष्टं भवति य एवं वेदेति। एते गायत्र्यादिभिः
सर्वैरुष्णिगादिभिर्विद्धश्रसिद्धाश्छंदोभिः प्रशंसति॥ तद्धयदिदमाहु⬛ सुधायां ह वै वाजी सुहितो दधाति छंदां
सि वै सुधायां ह वा एनं छंदांसि दधाति। वाजी त्रैह विर्लक्षणान्न युक्तो ज्योतिष्टोमो

वाजी सन्तुष्टितः सम्यगनुष्ठितः सुधायां अमृतेन स्वर्गे यजमानं स्थापयतीति शेषः । अनेन प्रकारेण तद्दैतस्मिन्नेव यह्वन्निपा
दके त्वामेवे यदि एवमनोऽज्ञाप्यादुः नन्तु छंदांसि वेतद्वचनं यथोक्तमायत्यादिछंदांस्येव च्छिद्रस्योक्तौ यस्माच्छंदांस्यनं यजमा
नं सुधायां स्वर्गे स्थापयंतीति तस्माच्छंदोभिः गायत्र्येण तद्वचनं युक्तं । वेदनं प्रशंसति । अनन्तु ध्यायिनं लोकं यजतीति एवं वेदेति मन
सापि ध्यानुमन्तव्यपूर्वं सुखोपेतं लोकं प्राप्नोति ॥ अत्र केचित् पूर्वपक्षमुद्भावयन्ति । तेह्येवमाहुः धातारमेव सर्वासो पुरस्तादुपर
रस्तादाज्येन परियजेत्तदा सुसर्वासु मिथुनं दधातीति तदत्र तस्मिन्नेव छंदः भ्रमपरिहारार्थे हविष्या केके चित्पूर्वपक्षिण एवमाहुः
सर्वासामनुमत्यादीनां स्त्रीदेवतानां पुरस्तादुत्कृष्टदेवतारूपं धातारमेवाज्यद्रव्येण परितो यजेत् । सर्वसंग्रहार्थं पुरस्तादि
ति वीप्सा तेन सर्वत्र धातृविषयप्रयोगेणासु सर्वासु स्त्रीदेवतासु मिथुनं संपादयंति । तमिमं पूर्वपक्षं दूषयंति । नतु वा आ
तु जामि वा एतद्यज्ञे क्रियते यत्र समानीभ्यामृग्भ्यां समाने ह्न्यजतीति । नतु वेनैव पूर्वोक्त विषये केचिदभिज्ञा एवमाहुः य
त्र यस्मिन्प्रयोगे समानीभ्यामेकविधाभ्यामृग्भ्यां समाने एकाहनि एकस्मिन्नेवाहनि यजति । तदेतद्दनुष्ठानं जामि वृत्ता
लस्यमेव क्रियते संपाद्यते प्रकृते यो वर्त्तः पुनः प्रयोगस्य चर्वितचर्वणसदृशत्वेनानुचितत्वात् धातृदेवताके प्रथमे पुरोडाशे या
माददानुदाय्युषद्धि पुरोनुवाक्या धातारं ज्ञानामिति याज्या तत्र यत्कपरिततानामपि चतुर्णां हविषां पुरस्तादाज्येन धातारं यजेत्
तदानीमिदमृग्द्वयं पुनरपि चतुर्वारमावर्त्तनीयं । तथा सति नासौ यज्ञः प्रच्छंदानुसमर्थोऽपि वेदितस्यर्थः । वृद्धतिर्हि मिथुना सि
द्धिः स्यादित्यर्थः ॥ १० लौकिकदृष्टान्तेन तत्सिद्धिमुपपादयति । यदि हवा अपि व्यक्तेवेव इव जाया पतिर्वा वना सोमि
थुनं तद्यदा सौधातारं पुरस्ताद्यजति तदा सु सर्वासु मिथुनं दधातीति

यदि ह वा अपि लोके जाया बह्व्य इव भवन्त्येव स्युस्तथापि पतिर्वाव पतिरेक एव सन् ता सां मिथुनं संपादयति। तथा सति
यद्यासां मिनुमत्या हीनी पुरस्ताद्धाना रस्सरे इव यजति। नदानीमासु सर्वासु अनुमत्यादिषु स एक एव धाता मिथुनं सं
पादयति वक्ष्यमाणे हविर्भिः सां कृष्टे शकावार यति नु मत्य र्थे विविच्य निगमयति। इति नु देविका नामिति। अनेन तत्र
कारेण देविकाभिधानी देवतानां हविष्युक्तानीति शेषः॥ ॥इति पञ्चदशाध्याये तृतीयः खण्डः॥ ॥हविरन्तराणि प्रतिजा
नीते॥ अथ देवानामिति। अनेन नर देवानामकानां देवतानां हवींषि निर्वपेदिति शेषः। तत्र प्रथमं हविर्विधत्ते॥ सूर्यो यपुरोका
शमेककपालं यः स्तर्येः सधाना सत एवव षट्कार इति। एककपालं निर्वपेदिति शेषः। पूर्वं स्य पूर्वोक्ते धातृ स्वरूपेन दारा
वषट्कारस्य स्वरूपे न वेष पर्यायेत द्वाय अमापनयोऽद्रष्टव्यः। उत्तराणि च यानि हवींषि विधत्ते॥ दिवे चरुं यो द्यौः सानुमतिः सा एव गाय
त्र्युषसे चरुं यो षाः सा राका सा एव त्रिष्टुप् गवे चरुं या गौः सा सिनीवाली सा एव जगती पृथिव्यै चरुं या पृथिवी सा कुहूः
सा एवानुष्टुब्भिति। प्रथमं हविदनूव्याख्येयं। एतेषां हविषां पूर्वैः सार्थं पूर्वोक्तं एवार्थवाद पुनरपि पठति॥ एतानि वाव सर्वाणि
छन्दांसि गायत्री त्रिष्टुब् जगत्यनुष्टुब् अन्यान्येतानि दिवि यज्ञ तन्यामिव क्रियन्त एतद्वा अस्य छन्दांसि यजतः सर्वैः छ
न्दोभिरिष्टं भवति य एवं वेद तद्धैष यदि ह मा कुहूः सुधायां ह वै वाजी सुहितो दधातीति छन्दांसि वेति सुधायां ह वा एनं छन्दांसि
दधति यस्मिन् नु ध्यायिनं लोकं यजति य एवं वेद तद्धैक आहुः सूर्यमेव सर्वासां पुरस्तात् पुरस्तादाज्येन परियजेत तदासु सर्वा
सु मिथुनं दधातीति तदु वा आहुः जामि वा एतद्यज्ञे क्रियते यत्र समानाभ्यामृग्भ्यां समानेऽहन्यजन्तीति यदि ह वा अपि बह्व्य
इव जाया पतिर्वाव तासां मिथुनं तद्यदासां सूर्यं पुरस्ताद्यजति तदासु सर्वासु मिथुनं दधातीति॥ धातारमिति सस्य स्था

...मिसेयता यानेव विशेषः। अन्यत्सर्वं पूर्ववत्। देविकानाम्नां चरुविषां तुल्यसामर्थ्यमभिप्रेत्य विकल्पं दर्शयति॥ ता ...ता अमूस्ता इमा। अन्यतराभिर्वा यत्तं काममाप्नोति य एतासूभयीभिर्यजति॥ नादेवीनां मा ग सिद्धा इमा इदानीमुक्ताः ...पुरोडाशा...मिस्यादयो याः सन्ति अमूः ...इत ग्रन्थेनोक्तं। धात्रे पुरोडाशमित्यादयो देविकाः पूर्वं देवीनां ... ॥ तादात्म्यमुक्तं। अथ देविकानु दिश्य देवीनां तादात्म्यमुच्यते। अमूः पूर्वोक्ता देविकाः सन्ति ता इमा इदानीमुक्ता देवि एवमन्योन्यं वा तादात्म्ये सति यः काम एतासूभयविधासु लभ्यते। तं काममन्यतराभिर्वा एकविधाभिरेव प्राप्नोति तस्माद्विकल्पेन प्रयोग इत्यर्थः। अथैनेमिनिर्वृत्तं समुच्चयं विधत्ते॥ ता उभयीर्गतश्रियः प्रजापतिकामस्य संनिर्वपेद् इति। अनूचानानां मध्ये कश्चिद्गतश्रीः तथा च श्रूयते। त्रयो वै गतश्रियः शुश्रुवान् ग्रामणी राजन्य इति माह त्रयो गतश्रीर्यदि प्रजापतिं प्रजोत्पादनसामर्थ्यं कामयते तदानीं तदानीं तस्य ता अत्रादेविकादेवीश्चोभयीः संवर्धयेत्। स मुच्चित्य निर्वपेत्॥ धनकामस्य समुच्चयं निषेधति॥ न वैवक्ष्यमाणस्येति॥ धनमपेक्षमाणस्य तु न संनिर्वपेत्। उभयविधानां समुच्चित्य निर्वापेन कार्यः। विपक्षे बाधं दर्शयति। यद्येनाः एषिष्यमाणस्य संनिर्वपेदीश्वरो हास्य वित्तं देवा अर्हतो यु
अ दोस्य यमास्मूनेक समर्सस्तेती ति॥ वित्तमेषिष्यमाणस्यापद्येनाउभयोः समुच्चित्य निर्वपेत् तदानीमस्य धनकामस्य वित्तं देवा अरतो यद्वा ईश्वरः अरं नुमन्तोऽनुसमर्था भवन्ति एतदपेक्षितं वित्तं द्विषन्ति इत्यर्थः। तत्र हेतुरुच्यते। यद्वै यस्माद्देव कारणात्। अयं धनार्थी स्वात्मने स्वार्थमेव फलममैतन्सर्वं पूर्णं वित्तं मनसा ध्यानवान्। धनलोभेन यागादिषु प्रवृत्तेर्वान् एतदपेक्षिते धने देवानां द्वेषो युज्यते। धनकामस्य समुच्चयं निषिध्य प्रजाकामस्य पूर्वं त्र संविहितं समुच्चयमथ वा देन

पृथ्वीं सनिता। ता ह शुचिवृक्षो गौपालायनो वृद्धद्युम्नस्याभिप्रतारिणस्याध्वर्युर्यज्ञे स निरुवाच तस्य ह रथं गृत्सं गाहमानं दृष्ट्वो-
वाचेत्थमहमस्य राजन्यस्य देविकाश्च देवीश्चाध्वर्युर्यज्ञे समभादयं यदस्य रथं गृत्सो गाहत इति चतुःषष्टिं कवचिनः श-
श्वद्धास्य ते पुत्रनप्तार आसुरिति॥ शुचयः शुद्धाः समीचीनपुष्पफलोपेता वृक्षाः यस्य महर्षेराश्रमे सन्ति सोयं शुचिवृक्ष-
त् नामकः सम्यक्पूर्णोदकप्रदानेन गोशुश्रूषणकरो निर्गोपालायननामकऋषिः दृषिः पूर्वोक्तनामा शुचिवृक्षः वृद्धद्युम्न इति नाम-
धुनेयस्य राज्ञः सोऽयं वृद्धद्युम्नः अभित्रानुत्कर्षेण तरति निराकरोति अभिप्रतारी कृष्टिद्राजा तस्य पुत्र आभिप्रतारिणः
एवंविधो वृद्धद्युम्नः तदास्य राज्ञो यज्ञे देविकादेवीश्चाध्वर्युर्यदि रिच मनेन शास्त्रोक्तप्रकारेण समभादयज्ञं समृद्धिं समादित-
वानस्मिन्समृद्धयाज्ञे अनुष्ठाने तन्देवनाद्धर्षितवानस्मिन्प्रसादादयं रथं गृत्सो राजपुत्रः क्रीडार्थं जलं गाहते रतिके वर्णं शुचि-
वृक्षेण दृष्टः रथं गृत्स एवैकः किन्तु चतुःषष्टिसंख्याकाः शश्वत्कवचिनः सर्वदा युद्धार्थं सन्नद्धा शूराः अस्य वृद्धद्युम्नस्य रा-
ज्ञः सन्ततथाविधा एव पौत्रा आसन्॥ ॥इति पञ्चदशाध्याये चतुर्थः खण्डः॥ ॥ज्योतिष्टोमस्तावत्सप्तसंस्थः समाप्तिभेदाः सप्त-
विधः। अग्निष्टोमः उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्यामश्चेति संस्थाः आश्वलायनेनाभिहिता तानु तत्राग्निष्टोमसाम्नायज्ञा-
७ यज्ञा स्वयेन यज्ञसमाप्तिः सोयं प्रथमकल्पोऽग्निष्टोमः स सर्वोपि पूर्वमुक्तः। अथोक्थ्यसंस्थारूपो ज्योतिष्टोमो वक्तव्यः। तदर्थमा-
देव्याख्यायिकामाह॥ अग्निष्टोमे वै देवा अश्रयन्तोक्थ्यान्यसुरास्ते समावद्वीर्या एवासन्न व्यावर्तन्त तान् भरद्वाज ऋषीणामपू- त
रणाः हि ... एवा असुरा उक्थेषु श्रिताः स्तोत्रेन घानि कुश्च न पश्यन्तीति सोऽग्निमुदहृयदिति॥ यदा देवा अग्निष्टोमं समाश्रितास्तदा-
एतदपेक्षीनमसुरा अपि उक्थ्यनामकानि स्तोत्राणि शस्त्राणि वाश्रित्यावस्थिताः ततश्च ते देवाश्चासुराश्च युद्धे तुल्यवीर्या एवा

[illegible] ऋषुध्याः द्वौर्याधिक्येन व्याहृतिम्प्राणाः तदानीमृषीणां मध्ये सूक्ष्मदर्शी भरद्वाजस्तानसुरानेषां देवानामृषीणां मध्ये
[illegible] कुक्थ्यपरानपश्यत् दृष्ट्वा च मत्वा चेदृमेरहस्य च स्थिता असुरा उक्थेषु स्तोत्रशस्त्रेषु आश्रितास्तानसुरानेषां देवा
नामृषीणां मध्ये न कोऽपि पश्यति । तेनाग्निबोध्यः स भरद्वाजोऽसुरनिराकरणार्थं केनचिन्मन्त्रेणाग्निमुदह्वयत् तद्ध्वनिना
[illegible] कन्नूनं कनकारूपं तमिमं मन्त्रं दर्शयति ॥ एतदु षु ब्रवाणि तेऽग्न इत्थेतरा गिर इतीति । हे अग्ने यस्तु आगच्छे वनेतव स्तु अभ्यावा
णि स्तोत्रोऽनकार्ये कथयानि इतरा देववाक्यव्यतिरिक्ता गिरोऽसुरवाच इत्थ छा इत्थमनेन प्रकारेण प्रश्ले स्येन रादिति दोषः अभि
न्मन्त्रे इतरस्त्राद्यार्थं दर्शयति । असुर्याद्रवा इतरा गिर इति असुरेभ्यो हिता असुर्यास्ताश्च गिरः वेदवाक्यादितरा देवविरोधि
न्य इत्यर्थः । तमग्निर्वाक्यं दर्शयति । सोऽग्निरूपो निघ्नन्नब्रवीत् किंस्विद्देवमहं कृशो दीर्घः पलितो वक्ष्यतीति । भरद्वाजेनाहूतः
योऽयमग्निः सोऽग्निः स्वसमीपगमसायानुभिस्थितिं मनसा ब्रवीत् मध्यम अयं स ऋषिः किंस्विद्देव किं नाम वक्ष्यतीति । कृशो दी
र्घः पलित इति त्रयः पि विशेषणानि तानि स्पष्टीकरोति । भरद्वाजोऽहं वै कृशो दीर्घः पलित आसं तस्य स्पष्टार्थः कश्चित्पलितो व
क्ष्यतीत्यग्निना पृष्टस्य भरद्वाजस्योत्तरं दर्शयति । सोऽब्रवीदिमे वा असुरा उक्थेषु श्रितास्तान्वै न कश्चन पश्यतीति । स भ
रद्वाजोऽग्निं प्रत्येवमब्रवीत् । इमे वा असुरा उक्थेषु श्रितास्तान्वै न कश्चन पश्यतीति पूर्ववद्व्याख्येयः । अथ वाक्य स्तोत्रसा
धनेभूतं साकमश्वं नाम कस्मात् साम यदग्निस्तद्दीर्घं नाम निर्वक्ति । तानग्निरश्वो भूत्वाभ्यत्यद्रवदग्निरश्वो भूत्वाभ्यत्यद्रवदित्युक्ता सा
कमश्व्यं साम अभवत् साकमश्वस्य साकमश्वत्वमिति । सोऽग्निर्भरद्वाजस्योत्तरं श्रुत्वा तेन तदुक्थेषु यमश्वाकारेण यातान्
न सुरानभिलक्ष्याऽवदत् अतिशयेनागच्छत् असुराणामुपरि वेगवत्तमात्मरूपमश्वं प्रवर्त्य सोऽसुरान् मारितवानित्यर्थः ।

यस्मात्स्वयमभ्यो॥१२॥ यैतेरसुरैः साकं युद्धं कृत्वा जितवान् तस्मादेतद्धृतानं स्तवनाय प्रवृत्तायामपि स्तुष्टुव वाणिनद्रस्याद्विका
याम् चितस्तन्तस्य साम्नः साकमश्वमिति नामेत्स पन्नो॥ तस्य नाम्नः उक्थस्तोत्र निष्पादकत्वं विधत्ते॥ न द्वादुः साकमश्वेनो
क्थानि प्रणयेदप्रणीतानि वा वतान्युक्थानि यान्यत्र साकमश्वादितीति॥ तत्र साकमश्वविषय प्रयोगमाह तिद्धा एवमा
हुः॥ साकमश्वनामकेन साम्ना स्तोत्राण्युक्थनामकानि प्रणयेत् साकमश्वादन्यत्र सामान्तरेण यान्युक्थानि स्तोत्राणि प्रणी
येतेतान्यप्रणीतान्येव भवंतितस्मादिदमेव सामोक्थस्तोत्रनिष्पादकं पक्षान्तरं विधत्ते॥ प्रमंहिष्ठीयेन प्रणयेदित्याहुः प्रमं
हिष्ठीयेन वै देवा असुरानुक्थेभ्यः प्राणुदन्तेति॥ प्रमंहिष्ठाय गायतेति तस्यामपि चितस्पन्नं साम प्रमंहिष्ठीयं तेन
साम्नोक्थस्तोत्राणि निष्पादयेत्॥ उक्थेष्वाश्रितानसुरान्देवा एतेन साम्ना उक्थेभ्यो निराकृतवंतः एतयोः साम्नोर्द्वि
कविकल्पं दर्शयति॥ तस्मादेव प्रमंहिष्ठीयेन नयेत् साकमश्वेनेति॥ अहेहस्य स्वयं शाह्यान्यत्र निषेधार्थो पूर्वविकल्पार्थः वि
हितानामनेकार्थत्वात् तानुक्थस्तोत्राणि प्रमंहिष्ठीयेन साम्ना प्रणयेत्॥ अहेव अथवा साकमश्वेन साम्ना प्रणये
१॥ ॥इति पञ्चदशाध्याये पञ्चमः खंडः॥ ॥उक्थस्तोत्रेषु साम विशेषान्विधायउक्थशस्त्रेषु ऋक् विशेषान्विधातु
२ दौ मैत्रावरुणस्य शस्त्रे किंचिद्विधत्ते॥ देवा असुरा मैत्रावरुणस्योक्थमश्रयंते सोब्रवीदिंद्रः कश्चाहं चैमानि
धनिरान्नो साकमहादस्यदवेश्यब्रवीद्वसं मम तो देंद्रावरुणमैत्रावरुणमैत्रावरुणस्तनीयुसवनेत्रोसतीद्युक्थद्वित्री
कसश्वेसत्त्वेनोमुदेतामिति॥ उक्थस्यकर्तोरं मिष्टोम विकृतिवादनिदिष्टं अग्निष्टोम प्रयोगमनुष्ठायनततकर्ध्वमु
नसुरान्निरत्रयोनुष्ठेयास्त यात्वापस्त्वबनाह॥ उक्थ्ये चेदग्निष्टो मसाकुनयं स्त्रोभ्यमश्वमसगणोराजा नमांतिर

प्रथमसवमसगणे मैत्रावरुणस्य यच्छस्त्रमस्ति तत्कथमस्तोत्रं पुरा साम्ना निराकृतास्त एवासुरा इंद्रं मैत्रावरुणशस्त्र
मुखे नैनत्रावस्थितं स इंद्र इतरदेवानास्ये वमब्रवीत् असुराणामपनोदने मम सहायो पेक्षितः ततो देवा युष्मा
कं स्वे मानसु ...नितो मैत्रावरुण शस्त्रे नोत्साहे नेपनोदनं करिष्याव इति देवेष्वप्युक्तो वरुणेन्द्रं चैत्यब्रवीत्
...वाद्य सर्थः यस्मादेवं तस्मादुक्थ्यामेव केनेनने वामसुराणामपनोदनं मम सहायो पेक्षितः ततो देवाः युष्माक
कथ्याद्य चेमान् असुरार्थं ऐंद्रावरुणस्त्रस्य कं नीयसवने मैत्रावरुणनामकं ऋचिरूक्ते स्तेनु। इंद्रावरुणा युवमध्वराय
...द्रारैस्रकैमैत्रावरुणीतेनतु ष्ट्य इंद्रश्च तानसुरांस्ततः शस्त्राद नुदतां निराकृतवानौ। द्वितीयसवमसगणे किं वि
...दयं विधत्ते। तेनैव नोपद्रुता असुरा ब्राह्मणाच्छंसिन उक्थमश्रयंत सोब्रवीदिंद्रः कश्चाद्य चेमानितो सुरा नो
...स्यवहाइ सह चे स ब्रवीद्बृहस्पतिस्तस्मादैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसी तृतीयसवनेशंसनीयमुक्थ्यं कृतानु बृहस्पतिश्च ततो नु
देतामिति। ततो मैत्रावरुणशस्त्रान्निराकृता असुरा ब्राह्मणाच्छंसिनः शस्त्रमाश्रितवंतः उद्गुनोनवयो रक्षमाणाद्धसेन दृ
स्यति देवताकस्त्रको द्वाद्य चैं इंद्रस्त्रे अच्छा म इंद्र मतयः स्वर्विद इति एकादशार्चमेकं स्त्रकं इदं उयमिश्रितं सदैन्द्राबार्हस्पत्यं
संपद्यते तदेतद्ब्राह्मणाच्छंसी ब्रूयात्। अन्यस्य वैवत्यारव्येयं। तृतीयसवमसगणे स्त्रके विधत्ते। तेनैव नोपद्रुता असुरा
वाकस्यो कथ्यमश्रयंत सोब्रवीदिंद्रः कश्चाद्य चेमानितो सुरानो दस्यावहाइ सह चे स ब्रवीद्विष्णुस्तस्मादैन्द्रावैष्णवमच्छा
वाकस्य तृतीयसवने शंसनीयमुक्थ्यं हिता न्विष्णुश्च ततो नुदेतामिति। स वाक्सर्वशास्त्रनिषिद्धं ऐन्द्रं वैष्णवमनुक्तो। अन्यस्य
वैवत्यारव्येयं। स्त्रकानी द्विदेवताकानि मंत्री सन्ति। इदं द्विमिन्द्रेण देवताः शस्त्रेषु तद्वे मिथुनं तस्माद्द्वान्मिथुनं प्रजाये ६४

...णस्त्यावरूणं स्पर्शयति विष्णुर्देवताक्रमेण शस्यंते द्वंद्वं वै लोके स्त्रीपुरुषरूपं मिथुनं तादृशान्मिथुनाद्यस्य स्वरूपं मिथुनं प्रजायते ४

तेन तेन द्वंद्वेनाऽसन्नं यजमानस्य प्रजास्वेवंभवति वेदनप्रशंसेति। प्रजायते प्रजया पशुभिर्य एवं वेदेति। आश्विनी त्रयाणां होतृकाणां स्तुतौ विविधायपानुनेष्ट्रश्च मैत्रावरुणादिविधत्ते॥ अथ द्वैतेनपाद्याश्विनेष्टियाश्चयत्वै ऋतुयाजाः षट्कृत्वइति। प्रैषमंत्रे पंचमे स्वरो होतायष्टादिस्वादिकोद्वितीयाष्टमे मैत्रोपानुद्राहतु पाजोनधान त्रे वप्रे प्रस्तोतृनीयमव मौमैत्रोनेष्टुर्द्वाद तुयाजो एवं स्वयार ऋतुयाजैर्मिलित्वा पोतृसंबधान्नेष्टृसंबंधाध्ययोत्रियानेष्टियाश्च भवंति तयात्र स्थितयाज्यापोतुस्तिस्रः स्वाः नेष्टुस्तिस्रः स्वः इ सर्वेषामृचो भवंति तदेतन्मन्ये द्वाह्यं प्रशंसति। सा विराड् द्वादशानी तद्धि राज्यपर्द्दशद्विन्यत्रतिष्ठा प्रत्येवप्रतिष्ठापयतीति। साद्भुवेवमेवं स्वसमष्टिः दशिनी द्वादशसंख्याशुक्लासनी विराडूर्ध्वं दृष्टः स्वयं पूर्वं द्वादशाक्षरा विराडिति क्तसन रानूतुकं नद्वादशसंप्रयोगेण दशिन्यां द्वादशसंख्यापेता पी विराजी यद्वैत्रत्विजः प्रतिष्ठापयतीति। अभ्यासो ध्यायप समाप्त्यर्थः॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकवीरबुक्कधुरंधरस्य सायणाचार्यकृतौ माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणभाष्ये पंचमाध्याये षष्ठः खंडः॥ ॥समाप्तेयं तृतीयपंचिका॥ ॥शके १७४ श्रीय ...अश्विने मासि सप्तम्यां रविवासरे समाप्तिमगमत् श्रीमद्द्विजवर्येन मणभट्टात्मजेन वेंडक्डेनालेखि॥ श्री कृष्णः प्रियताम्॥॥

सं५

वाक्य

ताकस्ये

वेदव्याख्येय

तैत्तरीयभाष्य
यजुर्वेद
३००